
Downloaded from https:// www.studiestoday.com

दशमी कक्षा

# आमोदः

## सम्पूर्ण–संस्कृतम्




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

महाराष्ट्रराज्य–पाठ्यपुस्तक–निर्मिति: तथा
अभ्यासक्रम–संशोधन–मण्डलम्, पुणे–४



# दशमी कक्षा

# सम्पूर्ण–संस्कृतम्

# आमोद:

(मराठी, गुजराती, हिन्दी, इंग्रजी
इत्यादीनां माध्यमानां कृते)



6SSNHT

'स्मार्टफोन' इति उपकरणेन 'दीक्षा ॲप' द्वारा पाठ्यपुस्तकस्य प्रथमपृष्ठे योजितेन Q. R. Code माध्यमेन (PDF) पाठ्यपुस्तकं द्रष्टुं शक्यते तथा पाठ्यपुस्तके प्रतिपाठं योजितेन Q. R. Code साहाय्येन दृक्श्राव्य–अध्ययन–अध्यापनसाहित्यम् उपलभ्यते ।

अभ्यास–२११६/(प्र.क्र.४३/१६) एसडी–४ दिनाङ्कः:–२५.४.२०१६ इत्यमुं शासननिर्णयक्रमाङ्कम् अनुसृत्य स्थापिताया: समन्वयसमित्या: उपवेशने २९.१२.२०१७ दिने इदं पुस्तकम् २०१८–१९ इति शैक्षणिकवर्षत: अनुमानितम् ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

प्रथमावृत्तिः – २०१८

© महाराष्ट्रराज्यपाठ्यपुस्तकनिर्मितिः तथा अभ्यासक्रमसंशोधनमण्डलम्, पुणे – ४११ ००४.
अस्य पुस्तकस्य सर्वे अधिकाराः महाराष्ट्रराज्यपाठ्यपुस्तकनिर्मितिः तथा अभ्यासक्रमसंशोधनमण्डलस्य सन्ति। महाराष्ट्रराज्यपाठ्यपुस्तकनिर्मितिः तथा अभ्यासक्रमसंशोधनमण्डलस्य सञ्चालकस्य लिखित–अनुमतिं विना अस्य पुस्तकस्य कमपि भागम् उद्धृतं कर्तुं न शक्यते।

**संयोजनम् :**
श्रीमती सविता अनिल वायळ
विशेषाधिकारी, मराठी

**चित्रकारः :**
यशवन्त देशमुख

**मुखपृष्ठम् :**
यशवन्त देशमुख

**अक्षरयोजनम् :**
भाषाविभागः
पाठ्यपुस्तकमण्डलम्, पुणे.

**निर्मितिः :**
सच्चिदानन्द आफळे,
मुख्यनिर्मिति–अधिकारी
राजेन्द्र चिन्दरकर,
निर्मिति–अधिकारी
राजेन्द्र पांडलोसकर
साहाय्यक– निर्मिति–अधिकारी

**कागदम् :**
70 GSM Creamwove

**मुद्रणादेशः :**
N/PB/2018-19/(1.00)

**मुद्रकः :**
M/s.Elegant Offset Printers Pvt.Ltd.,Kolhapur

**प्रकाशकः:**
विवेक उत्तम गोसावी

**नियन्त्रकः:**
पाठ्यपुस्तकनिर्मितिमण्डलम्,
प्रभादेवी, मुम्बई – २५.

**संस्कृतभाषातज्ज्ञसमितिः**

पं. गुलाम दस्तगीर बिराजदार (अध्यक्षः)
श्रीमती तरङ्गिणी खोत
डॉ. माधव केळकर
डॉ. प्रज्ञा देशपाण्डे
डॉ. माधव भुस्कुटे
श्रीमती सविता वायळ (सदस्य–सचिव)

**संस्कृतभाषाभ्यासगणसदस्याः**

डॉ. प्रसाद भिडे
श्री. जगदीश इन्दलकर
श्रीमती ऋचा वैद्य
श्रीमती काञ्चन जोशी
डॉ. माधवी जोशी
डॉ. प्रसाद कुलकर्णी
श्री. विशाल सराफ
श्री. रघुवीर रामदासी
श्रीमती शेवन्ती दाङ्गट
श्रीमती विज्ञापना गोकर्णकर
श्रीमती अदिती माधवन्
श्री. श्रीहरी गोकर्णकर
श्रीमती स्वाती जाधव
श्रीमती सुवर्णा बोरकर
श्रीमती लीना काकडे
श्रीमती जयश्री देशमुख
श्रीमती अर्चना जोशी
डॉ. माधवी नरसाळे

**निमन्त्रितसदस्याः**

श्री. राजेन्द्र दातार
श्रीमती मैथिली पोतनीस
श्रीमती शर्मिला भट
श्रीमती सीमा डोळे
श्रीमती श्वेता पवनीकर
डॉ. हेमा डोळे
श्रीमती स्नेहा सप्रे
श्रीमती समीक्षा घाणेकर
श्री. नीरज दाण्डेकर

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# भारतस्य संविधानम्

## प्रस्तावना

वयं, भारतस्य जनाः, भारतं सम्पूर्णप्रभुत्वसम्पन्नं, समाजवादिनं, सम्प्रदायनिरपेक्षं, लोकतन्त्रात्मकं गणराज्यं विधातुं, तस्य समस्तान् नागरिकांश्च

सामाजिकम्, आर्थिकं, राजनीतिकं च न्यायं,
विचारस्य, अभिव्यक्तेः, आस्थायाः, धर्मस्य,
उपासनायाश्च स्वतन्त्रतां,
प्रतिष्ठायाः, अवसरस्य च समतां प्रापयितुं;
तेषु सर्वेषु च
व्यक्तिगौरवस्य राष्ट्रस्य एकतायाः,
अखण्डतायाश्च सुनिश्चायिकां बन्धुतां
वर्धयितुं;

कृतदृढसङ्कल्पाः अस्याम् अस्मदीयायां संविधानसभायाम्

अद्य, ख्रिस्तीये १९४९ तमे वर्षे नवम्बरमासस्य २६-तमे दिने (२००६-तमे विक्रमसंवत्सरे मार्गशीर्षे शुक्लपक्षे सप्तम्यां तिथौ) एतेन इदं संविधानम् अङ्गीकृतम्, अधिनियमितम्, आत्मार्पितं च कुर्महे ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## प्रतिज्ञा

भारतो मम देशोऽयं भारतीयाश्च बान्धवाः ।
परानुरक्तिरस्मिन् मे देशेऽस्ति मम सर्वदा ।।१।।

समृद्धा विविधाश्चास्य या देशस्य परम्पराः ।
सन्ति ताः प्रति मे नित्यमभिमानोन्नतं शिरः ।।२।।

प्रयतिष्ये सदा चाहमासादयितुमर्हताम् ।
येन तासां भविष्यामि श्रद्धायुक्तः पदानुगः ।।३।।

सम्मानयेयं पितरौ वयोज्येष्ठान् गुरूंस्तथा ।
सौजन्येनैव वर्तेय तथा सर्वैरहं सदा ।।४।।

स्वकीयेन हि देशेन स्वदेशीयैश्च बान्धवैः ।
एकान्तनिष्ठमाचारं प्रतिजाने हि सर्वथा ।।५।।

एतेषामेव कल्याणे समुत्कर्षे तथैव च ।
नूनं विनिहितं सर्वं सौख्यमात्यन्तिकं मम ।।६।।

## राष्ट्रगीतम्

जनगणमन–अधिनायक जय हे
भारत–भाग्यविधाता ।
पंजाब, सिंधु, गुजरात, मराठा,
द्राविड, उत्कल, बंग,
विंध्य, हिमाचल, यमुना, गंगा,
उच्छल जलधितरंग,
तव शुभ नामे जागे, तव शुभ आशिस मागे,
गाहे तव जयगाथा,
जनगण मंगलदायक जय हे,
भारत–भाग्यविधाता ।
जय हे, जय हे, जय हे,
जय जय जय जय हे ।।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## प्रस्तावना

आत्मीयाः छात्राः,

संस्कृताध्ययनस्य तृतीयं वर्षमिदं विद्यालयस्य च अन्तिमं वर्षम् । शालान्तपरीक्षायाः अन्तिमं सोपानम् उल्लङ्घ्य विशालं जगत् प्रवेष्टुकामाः यूयम् ।

गतवर्षद्वये युष्माभिः संस्कृतभाषायाः वैशिष्ट्यानां काव्य-नाटकादि-साहित्यस्य अल्पपरिचयः प्राप्तः स्यात्। पठनसमये 'कः लाभः अस्ति संस्कृतपठनेन?' 'आधुनिके विज्ञानयुगे किं प्रयोजनम् अस्याः प्राचीनभाषायाः?' इति प्रश्नाः कदाचित् मनसि स्फुरिताः स्युः । अतः ज्ञातव्यम्, यत् संस्कृतभाषायां केवलं काव्यनाटकादीनि एव भवन्ति इति न । ज्ञानभाषा सा अस्माकम् । तपश्चर्यया कठोरपरिश्रमैः ऋषिभिः लब्धं सर्वमेव ज्ञानं संस्कृते एव अस्ति । जिज्ञासया तस्य परिशीलनम् अस्माकं कर्तव्यम् ।

संस्कृतभाषायां सर्वं ज्ञानं पूर्वमेव कथितम् इति मास्तु दुराग्रहः । किन्तु तत्त्वनिकषेण परीक्ष्य आधुनिकेन ज्ञानेन तत् तोलनीयम् अस्माभिः । एतदर्थम् अध्येतव्या संस्कृतभाषा ।

अद्य नैके परदेशीयाः अपि संस्कृतभाषाम् अध्येतुं प्रत्यहं भारतम् आगच्छन्ति। भारतीयजीवनपद्धत्या, तत्त्वज्ञानेन, योगवेदान्त-आयुर्वेदादिभिः शास्त्रैः च ते संस्कृतं प्रति आकृष्टाः भवन्ति । वयमपि जागरूकतया अस्माकं भाषायाः रक्षणं संवर्धनं च कुर्मः ।

संस्कृतभाषायाः यद् उत्तमं युष्माभिः लब्धं तत् पाथेयरूपेण जीवनप्रवासे सर्वदा युष्माभिः सह भवेत्। सफलाः भवत, संस्कृतज्ञानेन स्वकार्यक्षेत्रेषु विशेषज्ञतां प्राप्नुत। भारतस्य गौरववर्धकाः सुपुत्राः भवत । आदर्शभूतस्य छात्रस्य गुणान् सदा स्मरत ।

*ज्ञानतृष्णा गुरौ निष्ठा सदाध्ययनदक्षता ।*
*एकाग्रता महत्त्वेच्छा विद्यार्थिगुणपञ्चकम् ।।*

शुभास्ते पन्थानः सन्तु ।

(डॉ. सुनिल मगर)
सञ्चालकः
महाराष्ट्रराज्यपाठ्यपुस्तकनिर्मितिः तथा
अभ्यासक्रमसंशोधनमण्डलम्, पुणे.

पुणे
दिनाङ्कः - १८ मार्च २०१८, गुढीपाडवा
भारतीय सौर दिनांक : २७ फाल्गुन १९३९

### मुखपृष्ठसङ्कल्पना




प्राचीनकालादारभ्य संस्कृतसाहित्यगङ्गा अद्यापि निरन्तरं प्रवहति । इतोऽपि अग्रे इयं संस्कृतमन्दाकिनी निरन्तरं प्रवहिष्यति । एतामेव सङ्कल्पनां मनसि निधाय डॉ. गजानन बाळकृष्ण पळसुले इति आधुनिकसंस्कृतमहाकविना 'संस्कृतमन्दाकिनी' गीतं (पृ.क्र.११२) रचितम् । तामेव सङ्कल्पनां प्रकटयति पुस्तकस्य अस्य मुखपृष्ठम् ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# संस्कृतम् ।

**दशमीकक्षाच्छात्राणां संस्कृतभाषाविषये अध्ययननिष्पत्तिः ।**

| क्षेत्रम् | अध्ययननिष्पत्तिः |
|---|---|
| **श्रवणम्** | १. आकाशवाण्या दूरचित्रवाण्या च प्रसारितस्य संस्कृतवार्तापत्रस्य श्रवणं कुर्वन्ति अवगच्छन्ति च ।<br>२. शिक्षकेण संस्कृतमाध्यमेन कृतम् अनौपचारिकसम्भाषणं शृण्वन्ति ।<br>३. पाठ्यम् अतिक्रम्य संस्कृतसुभाषितानि स्तोत्रादीनि च शृण्वन्ति ।<br>४. संस्कृतगीतनाटकादीन् अवगत्य आस्वादयन्ति । |
| **भाषणम्** | १. संस्कृतस्य उच्चारणवैशिष्ट्यानि अनुसृत्य उचितं श्लोकपठनं सम्भाषणं च कुर्वन्ति ।<br>२. संस्कृतमाध्यमेन अध्ययनकृतीनां विषये अनुभवं कथयन्ति ।<br>३. संस्कृतेन चर्चां कुर्वन्ति । |
| **पठनम्** | १. ससन्धि तथा सन्धिं विगृह्य पाठ्यांशं पठन्ति । |
| **लेखनम्** | १. संस्कृतेन लेखननियमान् अनुसृत्य श्रुतलेखनं कुर्वन्ति ।<br>२. भाषानियमान् अनुसृत्य संवादं/वर्णनं/लघुपरिच्छेदं लिखन्ति ।<br>३. माध्यमभाषातः भाषानियमान् अनुसृत्य अनुवादं कुर्वन्ति । |
| **अध्ययनम्** | १. आन्तरजाले संस्कृतविषयकान् सङ्केतस्थलान् अन्विष्यन्ति ।।<br>२. आधुनिकभाषासु वर्तमानानां शब्दानां कृते संस्कृतेन प्रतिशब्दानां निर्माणं प्रयोगं च कुर्वन्ति यथा - चलभाषः, सङ्गणकः, महापौरः।<br>३. गीतादीनां संस्कृतानुवादस्य यत्नं कुर्वन्ति ।<br>४. प्रस्तावनायाः चिन्तनप्रश्नानां च आधारेण संस्कृतलेखकान् तथा संस्कृतसाहित्यविषयं जानन्ति ।<br>५. संस्कृतेन शब्दजालस्य निर्माणे यत्नं कुर्वन्ति ।<br>६. संस्कृतेन कथापूर्तिं कर्तुं शक्नुवन्ति ।<br>७. अमरकोषस्य अधिकम् अध्ययनं प्रयोगं च कुर्वन्ति । |
| **भाषाभ्यासः** | १. संस्कृतेन सरलसंवादं कुर्वन्ति ।<br>२. सुयोग्यरीत्या लकाराणां प्रयोगं कुर्वन्ति ।<br>३. पूर्वपठितानां भाषानियमानां दृढीकरणं प्रयोगं च कुर्वन्ति ।<br>४. आधुनिकसंस्कृतवाङ्मयं पठितुं अवगन्तुं च प्रयत्नं कुर्वन्ति ।<br>५. समस्तपदानां सन्दर्भम् अनुसृत्य अर्थनिश्चयं विग्रहं च कुर्वन्ति ।<br>६. एकतः शतं यावत् (१-१००) संख्याः (क्रम-आवृत्तिसहिताः) जानन्ति । |

**पाठ्यपुस्तकस्य अपेक्षितपरिणामार्थं सर्वासां क्षमतानां सुयोग्यविकासार्थं प्रतिसप्ताहं षट् (६) तासिकाः अपेक्षिताः।**

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अनुक्रमणिका


| | | |
|---|---|---|
| ✼ | सुगमसंस्कृतम् । | १ |
| १. | आद्यकृषकः पृथुवैन्यः । (गद्यम्) | ८ |
| २. | व्यसने मित्रपरीक्षा । (गद्यम्) | ११ |
| ३. | सूक्तिसुधा । (पद्यम्) (कण्ठस्थीकरणार्थम्) | १४ |
| 📖 | अभ्यासपत्रम्-१ । | १७ |
| ✼ | व्यञ्जनान्ताः । | १९ |
| ४. | अमूल्यं कमलम् । (गद्यम्) | २५ |
| ५. | स एव परमाणुः । (संवादः) | २७ |
| ६. | युग्ममाला । (पद्यम्) (कण्ठस्थीकरणार्थम् ।) | ३० |
| 📖 | अभ्यासपत्रम्-२ । | ३३ |
| ✼ | लकारजगत् । (अ) धातवः (द्वितीयः समूहः) (ब) लिट् (क) वाच्यपरिवर्तनम् । | ३५ |
| ७. | संस्कृतनाट्यस्तबकः । (संवादः) (सरलार्थलेखनार्थम्) | ४५ |
| ८. | वाचनप्रशंसा । (पद्यम्) (सरलार्थलेखनार्थम्) | ४८ |
| ९. | धेनोर्व्याघ्रः पलायते । (गद्यम्) | ५० |
| ✼ | समासाः । | ५३ |
| १०. | नदीसूक्तम् । (संवादः) (सरलार्थलेखनार्थम्) | ६० |
| ११. | जटायुशौर्यम् । (पद्यम्) | ६२ |
| १२. | आदिशङ्कराचार्यः । (गद्यम्) | ६५ |
| 📖 | अभ्यासपत्रम्-३ । | ६९ |
| ✼ | धातुसाधित-विशेषणानि । | ७१ |
| १३. | चित्रकाव्यम् । (पद्यम्) (कण्ठस्थीकरणार्थम्) | ७९ |
| १४. | प्रतिपदं संस्कृतम् । (संवादः) | ८५ |
| १५. | मानवताधर्मः । (पद्यम्) (सरलार्थलेखनार्थम्) | ८९ |
| 📖 | अभ्यासपत्रम्-४ । | ९१ |
| ✼ | णिजन्ताः (प्रयोजकाः) । | ९३ |
| ✼ | सङ्ख्याविश्वम् । | ९६ |
| ✼ | लेखनकौशलम् - अ. वाक्यरचना आ. निबन्धः/संवादः इ. संस्कृतानुवादः/चित्रवर्णनम् । | १०१ |
| ✼ | परिशिष्टम् | ११० |
| ✼ | शब्दकोषः | ११३ |
| ✼ | धातुरूपाणि | ११५ |
| ✼ | अमरकोषः | ११७ |


Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## प्रार्थना । (केवलं कण्ठस्थीकरणार्थम्)



**करदर्शनम् –** कराग्रे वसते लक्ष्मी:
करमध्ये सरस्वती ।
करमूले तु गोविन्द:
प्रभाते करदर्शनम् ।।





**क्षमाप्रार्थना –** समुद्रवसने देवि
पर्वतावलिभूषिते ।
विष्णुपत्नि नमस्तुभ्यं
पादस्पर्शं क्षमस्व मे ।।



**सूर्यनमस्कार:–** ध्येय: सदा सवितृमण्डलमध्यवर्ती
नारायण: सरसिजासनसन्निविष्ट: ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्र: ।।



**भोजनमन्त्र: –** सततमशनकाले मातृभूमिं स्मरेयम्
जय जय जननि त्वं मुक्तकण्ठं वदेयम् ।
हितदसुखदमन्नं प्रत्यहं भक्षयेयम्
भवतु बलसमृद्धं राष्ट्रभक्त्यै शरीरम् ।।



**दीपस्तुति: –** दीपज्योति: परब्रह्म दीपज्योतिर्जनार्दन: ।
दीपो हरति पापानि सन्ध्यादीप नमोऽस्तुते ।।

**शान्तिमन्त्र: –** ॐ पूर्णमद: पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।।

Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com




# चित्रपदकोषः ।




## उपयुक्तवस्तूनि ।


पिहितपत्रम्


योजिनी



सन्दंशः



सञ्चिका


मृदुमुद्रा





मूल्याङ्कः



रन्ध्रिका


सान्द्रमुद्रिका


संश्लेषपट्टिका


विद्युत्कोषः



स्मृतिशलाका


तन्त्री



दृश्यफलकम्


अक्षरफलकम्


पाथेयपात्रम्


वस्त्रसूचिः

## वस्त्राणि ।


ऊरुकम्


अर्धोरुकम्


युतकम्


पादस्यूतः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com


धौतवस्त्रम्


शाटिका


राङ्कवम्



स्वेदकः


## खाद्यपदार्थाः ।


रोटिका


शाकम्


सूपः


अवलेहः


पर्पटम्


ओदनम्


पायसम्


कुण्डलिका

## रुचयः ।



आम्ला



कटुः



तिक्तम्



कषायम्



मधुरा



लवणम्





Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com


# क्रियाः ।


स्थगयति



पिदधाति



उद्घाटयति



निमीलयति


ज्वालयति


निर्वापयति


ददाति/यच्छति


गृह्णाति


माति



अन्विष्यति



परीक्षते



चिनोति


पेषयते



वेल्लयति


भर्जयति


परिवेषयति




सङ्कलयति



व्यवकलयति



गुणयति



भाजयति



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com





पञ्चवादनम्
०५.००



पञ्चाधिक–पञ्चवादनम्
०५.०५



दशाधिक–पञ्चवादनम्
०५.१०



सपाद–पञ्चवादनम्
०५.१५



विंशत्यधिक–पञ्चवादनम्
०५.२०



पञ्चविंशत्यधिक–पञ्चवादनम्
०५.२५



सार्ध–पञ्चवादनम्
०५.३०



पञ्चत्रिंशदधिक–पञ्चवादनम्
०५.३५



चत्वारिंशदधिक–पञ्चवादनम्
०५.४०



पादोन–षड्वादनम्
०५.४५



दशोन–षड्वादनम्
०५.५०



पञ्चोन–षड्वादनम्
०५.५५



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## कक्षाया: सोमवासरस्य समयसरणि: ।

(समयसरणिम् उपयुज्य वाक्यानि वदत)

| तासिका | समय: | विषय: |
|---|---|---|
| ० | १२.२० त: १२.३० | प्रार्थना |
| १ | १२.३० त: ०१.१० | मराठीभाषा |
| २ | ०१.१० त: ०१.४५ | गणितम् |
| ३ | ०१.४५ त: ०२.२० | संस्कृतभाषा |
| ४ | ०२.२० त: ०२.५५ | विज्ञानम् |
| | ०२.५५ त: ०३.२५ | मध्य-विराम: |
| ५ | ०३.२५ त: ०४.०० | इतिहास: |
| ६ | ०४.०० त: ०४.३५ | आङ्ग्लभाषा |
| ७ | ०४.३५ त: ०५.१० | भूमिति: |
| ८ | ०५.१० त: ०५.४० | शारीरिकशिक्षणम् |

## दशमीकक्षाया: छात्राणां कृते अभ्यासनियोजनम् ।
## स्वयमध्ययनसमयतालिका ।

| क्रमाङ्क: | विषय: | समय: | अङ्कै: लिखत |
|---|---|---|---|
| १ | गणितम् | प्रात:काले सार्धपञ्चवादनत: दशाधिकषड्वादनपर्यन्तम्। | |
| २ | मराठीभाषा | प्रात:काले विंशत्यधिक-अष्टवादनत: दशाधिकनववादनपर्यन्तम्। | |
| ३ | विज्ञानम् | प्रात:काले सार्धनववादनत: सपाद-दशवादनपर्यन्तम् । | |
| ४ | संस्कृतभाषा | प्रात:काले पञ्चविंशत्यधिक-दशवादनत: एकादशवादनपर्यन्तम्। | |
| ५ | सा. शास्त्रम् | सायङ्काले दशाधिक-सप्तवादनत: दशोन-अष्टवादनपर्यन्तम् । | |
| ६ | आङ्ग्लभाषा | रात्रौ दशाधिक-अष्टवादनत: पादोन-नववादनपर्यन्तम् । | |

### क्रीडत-नन्दत

**सङ्ख्याक्रीडा**

एकं द्वे त्रीणि... इति क्रमेण सर्वे मिलित्वा शतपर्यन्तं सङ्ख्या: वदेयु: । तत: पुन: तदेव आवर्तनीयम्। परन्तु अस्मिन् अवसरे सर्वा: विषमसङ्ख्या: शिक्षक: एव वदेत् । छात्रैस्तु केवलं समसङ्ख्या: वक्तव्या:। अग्रिमे आवर्तने शिक्षक: समसङ्ख्या: वदेत्, बालाश्च विषमसङ्ख्या: वदेयु: । एतेन सङ्ख्याभ्यास: सुष्ठु भवति।

**सङ्ख्यालेखनम्**

छात्राणां गणद्वयं करणीयम् । शिक्षकस्य समीपे कृष्णफलकं भवेत् । शिक्षक: यदा सूचयति तदा प्रतिगणम् एक: क्रीडक: अग्रे आगत्य कृष्णफलकस्य पुरत: तिष्ठेत्। शिक्षक: संस्कृतेन काञ्चित् सङ्ख्यां वदेत् । तौ शीघ्रातिशीघ्रं तां सङ्ख्यां कृष्णफलके लिखेताम् । य: आदौ लिखति तस्मै गणाय एक: अङ्क: दातव्य: । (सङ्ख्यां देवनागरीलिप्या रोमन्-लिप्या वा लेखितुम् अर्हन्ति ।) – क्रीडावल्ली-पुस्तकात् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



# पुनःस्मारणम् ।



## १) वर्णमालाधारितम् –

### अ) उदाहरणद्वयं लिखत ।

१. स्वरौ  २. व्यञ्जने  ३. स्वराश्रितौ  ४. कण्ठ्यौ  ५. तालव्यौ  ६. मूर्धन्यौ
७. दन्त्यौ  ८. ओष्ठ्यौ  ९. अनुनासिके  १०. ह्रस्वस्वरौ  ११. दीर्घस्वरौ

### आ) ह्रस्व–दीर्घ–स्वरान् लिखत ।

| ह्रस्वाः | दीर्घाः |
|---|---|
| अ | |
| | ई |
| उ | |
| | ॠ |

### इ) तालिकां पूरयत ।

| कठोरवर्णाः | | मृदुवर्णाः | | | वर्गः |
|---|---|---|---|---|---|
| क् | | | | ङ् | कण्ठ्यः |
| | छ् | ज् | | | तालव्यः |
| ट् | | ड् | | | मूर्धन्यः |
| | | | ध् | न् | दन्त्यः: |
| प् | | | | | ओष्ठ्यः |

### ई) संयुक्तस्वरान् लिखत ।

अ + इ = ____  अ + ए = ____
अ + उ = ____  अ + ओ = ____

### उ) अनुनासिकं लिखत ।

| वर्गः | अनुनासिकम् |
|---|---|
| कण्ठ्यः | |
| तालव्यः | |
| मूर्धन्यः | |
| दन्त्यः | |
| ओष्ठ्यः | |

### ऊ ) स्वराश्रितौ लिखत ।

| अनुस्वारः | ––– |
|---|---|
| ––– | : |

### ए) आहत्य वर्णान् लिखत ।

| स्वराः | व्यञ्जनानि | वर्णाः |
|---|---|---|
| १३ | + | = |

## २) वासर–तालिकां पूरयत । (अद्य, श्वः . . . . .)

| | | | | | | |
|---|---|---|---|---|---|---|
| ______ रविवासरः | ← ______ सोमवासरः | ← ह्यः ______ | ← अद्य बुधवासरः | → श्वः ______ | → ______ शुक्रवासरः | → ______ शनिवासरः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ३) नामाधारितम् –

### अ) नामद्वयं लिखत ।

अ) अकारान्तस्य ________, ________
आ) आकारान्तस्य ________, ________
इ) इकारान्तस्य ________, ________
ई) ईकारान्तस्य ________, ________
उ) उकारान्तस्य ________, ________
ऊ) ऋकारान्तस्य ________, ________
ए) व्यञ्जनान्तस्य ________, ________
ऐ) स्त्रीलिङ्गस्य ________, ________
ओ) पुंलिङ्गस्य ________, ________
औ) नपुंसकलिङ्गस्य ________, ________

### आ) रिक्तस्थानं पूरयत ।

| प्रातिपदिकम् | अन्त्यम् | लिङ्गम् |
|---|---|---|
| देव | अकारान्तम् | |
| | अकारान्तम् | नपुंसकलिङ्गम् |
| माला | | |
| कवि | | |
| | इकारान्तम् | स्त्रीलिङ्गम् |
| | ईकारान्तम् | स्त्रीलिङ्गम् |
| भानु | | |
| | उकारान्तम् | स्त्रीलिङ्गम् |
| | उकारान्तम् | नपुंसकलिङ्गम् |
| पितृ | | पुंलिङ्गम् |
| मातृ | | |

## ४) धातु–आधारितम् –

१) प्रथम/चतुर्थ/षष्ठ/दशम–गणस्य
प.प./आ.प. धातुद्वयं लिखत । यथा –

| गण: | प.प. | आ.प. |
|---|---|---|
| १ | पठ्, ____ | ____, लभ् |
| ४ | ____, कुप् | मन्, ____ |
| ६ | प्रच्छ्–पृच्छ्, ____ | मृ–म्रिय्, ____ |
| १० | पूज्, ____ | ____, मृग् |

## ५) सङ्ख्या: अक्षरै:/ अङ्कै: लिखत । (एकत: शतं पर्यन्तम् ।)

| अङ्का: | अक्षराणि |
|---|---|
| १५ | |
| २३ | |
| ८० | |
| ६४ | |
| – | षट्त्रिंशत् |
| ८७ | |
| ४२ | |
| ५८ | |
| – | नवसप्तति: |
| – | सप्तनवति: |
| ९१ | |
| ६ | |
| १८ | |
| ३२ | |
| ८८ | |
| ४ | |
| ९९ | |
| ६१ | |
| – | पञ्चाशत् |
| १०० | |




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# प्रथमः पाठः । आद्यकृषकः पृथुवैन्यः ।

ऋग्वेदात् एषा कथा उद्धृता (ऋ.१०.९३.१४) । वेनभूपतेः पुत्रः वैन्यः एव पृथुवैन्यः इति नाम्ना ज्ञातः । सः प्रजाहितदक्षः आदर्शः सम्राट् इति स्मृतः। भारतदेशे पृथुना एव कृषिकार्यं प्रारब्धं, संशोधितं, विकासं प्रति नीतं च। स एव कृषिविद्यायाः जनकः इति मतः। अत एव सः प्रथमः कृषकः। धरित्र्याः 'पृथिवी' इति नामाभिधानं पृथोः कार्यस्य स्मारकम्' इति मन्यते बुधैः।

- भारतदेशे कृषिक्षेत्रस्य वैशिष्ट्यानि कानि ?
- कृषिप्रक्रियाविषये कथयत।



भूपालः पृथुवैन्यः नाम धरायां प्रथमः अभिषिक्तः सम्राट् । प्रयागक्षेत्रे पृथुनृपस्य राजधानी आसीत्। राज्याभिषेकसमये चारणाः पृथुनृपस्य स्तुतिं गातुमुत्सुकाः। तदा पृथुः आज्ञापयत्, ''तिष्ठन्तु चारणाः ! यावत् मम सद्गुणाः न प्रकटीभवन्ति तावदहं न स्तोतव्यः। स्तवनं तु ईश्वरस्यैव भवेत्।'' स्तुतिगायकाः पृथुनृपस्य एतादृशीं निःस्पृहतां ज्ञात्वा प्रसन्नाः अभवन्।

एकदा पृथुराजः स्वराज्ये भ्रमणम् अकरोत् । भ्रमणसमये तेन दृष्टं यत् प्रजाः अतीव कृशाः अशक्ताश्च । ताः प्रजाः पशुवज्जीवन्ति । निकृष्टान्नं खादन्ति । तद् दृष्ट्वा राजा चिन्ताकुलः जातः । तदा पुरोहितोऽवदत्, ''हे राजन्, धनधान्यादि सर्वं वस्तुजातं वस्तुतः वसुन्धरायाः उदर एव वर्तते । तत्प्राप्तुं यतस्व ।''



तदा पृथुभूपेन तदर्थं धनुः सज्जीकृतम्। तदा भूमिः स्त्रीरूपं धृत्वा तस्य पुरतः प्रकटिता अभवत् अवदत् च, ''हे राजेन्द्र! तव पिता दुःशासकः वेनराजः राजधर्मस्य पालनं नाकरोत्। तदा मया चोरलुण्ठकभयात् धनधान्यपुष्पफलानि मम उदरे निहितानि । त्वं तु प्रजाहितदक्षः नृपः । यदि त्वं प्रयत्नेन कृषिकार्यं करोषि तर्हि अहं प्रसन्ना भविष्यामि। अतः धनुः त्यज । खनित्राणि, हलान्, कुद्दालकानि लवित्राणि च हस्ते गृहीत्वा प्रजाजनैः सह कृषिकार्यं कुरु।''

भूमातुः उपदेशं मनसि निधाय पृथुवैन्यः नदीनां मार्गम् अवरुध्य कृषिकार्यार्थं जलस्य उपयोगम् अकरोत्। वृष्टिजलसञ्चयं कृत्वा जलव्यवस्थापनम् अकरोत्। भूमिम् उर्वरतमां कर्तुं प्रायतत। तदनन्तरं तस्मिन् क्षेत्रे जनाः धान्यबीजानि अवपन्। स नैकेभ्यः वृक्षेभ्यः विविधप्रकारकाणां बीजानां सङ्कलनं चयनं च परिश्रमेण




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अकरोत्। अनन्तरं बीजानां संस्करणं कृत्वा वपनम् अकरोत् । पर्जन्यानन्तरं बीजेभ्यः अङ्कुराः उद्भूताः। धान्यलाभेन सर्वे प्रजाजनाः सन्तुष्टाः च अभवन्। एषः कल्याणकारी नृपः पृथिव्यां प्रशासने अग्रणीः जनसेवाव्रती च अभवत्।

**पृथुवैन्यस्य आदर्शभूतानि कार्याणि ।**






## भाषाभ्यासः

**१. पूर्णवाक्येन उत्तरं लिखत।**


अ) चारणाः किमर्थम् उत्सुकाः?
आ) भ्रमणसमये पृथुराजेन किं दृष्टम्?
इ) वसुन्धरायाः उदरे किं वर्तते?
ई) स्त्रीरूपं धृत्वा पृथुनृपस्य पुरतः का प्रकटिता अभवत्?
उ) पृथुवैन्यः कृषिकार्यार्थं जलस्य व्यवस्थापनं कथम् अकरोत्?

**२. माध्यमभाषया उत्तरत।**


अ) भूमाता पृथुवैन्यं किम् उपादिशत्?
आ) धरित्र्याः उपदेशं मनसि निधाय पृथुवैन्यः किं किम् अकरोत्?

**३. जालरेखाचित्रं पूरयत ।**


अ)





आ)




इ)




**४. पाठ्यांशं पठित्वा प्रवाहिजालं पूरयत ।**






Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**५. प्रश्ननिर्माणं कुरुत ।**

अ) प्रयागक्षेत्रे पृथुराजस्य राजधानी आसीत् । आ) प्रजाः पशुवत् जीवन्ति ।

इ) धनधान्यादि सर्वं वस्तुजातं वसुन्धरायाः उदर एव वर्तते ।

ई) पर्जन्यानन्तरं बीजेभ्यः अङ्कुराः उद्भूताः।

**६. सूचनानुसारं कृतीः कुरुत ।**

अ) पृथुवैन्यस्य निःस्पृहतां ज्ञात्वा स्तुतिगायकाः प्रसन्नाः अभवन्। (पूर्वकालवाचक-त्वान्त-अव्ययं निष्कासयत।)

आ) त्वं प्रयत्नेन कृषिकार्यं करोषि । ('त्वं' स्थाने 'भवान्' योजयत।)

इ) त्वं धनुः त्यज । ('त्वं' स्थाने 'भवान्' योजयत।)

ई) भूमातुः उपदेशं मनसि निधाय पृथुवैन्यः कृषिकार्यम् अकरोत् । ('भूमातुः' स्थाने 'भूमि' शब्दस्य योग्यं रूपं लिखत ।)

उ) प्रजाजनैः सह कृषिकार्यं कुरु । (लकारं लिखत ।)

ऊ) अहं प्रसन्ना भविष्यामि । (लृट् स्थाने लिङ् प्रयोगं कुरुत ।)

ए) भूमिः स्त्रीरूपं धृत्वा तस्य पुरतः प्रकटिता अभवत् । (पूर्वकालवाचक-त्वान्त-अव्ययं निष्कासयत।)

**७. मेलनं कुरुत ।**

| **विशेषणम्** | कृशाः | उर्वरा | आनन्दिताः | दुःशासकः | प्रजाहितदक्षः |
|---|---|---|---|---|---|
| **विशेष्यम्** | पृथुः | वेनः | प्रजाः | भूमिः | प्रजाजनाः |

**८. समानार्थकशब्दं लिखत ।** वृक्षः, भूमिः, राजा, धनुः, नदी ।

**९. विरुद्धार्थकशब्दं लिखत ।** स्तुतिः , सद्गुणाः, प्रसन्नाः, अशक्ताः, पुरतः, कृशाः ।

**१०. कः कं वदति ?**

अ) तिष्ठन्तु चारणाः । आ) तत्प्राप्तुं यतस्व । इ) तव पिता दुःशासकः । ई) अतः धनुः त्यज ।

**११. सन्धिविग्रहं कुरुत ।** अ) उदर एव आ) पशुवज्जीवन्ति इ) अशक्ताश्च ई) पुरोहितोऽवदत् ।

**१२. अमरकोषात् शब्दं प्रयुज्य वाक्यं पुनर्लिखत ।**

अ) भूमिः स्त्रीरूपं धृत्वा प्रकटिता ।

आ) भूपालः पृथुवैन्यः नाम धरायाः प्रथमः अभिषिक्तः सम्राट् ।

**क्रीडत-नन्दत ।** **अनन्त्यवाक्यरचना**

प्रथमः बालः एकस्य शब्दस्य कथनेन कस्यचित् वाक्यस्य आरम्भं कुर्यात् । द्वितीयः बालः प्रथमेन बालकेन उक्तं शब्दम् उच्चार्य तस्य वाक्यस्य अनुवर्तनरूपेण स्वयमपि एकं शब्दं योजयेत् । तृतीयः तृतीयम् । चतुर्थः चतुर्थम् एवम् अग्रेऽपि । परन्तु कोऽपि वाक्यस्य समाप्तिं न कुर्यात् । यः तथा करोति सः गणात् बाह्यः भवति । उदा. - - - १. कस्मिंश्चित् - - - २. कस्मिंश्चित् ग्रामे - - - ३. कस्मिंश्चित् ग्रामे कश्चन - - - ४. कस्मिंश्चित् ग्रामे कश्चन कृपणः - - -

अत्र 'आसीत्' इति यदि उच्यते तर्हि वाक्यं समाप्तं भवति । यः तत् कथयति सः बाह्यः भवति। अतः सः केनापि प्रकारेण वाक्यम् अग्रेऽपि अनुवर्तयितुं प्रयत्नं कुर्यात् शिक्षकः किञ्चित् साहाय्यं कर्तुम् अर्हति । **- क्रीडावल्ली-पुस्तकात् ।**

6T2JYG





Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## द्वितीयः पाठः । व्यसने मित्रपरीक्षा ।

हितोपदेशात् स्वीकृता एषा कथा । हितोपदेशस्य कर्ता नारायणपण्डितः। हितोपदेशस्य चत्वारः विभागाः सन्ति । १) मित्रलाभः २) सुहृद्भेदः ३) विग्रहः ४) सन्धिः । ग्रन्थेऽस्मिन् पशुपक्षिणां कथामाध्यमेन नीतिवचनानि बोधितानि ।



अस्ति एकं चम्पकं नाम अरण्यम् । अरण्ये चित्राङ्गो नाम मृगः एकाक्षो नाम काकश्च स्नेहेन निवसतः स्म। एकदा चित्राङ्गः वने भ्रमन् केनापि शृगालेन अवलोकितः । क्षुद्रबुद्धिः नाम सः शृगालः स्वार्थहेतुना मृगेण सह मित्रताम् ऐच्छत्। अस्तङ्गते सवितरि क्षुद्रबुद्धिः मृगेण सह मृगस्य निवासस्थानं गतः । मृगशृगालौ दृष्ट्वा काकोऽवदत्, ''सखे चित्राङ्ग! कोऽयं द्वितीयः ?'' मृगः **अब्रूत**, ''जम्बूकोऽयम्। अस्मत्सख्यम् इच्छति।'' काकः उपादिशत्, ''अकस्मादागन्तुना सह मित्रता न युक्ता।'' तदाकर्ण्य जम्बूकः सकोपम् **आह**, ''मृगस्य प्रथमदर्शने भवानपि अपरिचितः एव आसीत्। यथायं मृगः मम बन्धुः तथा भवानपि।'' मृगः **अब्रवीत्**, ''अलं



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

विवादेन । वयं सर्वे आनन्देन एकत्र निवसामः।'' काकेनोक्तम्, ''एवमस्तु।''

किञ्चित्कालानन्तरं शृगालः मृगम् अवदत्, 'वनेऽस्मिन् एकं सस्यपूर्णक्षेत्रमस्ति। दर्शयामि त्वाम्।' तथा कृते मृगः प्रत्यहं तत्र गत्वा सस्यम् अखादत् । तद् दृष्ट्वा एकस्मिन् दिने क्षेत्रपतिना पाशः योजितः । तत्रागतः मृगः पाशैर्बद्धः । सः अचिन्तयत्, ''इदानीं मित्राण्येव शरणं मम ।'' दूरात् तत् पश्यन् जम्बूकः मनसि आनन्दितः। सोऽचिन्तयत्, ''फलितं मे मनोरथम् । इदानीं प्रभूतं भोजनं प्राप्स्यामि ।'' मृगस्तं दृष्ट्वा **अब्रवीत्**, ''मित्र, छिन्धि तावन्मम बन्धनम् । त्रायस्व माम् ।'' जम्बूको दूरादेवावदत्, ''मित्र, दृढोऽयं बन्धः । स्नायुनिर्मितान् पाशानेतान् कथं वा व्रतदिवसे स्पृशामि?'' इत्युक्त्वा सः समीपमेव वृक्षस्य पृष्ठतः निभृतं स्थितः ।

प्रदोषकाले मृगमन्विष्यन् काकस्तत्रोपस्थितः । मृगं तथाविधं दृष्ट्वा स **उवाच**, ''सखे! किमेतत्?'' मृगेणोक्तम्, ''सुहृद्वाक्यस्य अनादरात् बद्धोऽहम् । उक्तं च –

सुहृदां हितकामानां यः शृणोति न भाषितम् ।
विपत् सन्निहिता तस्य स नरः शत्रुनन्दनः ।।''

काकः **अब्रूत**, ''स वञ्चकः क्वास्ते?'' मृगेणोक्तम्, ''मन्मांसार्थी तिष्ठत्यत्रैव।'' काकः उक्तवान्, ''उपायस्तावत् चिन्तनीयः।''

अथ प्रभाते क्षेत्रपतिर्लगुडहस्तः आगच्छन् काकेनावलोकितः । तमालोक्य काकेनोक्तम्, ''सखे मृग, त्वमात्मानं मृतवत्संदर्शय । वातेनोदरं पूरयित्वा पादान्स्तब्धीकृत्य तिष्ठ । यदाहं शब्दं करोमि तदा त्वमुत्थाय सत्वरं पलायिष्यसे ।'' मृगस्तथैव स्थितः ।

क्षेत्रपतिना मृगः आलोकितः उक्तश्च, ''आः! स्वयं मृतोऽसि!'' सः मृगं बन्धनात् व्यमुञ्चत् । ततः काकशब्दं श्रुत्वा मृगः सत्वरं पलायितः । तमुद्दिश्य क्षेत्रपतिना क्षिप्तेन लगुडेन शृगालस्तावद् हतः ।

## भाषाभ्यासः



### १. पूर्णवाक्येन उत्तरं लिखत।

अ) अरण्ये कौ निवसतः स्म ?

आ) काकः किम् उपादिशत् ?

इ) मृगः प्रत्यहं क्षेत्रं गत्वा किम् अकरोत् ?

ई) क्षुद्रबुद्धिः कुत्र निभृतं स्थितः ?

उ) शृगालः केन हतः ?

### २. कः कं वदति ?

अ) 'वनेऽस्मिन् एकं सस्यपूर्णं क्षेत्रमस्ति ।'

आ) 'मित्र, छिन्धि तावन्मम बन्धनम् ।'

इ) 'स वञ्चकः क्वास्ते ?'

### ३. प्रश्ननिर्माणं कुरुत ।

अ) शृगालः मृगेण सह मित्रताम् ऐच्छत् ।

आ) प्रदोषकाले मृगमन्विष्यन् काकः क्षेत्रे उपस्थितः।

इ) सः वृक्षस्य पृष्ठतः निभृतं स्थितः।

### ४. उत्तरपदं लिखत ।

अ) काकोऽवदत् = काकः + ______ ।

आ) मृगेणोक्तम् = मृगेण + ______ ।

इ) जम्बूकोऽयम् = जम्बूकः + ______ ।

### ५. पूर्वपदं लिखत ।

अ) मृगोऽब्रवीत् = ______ + अब्रवीत् ।

आ) वातेनोदरम् = ______ + उदरम् ।

इ) मृतोऽसि = ______ + असि ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com


## ६. सूचनानुसारं कृती: कुरुत ।

अ) मृग: प्रत्यहं तत्र गत्वा सस्यम् अखादत् । (त्वान्त-अव्ययं निष्कासयत ।)
आ) मित्र छिन्धि तावन्मम बन्धनम् । (लकारं लिखत।)
इ) वयम् आनन्देन एकत्र निवसाम: । (लट्लकारस्थाने लङ्लकारं योजयत ।)
ई) त्वं पादान्स्तब्धीकृत्य तिष्ठ । ('त्वं' स्थाने 'भवान्' योजयत ।)
उ) भवानपि अपरिचित: एव आसीत् । ('भवान्' स्थाने 'त्वं' योजयत ।)
ऊ) त्वं सत्वरं पलायिष्यसे । ('त्वं' स्थाने 'भवान्' योजयत ।)

## ७. स्तम्भमेलनं कुरुत ।

| विशेषणम् | विशेष्यम् |
|---|---|
| दृढ: | लगुडेन |
| क्षिप्तेन | दिने |
| एकस्मिन् | मृग: |
| लगुडहस्त: | बन्ध: |
| | क्षेत्रपति: |

## ८. जालरेखाचित्रं पूरयत ।




## ९. तालिकां पूरयत ।

| वक्त्रा संवादं मेलयत | |
|---|---|
| जम्बूक: | मृग: |
| | |
| | |

(मञ्जूषा - त्रायस्व माम्, दर्शयामि त्वाम्, दृढोऽयं बन्ध:, छिन्धि मम बन्धनम्)

| वक्त्रा संवादं मेलयत | |
|---|---|
| मृग: | काक: |
| | |
| | |

(मञ्जूषा - अलं विवादेन, कोऽयं द्वितीय:?, एवमस्तु, अस्मत्सख्यम् इच्छति ।)

## १०. माध्यमभाषया उत्तरत ।

अ) 'स नर: शत्रुनन्दन:' इति वचनं कथाया: आधारेण स्पष्टीकुरुत ।
आ) काकेन क: उपाय: उक्त : ?

## ११. अमरकोषात् समानार्थकं शब्दं योजयित्वा वाक्यं पुनर्लिखत ।

अ) अरण्ये मृग: काक: च स्नेहेन निवसत: । आ) जम्बूक: तेन सह मृगस्य निवासस्थानं गत: ।
इ) मृगमन्विष्यन् काक: तत्र उपस्थित: ।

## १२. विरुद्धार्थकशब्दं लिखत ।

दृढ:, मैत्री, बद्ध:, प्रभूतम् ।

**उपक्रम :**

१. पाठात् उपपदविभक्तियुक्तानि वाक्यानि चित्वा लिखत ।

२. पाठात् शतृरूपाणि चित्वा लिखत ।

722BSL



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## तृतीयः पाठः  सूक्तिसुधा। (कण्ठस्थीकरणार्थम्)

सूक्तयः नाम सुवचनानि । सूक्तीनां पठनेन वाक्चातुर्यं वर्धते । सूक्तीनां प्रयोगः लेखने भाषणे च प्रभावं जनयति । उक्तमेव–

खिन्नं चापि सुभाषितेन रमते स्वीयं मनः सर्वदा
श्रुत्वान्यस्य सुभाषितं खलु मनः श्रोतुं पुनर्वाञ्छति ।
अज्ञान् ज्ञानवतोऽप्यनेन हि वशीकर्तुं समर्थो भवेत्
**कर्तव्यो हि सुभाषितस्य मनुजैरावश्यकः सङ्ग्रहः ।।**

**वृत्तम् – शार्दूलविक्रीडितम्**

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतम्
विद्या राजसु पूज्यते न तु धनं **विद्याविहीनः पशुः**।।१।। –नीतिशतकात्

सन्धिविग्रहाः – १) रूपमधिकम् = रूपम् + अधिकम् । २) बन्धुजनो विदेशगमने = बन्धुजनः + विदेशगमने ।

अन्वयः – विद्या नाम नरस्य अधिकं रूपम्, प्रच्छन्नगुप्तं धनम्, विद्या भोगकरी यशःसुखकरी (च) । विद्या गुरूणां गुरुः । विदेशगमने विद्या बन्धुजनः । विद्या परं दैवतम् । विद्या राजसु पूज्यते न तु धनम्। विद्याविहीनः पशुः (एव) ।

**वृत्तम् – वसन्ततिलका**

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
**न्याय्यात्पथः प्रविचलन्ति पदं न धीराः**।।२।। –नीतिशतकात्

सन्धिविग्रहाः – १) नीतिनिपुणा यदि = नीतिनिपुणाः + यदि २) अद्यैव = अद्य + एव ।
३) मरणमस्तु = मरणम् + अस्तु । ४) न्याय्यात्पथः = न्याय्यात् + पथः ।

अन्वयः – यदि (अपि) नीतिनिपुणाः निन्दन्तु स्तुवन्तु वा, लक्ष्मीः समाविशतु यथेष्टं गच्छतु वा, मरणम् अद्य एव अस्तु युगान्तरे वा, (तथापि) धीराः न्याय्यात् पथः पदं न प्रविचलन्ति ।

**वृत्तम्– अनुष्टुप्**

आत्मनो मुखदोषेण बध्यन्ते शुकसारिकाः।
बकास्तत्र न बध्यन्ते **मौनं सर्वार्थसाधनम्**।।३।। –पञ्चतन्त्रात्

सन्धिविग्रहाः – १) आत्मनो मुखदोषेण = आत्मनः + मुखदोषेण । २) बकास्तत्र = बकाः + तत्र।

अन्वयः – शुकसारिकाः आत्मनः मुखदोषेण बध्यन्ते । तत्र बकाः न बध्यन्ते । (यतः) मौनं सर्वार्थसाधनम् ।

**वृत्तम् – शिखरिणी**

रथस्यैकं चक्रं भुजगयमिताः सप्त तुरगाः
निरालम्बो मार्गश्चरणविकलः सारथिरपि।
रविर्यात्येवान्तं प्रतिदिनमपारस्य नभसः
**क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे**।।४।। –भोजप्रबन्धात्

सन्धिविग्रहाः – १) रथस्यैकम् = रथस्य + एकम् । २) मार्गश्चरणविकलः = मार्गः + चरणविकलः ।
३) सारथिरपि = सारथिः + अपि । ४) रविर्यात्येवान्तम् = रविः + याति + एव + अन्तम् ।
५) प्रतिदिनमपारस्य = प्रतिदिनम् + अपारस्य । ६) नोपकरणे = न + उपकरणे ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अन्वय: – रथस्य एकं चक्रं, सप्त भुजगयमिता: तुरगा:, निरालम्ब: मार्ग:, सारथि: अपि चरणविकल:, (तथापि) रवि: प्रतिदिनम् अपारस्य नभस: अन्तं याति एव । महतां क्रियासिद्धि: सत्त्वे भवति, उपकरणे न (भवति) ।

**वृत्तम्–अनुष्टुप्**

अल्पानामपि वस्तूनां **संहति: कार्यसाधिका**।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिन: ।।५।। – हितोपदेशात्

सन्धिविग्रहा: – १) अल्पानामपि = अल्पानाम् + अपि ।
२) तृणैर्गुणत्वमापन्नैर्बध्यन्ते = तृणै: + गुणत्वम् + आपन्नै: + बध्यन्ते ।

अन्वय: – अल्पानां वस्तूनाम् अपि संहति: कार्यसाधिका (विद्यते) । (यथा) गुणत्वम् आपन्नै: तृणै: मत्तदन्तिन: (गजा:) बध्यन्ते ।

**वृत्तम्–मालिनी**

प्रथमवयसि पीतं तोयमल्पं स्मरन्त:
शिरसि निहितभारा नारिकेला नराणाम् ।
ददति जलमनल्पास्वादमाजीवितान्तं
**न हि कृतमुपकारं साधवो विस्मरन्ति** ।।६।। – विक्रमचरितात्

सन्धिविग्रहा: – १) तोयमल्पम् = तोयम् + अल्पम् । २) कृतमुपकारम् = कृतम् + उपकारम् ।
३) साधवो विस्मरन्ति = साधव: + विस्मरन्ति ।
४) जलमनल्पास्वादमाजीवितान्तम् = जलम् + अनल्पास्वादम् + आजीवितान्तम् ।
५) निहितभारा नारिकेला नराणाम् = निहितभारा: + नारिकेला: + नराणाम्

अन्वय: – प्रथमवयसि पीतम् अल्पं तोयं स्मरन्त: शिरसि निहितभारा: नारिकेला: आजीवितान्तं नराणां (नरेभ्य:) अनल्पास्वादं जलं ददति । साधव: कृतम् उपकारं न हि विस्मरन्ति।

**वृत्तम्–अनुष्टुप्**

घटं भिन्द्यात् पटं छिन्द्यात् कुर्याद्रासभरोहणम् ।
**येन केन प्रकारेण** प्रसिद्ध: पुरुषो भवेत् ।।७।। –हास्योक्ति:

सन्धिविग्रहा: – १) कुर्याद्रासभरोहणम् = कुर्यात् + रासभरोहणम् । २) पुरुषो भवेत् = पुरुष: + भवेत् ।

अन्वय: – पुरुष: घटं भिन्द्यात्, पटं छिन्द्यात्, रासभरोहणं (अपि) कुर्यात् । येन केन प्रकारेण (स:) प्रसिद्ध: भवेत् ।

## भाषाभ्यास:



**श्लोक: १**

**१. पूर्णवाक्येन उत्तरत।**

अ) का गुरूणां गुरु: ?
आ) किं राजसु न पूज्यते ?
इ) क: पशु: एव ?

**२. माध्यमभाषया उत्तरत ।**

अ) ‘विद्या नाम नरस्य’ . . . इति श्लोकाधारेण विद्याया: महत्त्वं लिखत ।

**३. जालरेखाचित्रं पूरयत ।**

विद्या →
- प्रच्छन्नगुप्तं ________ ।
- गुरूणां ________ ।
- परं ________ ।
- नरस्य अधिकं ________ ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**श्लोकः २.**

**१. मञ्जूषातः उचितं शब्दं चित्वा तालिकां पूरयत ।**

| | | | |
|---|---|---|---|
| नीतिनिपुणाः | ______ | ______ | वा |
| ______ | समाविशतु | ______ | वा |
| ______ | अद्यैव | ______ | वा |

(निन्दन्तु, गच्छतु, युगान्तरे, मरणम्, लक्ष्मीः, स्तुवन्तु ।)

**२. सन्धिविग्रहं कुरुत ।**

अ) मरणमस्तु । आ) अद्यैव ।

**३. माध्यमभाषया उत्तरत ।**

''न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ।' इति सूक्तिं स्पष्टीकुरुत।

**श्लोकः ३.**

**१. पूर्णवाक्येन उत्तरत ।**

अ) शुकसारिकाः केन बध्यन्ते ?

आ) के न बध्यन्ते ?

**२. सन्धिविग्रहं कुरुत ।**

अ) बकास्तत्र आ) आत्मनो मुखदोषेण

**श्लोकः ४.**

**१. पूर्णवाक्येन उत्तरत ।**

अ) रवेः रथस्य कति तुरगाः सन्ति ?

आ) रवेः सारथिः कीदृशः अस्ति ?

**२. सन्धिविग्रहं कुरुत ।**

अ) रथस्यैकम् । आ) सारथिरपि ।

**३. मञ्जूषातः शब्दं चित्वा तालिकां पूरयत ।**

| | |
|---|---|
| निरालम्बः | ______ |
| ______ | तुरगाः |
| चरणविकलः | ______ |
| ______ | चक्रम् |

(मार्गः, सारथिः, एकम्, सप्त ।)

**४. जालरेखाचित्रं पूरयत ।**

रथस्य एकं ______ ।

______ मार्गः ।

रवेः
क्रियासिद्धौ प्रत्यूहाः

______ सप्त तुरगाः ।

चरणविकलः ______।

**४. माध्यमभाषया उत्तरत ।**

'क्रियासिद्धिः सत्त्वे भवति' इति सूर्यस्य उदाहरणेन स्पष्टीकुरुत ।

**श्लोकः ५.**

**१. पूर्णवाक्येन उत्तरत ।**

अ) का कार्यसाधिका भवति ?

आ) कैः मत्तदन्तिनः बध्यन्ते ?

**२. सन्धिविग्रहं कुरुत ।**

अ) अल्पानामपि आ) तृणैर्गुणत्वमापन्नैर्बध्यन्ते

**३. माध्यमभाषया उत्तरत ।**

'संहतिः कार्यसाधिका' इति सूक्तिं स्पष्टीकुरुत ।

**श्लोकः ६.**

**१. पूर्णवाक्येन उत्तरत।**

अ) साधवः किं न विस्मरन्ति ?

आ) नारिकेलाः किं स्मरन्ति ?

इ) नारिकेलाः भारं कुत्र वहन्ति ?

**२. माध्यमभाषया उत्तरत ।**

नारिकेलाः नराणाम् उपकारं कथं स्मरन्ति ?

**श्लोकः ७.**

**१. एकवाक्येन उत्तरत।**

अ) नरः किं छिन्द्यात् ?

आ) मनुजः किं भिन्द्यात् ?

**२. श्लोकात् लिङ्लकारस्य रूपाणि चित्वा लिखत ।**

**३. माध्यमभाषया उत्तरत ।**

'येन केन प्रकारेण' इति उक्तिं स्पष्टीकुरुत ।

**१. समानार्थकशब्दान् लिखत ।**

विद्या, पशुः, धनम्, लक्ष्मीः, शुकः, तुरगः, नभः, रविः, संहतिः, दन्ती, तोयम्, शिरः, साधवः, पटम्, रासभः ।

**२. विरुद्धार्थकशब्दान् लिखत ।**

विदेशः, प्रच्छन्नम्, निन्दन्तु, अल्पम्, उपकारः, साधवः, रोहणम् ।

72B7U9



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अभ्यासपत्रम् १



(१, २, ३ पाठानाम् आधारेण)

**१. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत ।**

अ) स्तवनं तु मानवस्यैव भवेत् ।

आ) पृथुराज: प्रजाहितदक्ष: नृप: ।

इ) अकस्मात् आगन्तुना सह मैत्री युक्ता ।

ई) क्षेत्रपति: मृगं बन्धनात् व्यमुञ्चत् ।

**२. उचितं पर्यायं चित्वा लिखत ।**

अ) शृगाल: स्वार्थहेतुना ________ सह मैत्रम् ऐच्छत् । (मृगेण/काकेन)

आ) फलितं मे ________ । (प्रयोजनम्/मनोरथम्)

इ) ________ बीजेभ्य: अङ्कुरा: उद्भूता: । (पर्जन्यानन्तरम्/शीतकालानन्तरम्)

ई) प्रजा: अतीव ________ आसन् । (कृशा:/सुदृढा:)

**३. क्रमेण योजयत ।**

अ) १. नदीमार्गस्य अवरोधनम् ।
   २. भूमे: उर्वरीकरणम् ।
   ३. जलव्यवस्थापनम् ।
   ४. क्षेत्रे बीजानां वपनम् ।

आ) १. भ्रमणसमये तेन दृष्टं यत् प्रजा: अतीव कृशा: अशक्ता: च ।
   २. पुरोहितेन उपाय: कथित: ।
   ३. तत् दृष्ट्वा राजा चिन्ताकुल: जात: ।
   ४. एकदा पृथुराज: स्वराज्ये भ्रमणम् अकरोत् ।

इ) १. पुरोहितस्य उपदेशकथनम् ।
   २. पृथुभूपस्य धनु: सज्जीकरणम् ।
   ३. भूमे: कृषिकार्यस्य उपदेशनम् ।
   ४. भूमे: स्त्रीरूपं धृत्वा प्रकटनम् ।

ई) १. मृगकाकयो: स्नेहेन निवास: ।
   २. काकस्य उपदेश:
   ३. मृगकाकशृगालानाम् एकत्र निवास: ।
   ४. शृगालस्य मृगेण सह मित्रता ।

उ) १. क्षेत्रपतिना पाशयोजनम् ।
   २. शृगालेन मृगाय सस्यपूर्णक्षेत्रस्य दर्शनम् ।
   ३. मृगस्य पाशबन्धनम् ।
   ४. मृगस्य प्रत्यहं क्षेत्रं गमनम् ।

ऊ) १. मृग: पाशैर्बद्ध: ।
   २. मृग: सस्यम् अखादत् ।
   ३. जम्बूक: मनसि आनन्दित: ।
   ४. क्षेत्रपतिना पाश: योजित: ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**४. रिक्तस्थानानि पूरयित्वा अन्वयं पुनर्लिखत ।**

अ) पुरुषः ________ भिन्द्यात् ________ छिन्द्यात् रासभरोहणं कुर्यात् ।
येन केन ________ (सः) ________ पुरुषः भवेत् ।

आ) ________ आत्मनः ________ बध्यन्ते । तत्र ________ न बध्यन्ते ।
(यतः) ________ सर्वार्थसाधनम् ।

**५. समासविग्रहं कुरुत ।**

चिन्ताकुलः, धनधान्यपुष्पफलानि, चोरलुण्ठकभयम्, प्रजाहितदक्षः, जलव्यवस्थापनम्, विविधबीजानि, कल्याणकारी, क्षुद्रबुद्धिः, मृगशृगालौ, अपरिचितः, क्षेत्रपतिः, लगुडहस्तः, विद्याविहीनः, नीतिनिपुणाः, शुकसारिकाः, भुजगयमिताः, चरणविकलः, क्रियासिद्धिः, सकोपम्, प्रयागक्षेत्रम्

**६. उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।**

अ) पृथुवैन्यः स्वप्रजाः दृष्ट्वा चिन्ताकुलः जातः यतः ________________ ।
१. तस्य प्रजाजनाः परस्परं वादविवादं कुर्वन्ति । २. तस्य प्रजाजनाः पशुवत् जीवन्ति ।

आ) भूम्या धनधान्यपुष्पफलानि स्व-उदरे निहितानि यतः ________________ ।
१. वेनभूपः दुःशासकः आसीत् । २. भूमिः स्वभावेन कृपणा आसीत् ।

इ) पृथुभूपेन स्वधनुः सज्जीकृतम् यतः ________________ ।
१. सः शत्रुं हन्तुम् इच्छति स्म । २. सः धनधान्यादि सर्वं वस्तुजातं वसुन्धरायाः प्राप्तुम् इच्छति स्म ।

ई) पृथुभूपस्य प्रजाजनाः सन्तुष्टाः अभवन् यतः ________________ ।
१. ते प्रभूतं धान्यम् अलभन्त । २. ते प्रभूतं सुवर्णम् अलभन्त ।

उ) शृगालः मृगेण सह सख्यम् इच्छति यतः ________________ ।
१. शृगालः मृगमांसं खादितुम् इच्छति । २. शृगालः मृगे स्निह्यति ।

ऊ) जम्बूकः मनसि आनन्दितः यतः ________________ ।
१. मृगः पाशे बद्धः । २. जम्बूकस्य अन्येन सह मित्रता अभवत् ।

ए) क्षेत्रपतिः मृगं बन्धनात् व्यमुञ्चत् यतः ________________ ।
१. सः 'मृगः मृतः' इति चिन्तितवान् । २. पाशबद्धं मृगं दृष्ट्वा तस्य हृदयं करुणया अद्रवत् ।

**पठत-बोधत**

**समस्यापूर्तिः**

विजेतव्या लङ्का चरणतरणीयो जलनिधिर्
विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः ।
तथाप्येको रामः सकलमवधीद्राक्षसकुलं
**क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे** ॥

**क्रीडत-नन्दत**

**खादामि**

शिक्षकः खाद्यवस्तूनां नामानि क्रमशः वदेत् यथा फलम्, ओदनम्, पायसम् ................ । सः एकैकं नाम यदा वदति तदा क्रीडकाः सर्वेऽपि हस्तम् उत्तोल्य 'खादामि' इति उच्चैः वदेयुः। शिक्षकः मध्ये मध्ये कदाचित् खाद्यवस्तूनां नामानि विहाय अन्यवस्तूनां नाम उच्चारयेत्। यथा ................ उत्पीठिका, पुस्तकम् इत्येवम् । तदा तु क्रीडकः 'खादामि' इति वदति हस्तोत्तोलनं वा करोति तर्हि सः गणात् बाह्यः भवति । **- क्रीडावल्ली-पुस्तकात् ।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



# व्यञ्जनान्ताः ।



### शब्दसृष्टिं पश्यत ☺

**अमर्त्यः**

| | | |
|---|---|---|
| निर्जरः |  | त्रिदशः |
| अमरः | | विबुधः |
| देवः | | सुरः |
| प्रभुः | | भगवान् |

**आदित्यः**

| | | |
|---|---|---|
| मित्रः |  | रविः |
| दिनकरः | | भास्करः |
| दिवाकरः | | चण्डांशुः |
| सूर्यः | | भास्वान् |

| 'वत्' – प्रत्ययान्ताः | 'मत्' – प्रत्ययान्ताः |
|---|---|
| भगवान् | श्रीमान् |
| भास्वान् | शक्तिमान् |
| विद्यावान् | बुद्धिमान् |
| गुणवान् | आयुष्मान् |
| ज्ञानवान् | हनुमान् |
| कलावान् | कीर्तिमान् |

वत्/मत् प्रत्ययः स्वामित्वं दर्शयति।
एते वत्/मत् प्रत्ययान्ताः ।


**एतान् व्यञ्जनान्तान् अवगच्छत ।**



शिरः
(शिरस्)



अध्वा
(अध्वन्)



व्योम
(व्योमन्)



पक्षी
(पक्षिन्)



ब्रह्मा
(ब्रह्मन्)



हिमवान्
(हिमवत्)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## भाषासूत्रम् – १

| अन्तम् | पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| सकारान्ता: | चन्द्रमस् | अप्सरस् | पयस् |
| तकारान्ता: | मरुत् | तडित् | जगत् |
| वत्/मत्-प्रत्ययान्ता: | भगवत्/श्रीमत् | ई प्रत्ययं योजयित्वा नदी-शब्दवत् रूपाणि। | जगत् – शब्दवत् |
| इन्नन्ता: | शशिन् | यथा भगवती, श्रीमती, शशिनी, योगिनी | भाविन् |
| अन्नन्ता: | राजन्/आत्मन् | – | नामन्/वर्त्मन् |
| चकारान्ता: | पयोमुच् | वाच् | – |
| जकारान्ता: | वणिज् | स्रज् | – |
| शकारान्ता: | – | दिश् | – |

**भगवत् – वत्प्रत्ययान्तं विशेषणं पुंलिङ्गम् । श्रीमत् – मत्प्रत्ययान्तं विशेषणं पुंलिङ्गम् ।**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| भगवान् | भगवन्तौ | भगवन्त: | प्रथमा | श्रीमान् | श्रीमन्तौ | श्रीमन्त: |
| भगवन्तम् | भगवन्तौ | भगवत: | द्वितीया | श्रीमन्तम् | श्रीमन्तौ | श्रीमत: |
| भगवता | भगवद्भ्याम् | भगवद्भि: | तृतीया | श्रीमता | श्रीमद्भ्याम् | श्रीमद्भि: |
| भगवते | भगवद्भ्याम् | भगवद्भ्य: | चतुर्थी | श्रीमते | श्रीमद्भ्याम् | श्रीमद्भ्य: |
| भगवत: | भगवद्भ्याम् | भगवद्भ्य: | पञ्चमी | श्रीमत: | श्रीमद्भ्याम् | श्रीमद्भ्य: |
| भगवत: | भगवतो: | भगवताम् | षष्ठी | श्रीमत: | श्रीमतो: | श्रीमताम् |
| भगवति | भगवतो: | भगवत्सु | सप्तमी | श्रीमति | श्रीमतो: | श्रीमत्सु |
| हे भगवन् | हे भगवन्तौ | हे भगवन्त: | सम्बोधनम् | हे श्रीमन् | हे श्रीमन्तौ | हे श्रीमन्त: |

भगवत् इव अन्ये शब्दा:- क्षमावत्, हिमवत्, बलवत्, दयावत्, हनुमत्, बुद्धिमत्, शक्तिमत् इत्यादय: ।
गतवत्, पठितवत्, दृष्टवत्, नीतवत् इत्यादीनि कर्तरि भू.धा. विशेषणानि 'भगवत्' शब्दवत् प्रपद्यन्ते ।

- शशिन् = शश-इन् (इन् प्रत्यय: स्वामित्वं दर्शयति) 'शश:' नाम शशक: । शश: यस्य (अङ्के) अस्ति स: शशी।

**शशिन् – इन्नन्तं विशेषणं पुंलिङ्गम् । भाविन् – इन्नन्तं विशेषणं नपुंसकलिङ्गम् ।**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| शशी | शशिनौ | शशिन: | प्रथमा | भावि | भाविनी | भावीनि |
| शशिनम् | शशिनौ | शशिन: | द्वितीया | भावि | भाविनी | भावीनि |
| शशिना | शशिभ्याम् | शशिभि: | तृतीया | भाविना | भाविभ्याम् | भाविभि: |
| शशिने | शशिभ्याम् | शशिभ्य: | चतुर्थी | भाविने | भाविभ्याम् | भाविभ्य: |
| शशिन: | शशिभ्याम् | शशिभ्य: | पञ्चमी | भाविन: | भाविभ्याम् | भाविभ्य: |
| शशिन: | शशिनो: | शशिनाम् | षष्ठी | भाविन: | भाविनो: | भाविनाम् |
| शशिनि | शशिनो: | शशिषु | सप्तमी | भाविनि | भाविनो: | भाविषु |
| हे शशिन् | हे शशिनौ | हे शशिन: | सम्बोधनम् | हे भाविन्/ भावि | हे भाविनी | हे भावीनि |

शशिन् इव अन्ये शब्दा:- स्वामिन्, प्राणिन्, विद्यार्थिन्, शाखिन्, योगिन्, संन्यासिन्, वाजिन्, श्रेष्ठिन् इत्यादय: ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| चन्द्रः | शशिन् |
|---|---|
| **चन्द्रः** गगने वर्तते । रात्रौ वयं **चन्द्रं** पश्यामः । | यथा– **शशी** गगने वर्तते । रात्रौ वयं ____पश्यामः । |
| **चन्द्रेण** एव निशायाः शोभा वर्धते । | _____ एव निशायाः शोभा वर्धते । |
| **चन्द्राय** सर्वे स्पृहयन्ति । | _____ सर्वे स्पृहयन्ति । |
| **चन्द्रात्** मानवाः प्रकाशं लभन्ते । | _____ मानवाः प्रकाशं लभन्ते । |
| सुधांशुः शशाङ्कः, चन्द्रमाः इत्येतानि | सुधांशुः शशाङ्कः, चन्द्रमाः इत्येतानि |
| **चन्द्रस्य** अन्यानि नामानि । | _____ अन्यानि नामानि । |
| **चन्द्रे** कलङ्काः अपि सन्ति । | _____ कलङ्काः अपि सन्ति । |
| हे **चन्द्र**, मह्यं मनःसामर्थ्यं यच्छ । | हे _____, मह्यं मनःसामर्थ्यं यच्छ । |



**आत्मन् – अन्नन्तं पुंलिङ्गं नाम ।** **राजन् – अन्नन्तं पुंलिङ्गं नाम ।**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| आत्मा | आत्मानौ | आत्मानः | प्रथमा | राजा | राजानौ | राजानः |
| आत्मानम् | आत्मानौ | आत्मनः | द्वितीया | राजानम् | राजानौ | राज्ञः |
| आत्मना | आत्मभ्याम् | आत्मभिः | तृतीया | राज्ञा | राजभ्याम् | राजभिः |
| आत्मने | आत्मभ्याम् | आत्मभ्यः | चतुर्थी | राज्ञे | राजभ्याम् | राजभ्यः |
| आत्मनः | आत्मभ्याम् | आत्मभ्यः | पञ्चमी | राज्ञः | राजभ्याम् | राजभ्यः |
| आत्मनः | आत्मनोः | आत्मनाम् | षष्ठी | राज्ञः | राज्ञोः | राज्ञाम् |
| आत्मनि | आत्मनोः | आत्मसु | सप्तमी | राज्ञि, राजनि | राज्ञोः | राजसु |
| हे आत्मन् | हे आत्मानौ | हे आत्मानः | सम्बोधनम् | हे राजन् | हे राजानौ | हे राजानः |

**जन्मन् – अन्नन्तं नपुंसकलिङ्गं नाम ।** **नामन् – अन्नन्तं नपुंसकलिङ्गं नाम ।**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| जन्म | जन्मनी | जन्मानि | प्रथमा | नाम | नामनी–नाम्नी | नामानि |
| जन्म | जन्मनी | जन्मानि | द्वितीया | नाम | नामनी–नाम्नी | नामानि |
| जन्मना | जन्मभ्याम् | जन्मभिः | तृतीया | नाम्ना | नामभ्याम् | नामभिः |
| जन्मने | जन्मभ्याम् | जन्मभ्यः | चतुर्थी | नाम्ने | नामभ्याम् | नामभ्यः |
| जन्मनः | जन्मभ्याम् | जन्मभ्यः | पञ्चमी | नाम्नः | नामभ्याम् | नामभ्यः |
| जन्मनः | जन्मनोः | जन्मनाम् | षष्ठी | नाम्नः | नाम्नोः | नाम्नाम् |
| जन्मनि | जन्मनोः | जन्मसु | सप्तमी | नाम्नि/नामनि | नाम्नोः | नामसु |
| हे जन्म | हे जन्मनी | हे जन्मानि | सम्बोधनम् | हे नामन्/ नाम | हे नामनी/ नाम्नी | हे नामानि |

'आत्मन्'– अनुसारम् – महात्मन्, अध्वन्, यज्वन्, **ब्रह्मन्**, अश्मन् इत्यादीनि ।

'राजन्' – अनुसारम् – ग्रावन्, मूर्धन्, महिमन्, गरिमन्, लघिमन्, सीमन् (स्त्री.), **प्रेमन्** इत्यादीनि ।

'जन्मन्' – अनुसारम् – कर्मन्, वर्त्मन्, भस्मन्, **ब्रह्मन्**, सद्मन् इत्यादीनि ।

'नामन्' – अनुसारम् – हेमन्, व्योमन्, **प्रेमन्**, सामन्, दामन्, धामन्, लोमन् इत्यादीनि ।

*** ब्रह्मन् तथा प्रेमन् – पुंलिङ्गे नपुंसकलिङ्गे च वर्तेते ।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**वाच् – चकारान्तं स्त्रीलिङ्गं नाम ।** **दिश् – शकारान्तं स्त्रीलिङ्गं नाम ।**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| वाक्/वाग् | वाचौ | वाचः | प्रथमा | दिक्/दिग् | दिशौ | दिशः |
| वाचम् | वाचौ | वाचः | द्वितीया | दिशम् | दिशौ | दिशः |
| वाचा | वाग्भ्याम् | वाग्भिः | तृतीया | दिशा | दिग्भ्याम् | दिग्भिः |
| वाचे | वाग्भ्याम् | वाग्भ्यः | चतुर्थी | दिशे | दिग्भ्याम् | दिग्भ्यः |
| वाचः | वाग्भ्याम् | वाग्भ्यः | पञ्चमी | दिशः | दिग्भ्याम् | दिग्भ्यः |
| वाचः | वाचोः | वाचाम् | षष्ठी | दिशः | दिशोः | दिशाम् |
| वाचि | वाचोः | वाक्षु | सप्तमी | दिशि | दिशोः | दिक्षु |
| हे वाक्/वाग् | हे वाचौ | हे वाचः | सम्बोधनम् | हे दिक्/दिग् | हे दिशौ | हे दिशः |

'वाच्' शब्दवत्– त्वच् (स्त्री.), पयोमुच् (पुं.) इत्यादयः । 'दिश्' शब्दवत्– दृश् इत्यादयः ।

**वणिज् – जकारान्तं पुंलिङ्गं नाम ।** **स्रज् – जकारान्तं स्त्रीलिङ्गं नाम ।**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| वणिक्/ग् | वणिजौ | वणिजः | प्रथमा | स्रक्/ग् | स्रजौ | स्रजः |
| वणिजम् | वणिजौ | वणिजः | द्वितीया | स्रजम् | स्रजौ | स्रजः |
| वणिजा | वणिग्भ्याम् | वणिग्भिः | तृतीया | स्रजा | स्रग्भ्याम् | स्रग्भिः |
| वणिजे | वणिग्भ्याम् | वणिग्भ्यः | चतुर्थी | स्रजे | स्रग्भ्याम् | स्रग्भ्यः |
| वणिजः | वणिग्भ्याम् | वणिग्भ्यः | पञ्चमी | स्रजः | स्रग्भ्याम् | स्रग्भ्यः |
| वणिजः | वणिजोः | वणिजाम् | षष्ठी | स्रजः | स्रजोः | स्रजाम् |
| वणिजि | वणिजोः | वणिक्षु | सप्तमी | स्रजि | स्रजोः | स्रक्षु |
| हे वणिक्/ग् | हे वणिजौ | हे वणिजः | सम्बोधनम् | हे स्रक्/ग् | हे स्रजौ | हे स्रजः |

'वणिज्' शब्दवत् – ऋत्विज्, भिषज् इत्यादयः ।

## जिज्ञासापत्रम्



**१) स्तम्भपूरणं कुरुत ।**

| * | | स्वरान्तम् | | व्यञ्जनान्तम् | |
|---|---|---|---|---|---|
| चित्रम् | | प्रातिपदिकम् | प्रथमा ए.व. | प्रातिपदिकम् | प्रथमा ए.व. |
| १. |  | नृप | | राजन्, भूभृत्, क्ष्माभृत्, महीक्षित् | |
| २. |  | जलद | | पयोमुच् | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**२) चतुर्थपदं लिखत**

अ) वाणी – वाण्या :: वाच् – ______ ।
आ) जल – जलात् :: पयस् – ______ ।
इ) प्राज्ञ – प्राज्ञान् :: धीमत् – ______ ।
ई) नदी – नदीनाम् :: सरित् – ______ ।

**३) वाक्यार्थमेलनं कुरुत ।**

| | |
|---|---|
| अ) भूभृत् पृथिवीं रक्षति । | अ) गीर्वाणवाणी देवभाषा । |
| आ) व्योम्नि विहायस: विहरन्ति । | आ) विश्वं भगवता सृष्टम् । |
| इ) संस्कृतवाग् विबुधभारती । | इ) आकाशे खगा: उड्डयन्ते । |
| ई) श्रीकृष्णस्य मस्तके मुकुटं भाति । | ई) गोविन्दस्य मूर्ध्नि किरीटं विराजते । |
| उ) जगत् ईश्वरेण निर्मितम् । | उ) राजा मेदिनीं प्रतिपालयति । |

**४) तालिकां पूरयत ।**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ति: |
|---|---|---|---|
| १. हेम | ______/______ | ______ | प्रथमा |
| २. ______ | विद्यावन्तौ | ______ | द्वितीया |
| ३. ______ | त्वग्भ्याम् | ______ | तृतीया |
| ४. ______ | ब्रह्मभ्याम् (पुं.) | ______ | चतुर्थी |
| ५. भिषज: | ______ | ______ | पञ्चमी |
| ६. ग्राव्ण: | ______ | ______ | षष्ठी |
| ७. ______ | ______ | योगिषु | सप्तमी |
| ८. ______ | ______ | हनुमन्त: | सम्बोधनम् |

**५) योग्यं रूपं योजयत ।**

अ) सीता ______ रत्नहारं यच्छति । (हनुमत्)
आ) तारका: ______ शोभन्ते । (व्योमन्)
इ) प्रजापालनं ______ कर्तव्यम् । (राजन्)
ई) मम मित्रस्य ______ नसीर: । (नामन्)
उ) हे ______, किं करवाणि ? (स्वामिन्)

**पठत–बोधत–कण्ठस्थीकुरुत ।**

**कारकाणि**

१कर्ता २कर्म च ३करणं ४सम्प्रदानं तथैव च ।
५अपादान–६अधिकरणमित्याहु: कारकाणि षट् ।।

**शब्दानुक्रमणिका**

१रामो २हरि: ३करी ४भूभृद् ५भानु: ६कर्ता च ७चन्द्रमा: ।
८तस्थिवान् ९भगवान् १०आत्मा दशैते **पुंसि** नायका: ।।
१रमा २रुचिर् ३नदी ४धेनुर् ५वाग् ६धी: ७सरिद्–अनन्तरम् ।
८क्षुत् ९प्रावृट् च १०शरच्चैव दशैते **स्त्रीषु** नायका: ।।
१ज्ञानं २दधि ३पयो ४वर्म ५धनुर् ६वारि ७जगत् तथा ।
८मधु ९नाम १०मनोहारि दशैते तु **नपुंसके** ।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**पठत-बोधत**

## संस्कृतदिनसमारोहः

१९६९ तः श्रावणपौर्णिमा-दिनं संस्कृतदिनरूपेण सम्पूर्णभारते आचर्यते। २००० तमवर्षतः संस्कृतानुरागिणः संस्कृतसप्ताहस्य आरम्भम् अकुर्वन् । तन्निमित्तं श्रावणपौर्णिमायाः पूर्वं दिनत्रयम् अनन्तरं दिनत्रयं च संस्कृतस्य विविधकार्यक्रमाणाम् आयोजनं भवति । श्रावणपौर्णिमायां संस्कृतदिनस्य आचरणं भवति ।

संस्कृतसप्ताह-कार्यक्रमाः ।

| | दिनम् | कार्यक्रमाः । |
|---|---|---|
| ०१ | प्रथमं दिनम् । | विविधाः स्पर्धाः - सुभाषित-कण्ठस्थीकरणम् /गीता-कण्ठस्थीकरणम् / अष्टक-कण्ठस्थीकरणम् / चित्रवर्णनम् / निबन्धलेखनम् / स्तोत्र-कण्ठस्थीकरणम् । |
| ०२ | द्वितीयं दिनम् । | क्रीडाः - सङ्ख्याक्रीडाः, भाषाक्रीडाः, स्मरणक्रीडाः । |
| ०३ | तृतीयं दिनम् । | नाट्य-प्रस्तुतीकरणम् । |
| ०४ | चतुर्थं दिनम् । | कथाकथनम् । |
| ०५ | पञ्चमं दिनम् । | गीतगायनम् - वैयक्तिकं सामूहिकं च । |
| ०६ | षष्ठं दिनम् । | संस्कृतगीताधारेण नृत्यम् । |
| ०७ | सप्तमं दिनम् । | प्रदर्शनी तथा समापन-कार्यक्रमाः । |

### संस्कृतदिनवृत्तम् ।

**संस्कृतेन मानवजीवनं सफलं भवति । - श्रीमान् अध्यक्षः ।**

**साङ्गली - (तिथिः - श्रावणपौर्णिमा)**

'सरस्वती विद्यामन्दिरम्' इति प्रशालायां संस्कृतदिननिमित्तम् आयोजितः संस्कृतसप्ताहसमारोहः सम्पन्नः । कार्यक्रमस्य प्रारम्भः दीपप्रज्वालनेन तथा प्रतिमापूजनेन सञ्जातः। अस्मिन् समये संस्कृतेन सरस्वतीस्तवनं स्वागतगीतं च छात्रैः गीतम् ।

प्रशालायाः मुख्याध्यापिकया प्रास्ताविकं कृतम् । तया संस्कृतसप्ताहस्य महत्त्वं कथयित्वा कार्यक्रमेषु सहभागिनां छात्राणाम् अभिनन्दनं कृतम् । संस्कृतसप्ताहम् अनुसृत्य छात्राणां पालकानां च कृते संस्कृतसम्भाषणशिबिरम् आयोजितम् । संस्कृताध्यापिकया तस्य वृत्तान्तः निवेदितः । प्रमुखातिथिः संस्कृतवस्तुप्रदर्शिन्याः उद्घाटनं कृतवान्। अस्मिन्नवसरे छात्राः संस्कृतगीताधारेण नृत्यानि प्रस्तुतवन्तः । तथैव कालिदास-भास-आदीनां नाटकानि छात्रैः अभिनीतानि ।

अतिथिवर्येण भाषणे संस्कृतभाषायाः ऐतिहासिकं, वैज्ञानिकं, साहित्यिकं मूल्यं च प्रतिपादितम् । कार्यक्रमस्य अध्यक्षमहोदयेन 'वैदेशिकानां संस्कृतजिज्ञासा' इति विषयम् अधिकृत्य भाषणं कृतम् ।

दशमीकक्षायाः छात्रः सर्वेभ्यः धन्यवादान् व्याहरत् । कार्यक्रमस्य सूत्रसञ्चालनं छात्रैः एव संस्कृतेन कृतम्। 'प्रतिदिनम् एकं सुभाषितं कण्ठस्थं करोमि' इति छात्रैः सङ्कल्पितम्। 'प्रवहतात् संस्कृतमन्दाकिनी' इति गीतेन समापनम् अभवत्।

**उपक्रमः** - अस्मिन् वर्षे युष्माकं विद्यालये संस्कृतदिनसमारोहः कथम् आचरणीयः इति विषये शिक्षकेण सह चर्चां कुरुत ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# चतुर्थः पाठः अमूल्यं कमलम् ।

• धनात् महत्तरं किं किं विद्यते ?
• गौतमबुद्धविषये यूयं काः कथाः जानीथ ?

भारतदेशः श्रेष्ठानां तत्त्वचिन्तकानां देशः इति सर्वे जानन्ति । तेषु अन्यतमः गौतमबुद्धः । मायादेव्याः शुद्धोधनस्य च पुत्रः सिद्धार्थः तपसा गौतमबुद्धः बभूव। बौद्धधर्मस्य प्रवर्तकोऽयं शान्तिसन्देशं सर्वत्र प्रससार । तस्य जीवने घटिता एषा घटना।



आसीत् सुदासो नाम कश्चिदुद्यानपालः । तस्य तडागे कदाचित् सत्यपि शिशिर–ऋतावेकं पद्मं व्यकसत्, व्योम्नीव बालसूर्यबिम्बम् । सोऽचिन्तयत्, 'अहो **महिमा परमात्मनः**, यदेतादृशे कालेऽतिशीते विभूषितो मे तडाग एतस्य सरसिजस्य विकासेन । एतत् सरसिजं विक्रीयाहं विपुलं धनं प्राप्नुयाम्' इति । एवं सञ्चिन्त्य स तद् विक्रेतुं **राजसद्मनः** पुरतः स्थितः । अत्रान्तरे तेनैव **अध्वना** कश्चित् **श्रीमान्** सार्थवाहः समायातः । सोऽवदत्, 'भद्र, **भगवान्** सुगतः सम्प्रत्येतस्मिन्नगरे वसति । **महात्मनः** तस्य पूजार्थमिदं कमलमभ्यर्थये । तत्कियता मूल्येन ददासि?' उद्यानपालोऽब्रवीत्, 'एकेन सुवर्णनाणकेन' । अथ स सार्थवाहः यावत्तत् कमलं क्रेतुमिच्छति, तावदेवापरो **धनवान् श्रेष्ठी** अपि सुगतदर्शनार्थं गच्छन् तत्र समुपस्थितः । नीरजमूल्यं पृच्छन्तं तं **श्रेष्ठिनम्** उद्यानपालोऽब्रूत 'एष महाभाग एकं सुवर्णनाणकम् एतस्यार्थे दातुमिच्छति' । **श्रेष्ठी** अगदत्, 'अहं दश सुवर्णनाणकानि यच्छामि'। सार्थवाहोऽभणत्, 'अहं शतं सुवर्णनाणकानि प्रयच्छामि' । तयोर्विवादं श्रुत्वा सुदासो व्यमृशत् 'यस्य कृते एतौ कमलमेतत् क्रेतुमिच्छतः, नूनं स सुगत एवाधिकतमं मूल्यं मह्यं दद्यात्' इति । अतः स उद्यानपालस्तावभाषत 'नैतद् भो विक्रेतुमिच्छामि' इति ।

अथ प्राप्तः सुदासस्तदुद्यानं, यत्र **भगवतः** सुगतस्य निवासः । तत्र वटवृक्षस्याधस्तादेकस्मिन्नश्मखण्डे समुपविष्ट आसीत्स **महात्मा** । अनल्पेन **धाम्ना** राजते स्म तस्य **भगवतो** वदनम् । तदालोकयतः सुदासस्य चित्ते भक्तिरसार्णव उदतिष्ठत् । स हस्तस्थं नीरजं **भगवतः** सुगतस्य चरणयोरर्घ्यं कृत्वा 'नमो **भगवते**' इति वदन् सविनयं प्राणमत् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

तं प्रसादवर्षिभ्यां लोचनाभ्यां निरूपयन् स्मयमानमुखपद्मो **भगवान्** अभाषत, ''वत्स, किमिच्छसि?'' इति। एवम् उक्तवति सुगते निरिच्छः सुदासः प्रत्यवदत्, ''**भगवन्** किमन्यत्? केवलं **भगवतः** चरणकमलस्पर्शेन **आत्मा** मे कृतार्थतां लभताम्'' इति ।

एवंवादिनं सुदासं 'तथास्तु' इत्यब्रवीद् **भगवान्** सुगतः । अहो प्रभावः सुगतस्य, यत्तस्य दर्शनमात्रेणैव कमलार्थं बहुमूल्यमपेक्षमाणः सुदासस्तद्विस्मृत्य सुगतचरणाभ्यां तत्कमलं समर्पितवान् ।

एष सुगतः एव ननु **भगवान्** गौतमबुद्धः ।

## भाषाभ्यासः

**१. पूर्णवाक्येन उत्तरं लिखत।**

अ) सुदासः कः आसीत्?
आ) पद्मं कदा व्यकसत्?
इ) पद्मं कीदृशम्?
ई) पद्मं विक्रेतुं सुदासः कुत्र स्थितः?
उ) श्रेष्ठी कमलार्थं कियत् मूल्यं दातुम् इच्छति?
ऊ) महात्मा कुत्र उपविष्टः आसीत्?

**२. माध्यमभाषया उत्तरत ।**

अ) सुदासः किमर्थं कमलं विक्रेतुं न इच्छति?
आ) सुदासः सुगतचरणाभ्यां कमलं किमर्थं समर्पितवान्?

**३. कः कं वदति?**

अ) 'भद्र, भगवान् सुगतः सम्प्रत्येतस्मिन्नगरे वसति ।'
आ) 'अहं दश सुवर्णनाणकानि यच्छामि ।'
इ) 'एष महाभागः एकं सुवर्णनाणकम् एतस्यार्थे दातुमिच्छति ।'
ई) 'वत्स, किमिच्छसि?'
उ) 'नमो भगवते ।'

**४. प्रश्ननिर्माणं कुरुत ।**

अ) सुगत एवाधिकतमं मूल्यं मह्यं दद्यात् ।
आ) भगवतो वदनं धाम्ना राजते स्म ।

**५. सन्धिविग्रहं कुरुत ।** (अ) कश्चिदुद्यानपालः (आ) चरणयोरर्घ्यम् (इ) सोऽवदत् (ई) इत्यब्रवीत् ।

**६. समानार्थकशब्दान् लिखत ।** तडागः, नीरजम्, सार्थवाहः, अर्णवः, धनवान् ।

**७. विरुद्धार्थकशब्दान् लिखत ।** विपुलम्, बहुमूल्यम्, क्रेतुम् ।

**८. मेलनं कुरुत ।**

| विशेषणम् | विशेष्यम् |
|---|---|
| विपुलम् | श्रेष्ठी |
| श्रीमान् | धाम्ना |
| अनल्पेन | लोचनाभ्याम् |
| निरिच्छः | सार्थवाहः |
| धनवान् | धनम् |
| अधिकतमम् | सुदासः |
| प्रसादवर्षिभ्याम् | नीरजम् |
| हस्तस्थम् | मूल्यम् |

**९. अमरकोषात् शब्दं प्रयुज्य वाक्यं पुनर्लिखत ।**

अ) नूनं सः सुगतः एव अधिकतमं मूल्यं दद्यात् ।
आ) तडागे शिशिर-ऋतौ एकं पद्मं व्यकसत् ।
इ) विपुलं धनं प्राप्नुयाम् ।

**१०. सूचनानुसारं कृतीः कुरुत ।**

अ) तयोः विवादं श्रुत्वा सुदासो व्यमृशत्।
(पूर्वकालवाचक-त्वान्त-अव्ययं निष्कासयत।)
आ) त्वं किम् इच्छसि ?
('त्वम्' इत्यस्य स्थाने 'भवान्' इति योजयत ।)
इ) मे आत्मा कृतार्थतां लभताम् ।
(लङ्लकारे वाक्यं परिवर्तयत ।)
ई) शिशिर-ऋतौ पद्मं व्यकसत् ।(बहुवचने लिखत।)
उ) सुदासः सुगतचरणाभ्यां कमलं समर्पितवान् ।
(वाच्यपरिवर्तनं कुरुत ।)
ऊ) अहं विपुलं धनं प्राप्नुयाम् । (लकारं लिखत ।)

72K3VH




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# पञ्चमः पाठः  स एव परमाणुः ।

विश्वस्य उत्पत्तिविषये नैके सिद्धान्ताः प्रतिपादिताः। नैके प्राचीनाः सिद्धान्ताः कालवशतां गताः नैके नूतनाः च वैज्ञानिकैः स्वीकृताः। 'Atom' इति शब्दः सर्वेषां सुपरिचितः एव। आधुनिकविज्ञानशास्त्रे 'Atom' इति मूलकारणं द्रव्यस्य । स एव 'Element' इति मन्यते । प्राचीनशास्त्रे तु 'परमाणुः' निर्मितेः मूलकारणम् इति कथितम् । परमाणोः वैशिष्ट्यानि महर्षिणा कणादमहोदयेन वैशेषिकदर्शने कथितानि । अस्मिन् विषये अधिकं संशोधनं शक्यम् ।




(अर्णवः जपाकुसुमं गृहीत्वा प्रविशति । तस्य पिता विज्ञानस्य प्राध्यापकः । सः पुस्तकपठने मग्नः। तस्य पार्श्वे उत्पीठिकायां सूक्ष्मेक्षिका वर्तते ।)

अर्णवः – पितः, अस्माकम् उद्यानाद् जपाकुसुमम् आनीतं मया । कियन्तः सूक्ष्माः तस्य परागकणाः !

पिता – सूक्ष्मेक्षिकया पश्य, तेषां कणानां रचनाम् अपि द्रष्टुं शक्नोषि ! (अर्णवः तथा करोति ।)

पिता – किं दृष्टं त्वया?



अर्णवः – पितः, अद्‌भुतं तत् । सूक्ष्मकणेषु तस्य अङ्गानि दृश्यन्ते।

पिता – अर्णव, एतानि पुष्पस्य अङ्गानि त्वं सूक्ष्मेक्षिकया द्रष्टुं शक्नोषि। परन्तु एतद् विश्वं परमाणुभ्यः निर्मितम्। ते परमाणवः तु सूक्ष्मेक्षिकया अपि न दृश्यन्ते ।

अर्णवः – परमाणुः नाम किम्?

पिता – अस्तु । कथयामि । मुष्टिमात्रान् तण्डुलान् महानसतः आनय ।

अर्णवः – (तथेति उक्त्वा पाकगृहात् तण्डुलान् आनयति।) स्वीकरोतु, भवान् ।

पिता – अधुना इमं तण्डुलं विभज ।

अर्णवः – तात, कियान् लघुः अस्ति एषः । पश्यतु, एतस्य भागद्वयं यथाकथमपि कृतं मया ।

पिता – इतोऽपि लघुतरं भागं कर्तुं शक्यते वा?

अर्णवः – यदि क्रियते तर्हि चूर्णं भवेत् तस्य ।

पिता – सम्यग् उक्तं त्वया । यत्र एतद् विभाजनं समाप्यते, यस्मात् सूक्ष्मतरं भागं प्राप्तुं न शक्यते सः एव परमः अणुः ।

अर्णवः – द्रव्यस्य अन्तिमः घटकः मूलं तत्त्वं च परमाणुः, सत्यं खलु?

पिता – सत्यम् । अयं खलु कणादमहर्षेः सिद्धान्तः । अपि जानासि? परमाणुः द्रव्यस्य मूलकारणम् इति तेन महर्षिणा प्रतिपादितम् । तदपि प्रायः ख्रिस्तपूर्वं पञ्चमे षष्ठे वा शतके ।

अर्णवः – तात, महर्षिणा कणादेन किं किम् उक्तं परमाणुविषये ? वयं तु केवलं तस्य महाभागस्य नामधेयम् एव जानीमः ।

पिता – कणादमुनिना प्रतिपादितम् – परमाणुः अतीन्द्रियः, सूक्ष्मः, निरवयवः, नित्यः, स्वयं व्यावर्तकः च। 'वैशेषिकसूत्राणि' इति स्वग्रन्थे तेन परमाणोः व्याख्या कृता ।



Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com

अर्णवः – का सा व्याख्या ?

पिता – **जालसूर्यमरीचिस्थं यत् सूक्ष्मं दृश्यते रजः ।**
**तस्य षष्ठतमो भागः परमाणुः स उच्यते ।।**

अर्णवः – अहम् एतद्विषये विस्तरेण पठितुम् इच्छामि ।

पिता – उत्तमम्! श्वः मम महाविद्यालयम् आगच्छ । तत्र कणादविषयकाणि नैकानि पुस्तकानि सन्ति । तव जिज्ञासा निश्चयेन शाम्येत् ।



## भाषाभ्यासः

**१. पूर्णवाक्येन उत्तरं लिखत।**

अ) अर्णवः पाकगृहात् किम् आनयति ?

आ) कः परमाणुः ?

इ) परमाणुसिद्धान्तः केन महर्षिणा कथितः ?

ई) महर्षिणा कणादेन परमाणुविषये किं प्रतिपादितम् ?

उ) महर्षेः कणादस्य मतानुसारं परमाणोः व्याख्या का ?

**२. सूचनानुसारं कृतीः कुरुत ।**

अ) अर्णवः जपाकुसुमं गृहीत्वा प्रविशति । (पूर्वकालवाचकम् अव्ययं निष्कासयत ।)

आ) किं दृष्टं त्वया ? (वाच्यपरिवर्तनं कुरुत ।)

इ) वयं तु केवलं तस्य महाभागस्य नामधेयं जानीमः । (वाक्यम् एकवचने परिवर्तयत।)

ई) अहं विस्तरेण पठितुम् इच्छामि । (वाक्यं लङ्लकारे परिवर्तयत ।)

उ) महाविद्यालये कणादविषयकाणि पुस्तकानि सन्ति। (वाक्यम् एकवचने परिवर्तयत ।)

ऊ) भवान् स्वीकरोतु । ('भवान्' स्थाने 'त्वं' योजयत ।)


ए) त्वं द्रष्टुं शक्नोषि । ('त्वं' स्थाने 'भवान्' योजयत ।)

ऐ) महर्षिणा परमाणोः व्याख्या कृता । (वाच्यपरिवर्तनं कुरुत ।)

ओ) वयं महाभागस्य नामधेयं जानीमः । (वाच्यपरिवर्तनं कुरुत ।)

औ) सम्यग् उक्तं त्वया । (वाच्यपरिवर्तनं कुरुत ।)

**३. जालरेखाचित्रं पूरयत**




**४. माध्यमभाषया उत्तरं लिखत ।**

अ) महर्षिः कणादः परमाणुविषये किं प्रतिपादितवान् ?

आ) 'तण्डुलान् आनय' इति पिता अर्णवं किमर्थम् आदिष्टवान् ?

**५. समानार्थकशब्दान् लिखत ।**

कुसुमम्, विश्वम्, पिता, नामधेयम्, सूर्यः ।

**६. विरुद्धार्थकशब्दान् मञ्जूषातः अन्विष्य लिखत ।**

सत्यम् , स्मरसि, बहूनि, अनित्यः, समानः,
(नित्यः, असत्यम्, भिन्नः, अल्पानि, विस्मरसि)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

७. उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।

अ) एतद् विश्वं ________ निर्मितम् । (तण्डुलैः/अणुभिः)

आ) ________ द्रव्यस्य मूलकारणम् । (परमाणुः/विज्ञानं)

इ) अणुभ्यः ________ परमाणवः । (सूक्ष्मतराः / स्थूलतराः)

ई) रजसः ________ भागः परमाणुः । (षष्ठतमः/शततमः)

८. नामतालिकां पूरयत ।

| ए.व. | द्विव. | ब.व. | विभक्तिः |
|---|---|---|---|
| ________ | ब्रह्मभ्याम् | ________ | तृतीया |
| ________ | ________ | वर्त्मानि | प्रथमा |
| ग्राव्णे | ________ | ________ | चतुर्थी |

| ए.व. | द्विव. | ब.व. | विभक्तिः |
|---|---|---|---|
| संन्यासिनि | ________ | ________ | सप्तमी |
| ________ | ________ | बलवतः | द्वितीया |
| ________ | त्वचोः | ________ | षष्ठी |

९. क्रियापदतालिकां पूरयत ।

| ए.व. | द्विव. | ब.व. | पुरुषः | लकारः |
|---|---|---|---|---|
| ________ | जीवतः | ________ | प्रथमः | लट् |
| ________ | ________ | अभाषध्वम् | मध्यमः | लङ् |
| मुञ्चानि | ________ | ________ | उत्तमः | लोट् |

| ए.व. | द्विव. | ब.व. | पुरुषः | लकारः |
|---|---|---|---|---|
| स्पृहयेत् | ________ | ________ | प्रथमः | विधिलिङ् |
| ________ | धारयेथाम् | ________ | मध्यमः | लोट् |
| ________ | ________ | चिन्तयामहै | उत्तमः | लोट् |

**उपक्रमः –** पितुः महाविद्यालयं गत्वा अर्णवेन कणादविषये कानि कानि पुस्तकानि दृष्टानि? तेन पित्रा सह का चर्चा कृता? इत्यस्य विषये संवादं रचयत ।

**क्रीडत–नन्दत**

**वाक्यनिर्माणम्**

बालानां पञ्च षट् वा गणाः करणीयाः । सर्वेऽपि निश्चिते स्थले उपविशेयुः । प्रतिगणं द्वौ त्रयः वा बालाः भवेयुः । शिक्षकः प्रतिगणं काश्चन (पञ्चदश) चिटिकाः दद्यात् । तासु प्रत्येकं चिटिकायाम् अपि एकः शब्दः तेन पूर्वमेव लिखितः भवति । तेषु शब्देषु केचन कर्तृवाचकाः, केचन कर्मवाचकाः अन्ये केचन क्रियावाचकाश्च भवेयुः । बालैः तेषां शब्दानाम् उपयोगेन निर्दिष्टे कालावधौ वाक्यानि रचनीयानि। (सर्वे मिलित्वा वाक्यानि चिन्तयेयुः, तेषु अन्यतमः तानि लिखेत् ।) यः गणः अधिकानि वाक्यानि रचयति तस्य जयः भवति। प्रतिवाक्यं कर्तृ–कर्म–क्रियासहितं भवेत् इति पूर्वमेव सूचना दातव्या । – क्रीडावल्ली–पुस्तकात् ।

72TYXJ



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# षष्ठ: पाठ: युग्ममाला। (कण्ठस्थीकरणार्थम्)



संस्कृतसाहित्ये शब्दयुग्मानि प्रसिद्धानि । यथा - **यदा-तदा, यावत्-तावत्, यत्र-तत्र** । उदा. **यथा** राजा **तथा** प्रजा। शब्दयुग्मानाम् उपयोगेन श्लोकस्य वाक्यस्य वा सौन्दर्यं वर्धते ।

**वृत्तम्-वंशस्थम्**

यथा चतुर्भि: कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनै:।
तथा चतुर्भि: पुरुष: परीक्ष्यते श्रुतेन शीलेन गुणेन कर्मणा।।१।। - वृद्धचाणक्यशतकात्

अन्वय: - **यथा** कनकं निघर्षण - छेदन - ताप-ताडनै: (इति) चतुर्भि: परीक्ष्यते, **तथा** पुरुष: श्रुतेन, शीलेन, गुणेन, कर्मणा (इति) चतुर्भि: परीक्ष्यते ।

**वृत्तम्-अनुष्टुप्**

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ।।२।। - सङ्ग्रहात्

सन्धिविग्रहा: - १) नास्ति = न + अस्ति । २) श्लाघ्यस्तत्राल्पधीरपि = श्लाघ्य: + तत्र + अल्पधी: + अपि। ३) एरण्डोऽपि = एरण्ड: + अपि ।

अन्वय: - **यत्र** विद्वज्जन: न अस्ति, **तत्र** अल्पधी: अपि श्लाघ्य: (भवति) । (यथा) निरस्तपादपे देशे एरण्ड: अपि द्रुमायते ।

**वृत्तम्-शिखरिणी**

यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्ध: समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मन: ।
यदा किञ्चित्किञ्चिद् बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगत: ।।३।। - नीतिशतकात्

सन्धिविग्रहा: - १) किञ्चिज्ज्ञोऽहम् = किञ्चिज्ज्ञ: + अहम् । २) सर्वज्ञोऽस्मीत्यभवदवलिप्तम् = सर्वज्ञ: + अस्मि + इति + अभवत् + अवलिप्तम् । ३) किञ्चित्किञ्चिद् बुधजनसकाशादवगतम् = किञ्चित् + किञ्चित् + बुधजनसकाशात् + अवगतम् । ४) मूर्खोऽस्मीति = मूर्ख: + अस्मि + इति ।

अन्वय: - **यदा** अहं किञ्चिज्ज्ञ: (तदा) (अहं) द्विप: इव मदान्ध: समभवम् । **तदा** मम मन: 'सर्वज्ञ: अस्मि' इति अवलिप्तम् अभवत् । **यदा** बुधजनसकाशात् किञ्चित् किञ्चित् अवगतम् **तदा** (अहं) मूर्ख: अस्मि (इति ज्ञात्वा) मे मद: ज्वर: इव व्यपगत: ।

**वृत्तम्-अनुष्टुप्**

तावद् भयाद्धि भेतव्यं यावद् भयमनागतम्।
आगतं तु भयं वीक्ष्य नर: कुर्याद् यथोचितम्।।४।। - पञ्चतन्त्रात्

सन्धिविग्रहा: - १) भयाद्धि = भयात् + हि । २) भयमनागतम् = भयम् + अनागतम् ।

अन्वय: - **यावत्** भयम् अनागतं **तावत्** हि भयात् भेतव्यम् । (तथापि) आगतं तु भयं वीक्ष्य नर: यथोचितं कुर्यात् ।

**वृत्तम्-अनुष्टुप्**

उत्तमो नातिवक्ता स्यादधमो बहु भाषते।
सुवर्णे न ध्वनिस्तादृग्यादृक्कांस्ये प्रजायते।।५।।

सन्धिविग्रहा: - १) उत्तमो नातिवक्ता = उत्तम: + न + अतिवक्ता । २) स्यादधमो बहु = स्यात् + अधम: + बहु । ३) ध्वनिस्तादृग्यादृक्कांस्ये = ध्वनि: + तादृक् + यादृक् + कांस्ये ।

अन्वय: - उत्तम: अतिवक्ता न स्यात्, अधम: बहु भाषते । **यादृक्** कांस्ये (ध्वनि:) प्रजायते **तादृक्** सुवर्णे ध्वनि: न (प्रजायते) ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

वृत्तम्–अनुष्टुप्

यादृशं वपते बीजं क्षेत्रमासाद्य कर्षकः ।
सुकृते दुष्कृते वाऽपि तादृशं लभते फलम् ।।६।।

सन्धिविग्रहाः – १) क्षेत्रमासाद्य = क्षेत्रम् + आसाद्य । २) वाऽपि = वा + अपि ।

**अन्वयः –** कर्षकः क्षेत्रम् आसाद्य **यादृशं** बीजं वपते (**तादृशं** फलं लभते) । (तथैव मनुष्यः) सुकृते वा दुष्कृते वा अपि **तादृशं** (इष्टम् अनिष्टं वा) फलं लभते ।

## भाषाभ्यासः

**श्लोकः १**


**१. पूर्णवाक्येन उत्तरत ।**

अ) कनकपरीक्षा कथं भवति ?


आ) पुरुषपरीक्षा कथं भवति ?

**२. जालरेखाचित्रं पूरयत ।**

अ)




आ)




**३. माध्यमभाषया उत्तरत ।**

'यथा चतुर्भिः' इति श्लोकस्य स्पष्टीकरणं लिखत ।

**४. अमरकोषात् शब्दं प्रयुज्य वाक्यं पुनर्लिखत ।**

जनैः <u>कनकं</u> परीक्ष्यते ।

**श्लोकः २.**

**१. पूर्णवाक्येन उत्तरत ।**

अ) अल्पधीः कुत्र श्लाघ्यः भवति ?

आ) एरण्डः कुत्र द्रुमायते ?

**२. सन्धि–विग्रहं कुरुत ।**

अ) श्लाघ्यस्तत्र आ) अल्पधीरपि ।

**३. अमरकोषात् शब्दं प्रयुज्य वाक्यं पुनर्लिखत ।**

यत्र एकः अपि <u>पादपः</u> नास्ति तत्र एरण्डः द्रुमायते ।

**श्लोकः ३.**

**१. पूर्णवाक्येन उत्तरत ।**

अ) मनुष्यः द्विप इव मदान्धः कदा भवति ?

आ) 'मूर्खः अस्मि' इति मनुष्येण कुतः अवगतम् ?

**२. सन्धिविग्रहं कुरुत ।**

(अ) किञ्चिज्ज्ञोऽहम् (आ) अभवदवलिप्तम् ।

**३. माध्यमभाषया उत्तरत ।**

कदा मदः व्यपगच्छति ?

**श्लोक : ४.**

**१. पूर्णवाक्येन उत्तरत ।**

अ) आगतं भयं वीक्ष्य नरः किं कुर्यात् ?

**२. सन्धिविग्रहं कुरुत ।**

भयाद्धि ।

**श्लोकः ५.**

**१. पूर्णवाक्येन उत्तरत**

अ) कः बहु भाषते ?

**२. सन्धिविग्रहं कुरुत ।**

अ) स्यादधमः ।

**श्लोकः ६.**

**१. पूर्णवाक्येन उत्तरत ।**

अ) कर्षकः कीदृशं फलं लभते ?

**२. सन्धिविग्रहं कुरुत ।**

(अ) क्षेत्रमासाद्य (आ) वाऽपि ।

**३. माध्यमभाषया उत्तरत ।**

मनुष्यः स्वकर्मणः कीदृशं फलं लभते ?

**४. अमरकोषात् शब्दं प्रयुज्य वाक्यं पुनर्लिखत ।**

<u>कर्षकः</u> बीजं वपते ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**१) समानार्थकशब्दान् लिखत ।**

कनकम्, विद्वान्, पादप:, अधम: ।

**२) विरुद्धार्थकशब्दान् लिखत ।**

गुण:, विद्वान्, उत्तम:, सुकृतम् ।

**३) चतुर्थपदं लिखत ।**

अ) मन: - चेत: :: अवगतम् - _______

आ) बुधजन: - ज्ञानी :: मूर्ख: - _______

इ) नर: - मनुष्य: :: उचितम् - _______

ई) वीक्ष्य - दृष्ट्वा :: भयम् - _______

**४) समानार्थकशब्दानां मेलनं कुरुत ।** ।

| | |
|---|---|
| सुवर्णम् | श्रेष्ठ: |
| उत्तम: | व्याप्तम् |
| अवलिप्तम् | शब्द: |
| ध्वनि: | हेम |

**५) उचितं शब्दयुग्मं योजयत । (यत्र-तत्र, यदि-तर्हि, यदा-तदा, यथा-तथा)**

अ) _______ अध्यापक: न आगच्छति _______ छात्रा: स्वाध्यायं कुर्वन्ति ।

आ) _______ धूम: _______ वह्नि: ।

इ) _______ आकाशे मेघा: गर्जन्ति _______ मयूर: नृत्यति ।

ई) _______ विचार: _______ वर्तनम् ।

उ) _______ सूर्य: उदेति _______ विश्वं प्रकाशमयं भवति ।

ऊ) _______ शर्करा _______ पिपीलिका: ।

ए) सज्जना: _______ वदन्ति _______ कुर्वन्ति ।

ऐ) _______ बालक: व्यायामं करिष्यति _______ स: सुदृढ: भविष्यति ।

## क्रीडत-नन्दत

### पद्यक्रीडा

१. एक: गण: सुभाषितस्य एकं चरणं वदति । अपर: गण: श्लोकार्धं पूर्णं करोति ।

२. पदग्रहणम् - एकेनोक्तात् श्लोकार्धात् एकं पदं स्वीकृत्य अपर: गण: अन्यं श्लोकार्धं श्लोकपादं वा कथयति ।

### श्लोकान्त्याक्षरी

क्रीडकानां गणद्वयं भवेत् । आदौ प्रथमगणीयेषु अन्यतम: एकं श्लोकं वदेत् । तदा द्वितीयगणीयेषु अन्यतम: तादृशम् एकं श्लोकं वदेत्, यस्य च आरम्भ: अन्यगणीयेन उक्तस्य श्लोकस्य अन्तिमेन अक्षरेण भवति । **- क्रीडावल्ली-पुस्तकात् ।**

733UZ7



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासपत्रम् २

(४, ५, ६ पाठानाम् आधारेण)

**१. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत ।**

अ) सुदासः मालाकार आसीत् ।

आ) सुगतः सुदासाय कमलार्थम् अधिकमूल्यं यच्छति ।

इ) कमलस्य विकासेन तडागः विभूषितः ।

ई) एतद् विश्वम् अणुभिः निर्मितम् ।

उ) द्रव्यस्य आदिमः घटकः परमाणुः अस्ति ।

ऊ) अर्णवः क्षेत्रात् तण्डुलान् आनयति ।

**२. उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।**

अ) शिशिर-ऋतौ एकं ________ व्यकसत् । (पद्मम्/जपाकुसुमम्)

आ) अहो महिमा ________ । (परमात्मनः/मानवस्य)

इ) पूजार्थमिदं कमलम् ________ । (विक्रीणे/अभ्यर्थये)

ई) अहं दश ________ यच्छामि । (रुप्यकाणि/सुवर्णनाणकानि)

उ) अर्णवः ________ गृहीत्वा प्रविशति । (जपाकुसुमम्/कमलम्)

ए) एतद् विश्वं ________ निर्मितम् । (अणुभिः/तण्डुलैः)

**३. क्रमेण योजयत ।**

अ) १. श्रेष्ठिनः सार्थवाहस्य च विवादः । २. शिशिर-ऋतौ पद्मस्य विकासः ।
३. सुदासः विक्रयणार्थं राजसद्मनः पुरतः स्थितः । ४. सुदासस्य धनप्राप्तेः इच्छा ।

आ) १. सुगतचरणाभ्यां कमलस्य समर्पणम् । २. सुदासस्य सुगतदर्शनम् ।
३. सुगतस्य आशीर्वादप्रदानम् । ४. सुगतदर्शनात् बहुमूल्यस्य अपेक्षायाः विस्मरणम् ।

इ) १. पितुः स्वस्य महाविद्यालये निमन्त्रणम् । २. 'वैशेषिकसूत्राणि' इति ग्रन्थविषये चर्चा ।
३. पित्रा कणादमहर्षेः सिद्धान्तविषये कथनम् । ४. अर्णवस्य विस्तरेण पठनस्य इच्छा ।

**४. समासविग्रहं कुरुत ।**

बालसूर्यबिम्बम्, राजसद्म, पूजार्थम्, भक्तिरसार्णवः, सविनयम्, पुस्तकपठनम्, परागकणाः, सूक्ष्मकणाः, कणादमुनिः, परमाणुः, अल्पधीः, मदान्धः, किञ्चिज्ज्ञः, उद्यानपालः, शिशिर-ऋतुः, नीरजम्, दर्शनार्थम्, महात्मा, अश्मखण्डः, हस्तस्थम्, जपाकुसुमम् ।

**५. उचितं कारणं चिनुत ।**

अ) सुदासः राजसद्मनः पुरतः स्थितः यतः ________________ ।
१. सः सरसिजं विक्रेतुम् इच्छति स्म । २. सः राजानं द्रष्टुम् इच्छति स्म ।

आ) सार्थवाहः सुदासाय शतसुवर्णनाणकानि दातुम् उद्युक्तः यतः ________________ ।
१. सः सुदासस्य साहाय्यं कर्तुम् इच्छति स्म । २. सः सुदासात् कमलं क्रेतुम् इच्छति स्म ।

इ) सुदासः नीरजं सुगतचरणाभ्यां समर्पितवान् यतः ________________ ।
१.सुगतः सुदासाय अधिकं धनं यच्छति । २. सुदासस्य मनसि भक्तिरसः अजायत ।

ई) पिता अर्णवाय स्वमहाविद्यालयम् आगन्तुं कथयति यतः ________________ ।
१. पितुः महाविद्यालये कणादविषयकानि पुस्तकानि सन्ति ।
२. पितुः महाविद्यालये स्नेह-सम्मेलनम् अस्ति ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**६. तालिकां पूरयत ।**

| वक्त्रा संवादं मेलयत | |
|---|---|
| सार्थवाह: | उद्यानपाल: |
| | |
| | |

(मञ्जूषा – एकेन सुवर्णनाणकेन, अहं शतं सुवर्णनाणकानि प्रयच्छामि, नैतद् विक्रेतुमिच्छामि, तत् कियता मूल्येन ददासि?)

**७. स्थानाधारेण शब्दपेटिकां पूरयत ।**

(वटवृक्ष:, नगरम्, अश्मखण्ड:, उद्यानम्)

**८. नामतालिकां पूरयत ।**

| ए.व. | द्विव. | ब.व. | विभक्ति: |
|---|---|---|---|
| ———— | अप्सरोभ्याम् | ———— | तृतीया |
| दयावत: | ———— | ———— | षष्ठी |
| ———— | दृग्भ्याम् | ———— | चतुर्थी |

| ए.व. | द्विव. | ब.व. | विभक्ति: |
|---|---|---|---|
| ———— | शाखिनौ | ———— | प्रथमा |
| रज्जवे | ———— | ———— | चतुर्थी |
| सवितरम् | ———— | ———— | द्वितीया |

**पठत–बोधत**

**सतिसप्तमी – रचना**

'**सतिसप्तमी**' इति संस्कृतभाषाया: सौन्दर्यपूर्णा विशेषरचना । यथा –

१) **अस्तङ्गते सवितरि** क्षुद्रबुद्धि: मृगेण सह मृगस्य निवासस्थानं गत: ।

२) तस्य तडागे **सत्यपि शिशिर–ऋतौ** एकं पद्मं व्यकसत् ।

३) एवम् **उक्तवति सुगते** निरिच्छ: सुदास: प्रत्यवदत् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## लकारजगत् – (अ) धातव:।
(द्वितीय: समूह:)



**शृण्वन्तु शृण्वन्तु** ! अस्मिन् वर्षे पर्यटनार्थं वयं सर्वे ताडोबा-अभयारण्यं **याम:** इति निश्चितम् । ✓

**अमेय:**
त्वं कथम् **अजाना:** ?

अन्यकक्षाच्छात्रा: तथा **ब्रुवते** । अध्यापककक्षे अपि तथा चर्चाम् **अशृणवम्** । ✓

**सानिका**
तर्हि सत्यवचनम् ।

**आर्या**
अहम् अवश्यं **यामि** ।

**अदिति:**
सर्वे आयान्ति चेत् अहमपि **एमि** ।

अद्य आरभ्य एव सिद्धतां **कुर्म:** । ✓

**आर्या**
अहं कन्दुकम् ,जालयष्टिकां यष्टिकन्दुकौ अपि आनयामि ।

**पार्थ:**
अहं टोपिकां **क्रीणामि** ।

**आदित्य:**
अपूपं लाजान् सुपिष्टकानि अपि **क्रीणीहि** । चाकलेहान् अपि **गृहाण** ।

**सानिका**
आदित्य: तु सर्वदा खादनविषये एव **ब्रवीति** । अत: एव पीन: ।

**आदित्य:**
भवतु , तर्हि अहम् एकाकी एव **भोक्ष्ये**, न **दास्यामि** कस्मै अपि ।

**अमेय:**
व्याघ्रदर्शनं तत्र प्रमुखम् आकर्षणम्, अहं मम अग्रजात् चित्रग्राहकं **प्राप्नोमि** । करदीपम् अपि ।

किन्तु अमेय, य: **जागर्ति** स: एव व्याघ्रं पश्यति । त्वं तु वर्गे अपि **स्वपिषि** । ✓



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# भाषासूत्रम् – २

## (अ) धातुतालिका: (द्वितीयः समूहः)

### ज्ञा (९ उ.प.)

परस्मैपदम् — **लट्लकारः** — आत्मनेपदम्

| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| जानाति | जानीतः | जानन्ति | प्रथमः | जानीते | जानाते | जानते |
| जानासि | जानीथः | जानीथ | मध्यमः | जानीषे | जानाथे | जानीध्वे |
| जानामि | जानीवः | जानीमः | उत्तमः | जाने | जानीवहे | जानीमहे |

परस्मैपदम् — **लङ्लकारः** — आत्मनेपदम्

| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| अजानात् | अजानीताम् | अजानन् | प्रथमः | अजानीत | अजानाताम् | अजानत |
| अजानाः | अजानीतम् | अजानीत | मध्यमः | अजानीथाः | अजानाथाम् | अजानीध्वम् |
| अजानाम् | अजानीव | अजानीम | उत्तमः | अजानि | अजानीवहि | अजानीमहि |

परस्मैपदम् — **लोट्लकारः** — आत्मनेपदम्

| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| जानातु | जानीताम् | जानन्तु | प्रथमः | जानीताम् | जानाताम् | जानताम् |
| जानीहि | जानीतम् | जानीत | मध्यमः | जानीष्व | जानाथाम् | जानीध्वम् |
| जानानि | जानाव | जानाम | उत्तमः | जानै | जानावहै | जानामहै |

परस्मैपदम् — **विधिलिङ्लकारः** — आत्मनेपदम्

| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| जानीयात् | जानीयाताम् | जानीयुः | प्रथमः | जानीत | जानीयाताम् | जानीरन् |
| जानीयाः | जानीयातम् | जानीयात | मध्यमः | जानीथाः | जानीयाथाम् | जानीध्वम् |
| जानीयाम् | जानीयाव | जानीयाम | उत्तमः | जानीय | जानीवहि | जानीमहि |

परस्मैपदम् — **लृट्लकारः** — आत्मनेपदम्

| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| ज्ञास्यति | ज्ञास्यतः | ज्ञास्यन्ति | प्रथमः | ज्ञास्यते | ज्ञास्येते | ज्ञास्यन्ते |
| ज्ञास्यसि | ज्ञास्यथः | ज्ञास्यथ | मध्यमः | ज्ञास्यसे | ज्ञास्येथे | ज्ञास्यध्वे |
| ज्ञास्यामि | ज्ञास्यावः | ज्ञास्यामः | उत्तमः | ज्ञास्ये | ज्ञास्यावहे | ज्ञास्यामहे |

### ब्रू (२ उ.प.)

परस्मैपदम् — **लट्लकारः** — आत्मनेपदम्

| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| ब्रवीति,आह | ब्रूतः, आहतुः | ब्रुवन्ति,आहुः | प्रथमः | ब्रूते | ब्रुवाते | ब्रुवते |
| ब्रवीषि,आत्थ | ब्रूथः, आहथुः | ब्रूथ | मध्यमः | ब्रूषे | ब्रुवाथे | ब्रूध्वे |
| ब्रवीमि | ब्रूवः | ब्रूमः | उत्तमः | ब्रुवे | ब्रूवहे | ब्रूमहे |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| परस्मैपदम् | | | लङ्लकार: | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
| अब्रवीत् | अब्रूताम् | अब्रुवन् | प्रथम: | अब्रूत | अब्रुवाताम् | अब्रुवत |
| अब्रवी: | अब्रूतम् | अब्रूत | मध्यम: | अब्रूथा: | अब्रुवाथाम् | अब्रूध्वम् |
| अब्रवम् | अब्रूव | अब्रूम | उत्तम: | अब्रुवि | अब्रूवहि | अब्रूमहि |

| परस्मैपदम् | | | लोट्लकार: | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
| ब्रवीतु | ब्रूताम् | ब्रुवन्तु | प्रथम: | ब्रूताम् | ब्रुवाताम् | ब्रुवताम् |
| ब्रूहि | ब्रूतम् | ब्रूत | मध्यम: | ब्रूष्व | ब्रुवाथाम् | ब्रूध्वम् |
| ब्रवाणि | ब्रवाव | ब्रवाम | उत्तम: | ब्रवै | ब्रवावहै | ब्रवामहै |

| परस्मैपदम् | | | विधिलिङ्लकार: | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
| ब्रूयात् | ब्रूयाताम् | ब्रूयु: | प्रथम: | ब्रुवीत | ब्रुवीयाताम् | ब्रुवीरन् |
| ब्रूया: | ब्रूयातम् | ब्रूयात | मध्यम: | ब्रुवीथा: | ब्रुवीयाथाम् | ब्रुवीध्वम् |
| ब्रूयाम् | ब्रूयाव | ब्रूयाम | उत्तम: | ब्रुवीय | ब्रुवीवहि | ब्रुवीमहि |

| परस्मैपदम् | | | लृट्लकार: | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
| वक्ष्यति | वक्ष्यत: | वक्ष्यन्ति | प्रथम: | वक्ष्यते | वक्ष्येते | वक्ष्यन्ते |
| वक्ष्यसि | वक्ष्यथ: | वक्ष्यथ | मध्यम: | वक्ष्यसे | वक्ष्येथे | वक्ष्यध्वे |
| वक्ष्यामि | वक्ष्याव: | वक्ष्याम: | उत्तम: | वक्ष्ये | वक्ष्यावहे | वक्ष्यामहे |

## दा (३ उ.प.)

| परस्मैपदम् | | | लट्लकार: | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
| ददाति | दत्त: | ददति | प्रथम: | दत्ते | ददाते | ददते |
| ददासि | दत्थ: | दत्थ | मध्यम: | दत्से | ददाथे | दद्ध्वे |
| ददामि | दद्व: | दद्म: | उत्तम: | ददे | दद्वहे | दद्महे |

| परस्मैपदम् | | | लङ्लकार: | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
| अददात् | अदत्ताम् | अददु: | प्रथम: | अदत्त | अददाताम् | अददत |
| अददा: | अदत्तम् | अदत्त | मध्यम: | अदत्था: | अददाथाम् | अदद्ध्वम् |
| अददाम् | अदद्व | अदद्म | उत्तम: | अददि | अदद्वहि | अदद्महि |

| परस्मैपदम् | | | लोट्लकार: | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
| ददातु | दत्ताम् | ददतु | प्रथम: | दत्ताम् | ददाताम् | ददताम् |
| देहि | दत्तम् | दत्त | मध्यम: | दत्स्व | ददाथाम् | दद्ध्वम् |
| ददानि | ददाव | ददाम | उत्तम: | ददै | ददावहै | ददामहै |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| परस्मैपदम् | | | विधिलिङ्लकारः | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
| दद्यात् | दद्याताम् | दद्युः | प्रथमः | ददीत | ददीयाताम् | ददीरन् |
| दद्याः | दद्यातम् | दद्यात | मध्यमः | ददीथाः | ददीयाथाम् | ददीध्वम् |
| दद्याम् | दद्याव | दद्याम | उत्तमः | ददीय | ददीवहि | ददीमहि |

| परस्मैपदम् | | | लृट्लकारः | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
| दास्यति | दास्यतः | दास्यन्ति | प्रथमः | दास्यते | दास्येते | दास्यन्ते |
| दास्यसि | दास्यथः | दास्यथ | मध्यमः | दास्यसे | दास्येथे | दास्यध्वे |
| दास्यामि | दास्यावः | दास्यामः | उत्तमः | दास्ये | दास्यावहे | दास्यामहे |

भुज् (७ उ.प.)

| परस्मैपदम् (रक्षणे) | | | लट्लकारः | आत्मनेपदम् (भोजने) | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
| भुनक्ति | भुङ्क्तः | भुञ्जन्ति | प्रथमः | भुङ्क्ते | भुञ्जाते | भुञ्जते |
| भुनक्षि | भुङ्क्थः | भुङ्क्थ | मध्यमः | भुङ्क्षे | भुञ्जाथे | भुङ्ग्ध्वे |
| भुनज्मि | भुञ्ज्वः | भुञ्ज्मः | उत्तमः | भुञ्जे | भुञ्ज्वहे | भुञ्ज्महे |

| परस्मैपदम् | | | लङ्लकारः | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
| अभुनक्-ग् | अभुङ्क्ताम् | अभुञ्जन् | प्रथमः | अभुङ्क्त | अभुञ्जाताम् | अभुञ्जत |
| अभुनक्-ग् | अभुङ्क्तम् | अभुङ्क्त | मध्यमः | अभुङ्क्थाः | अभुञ्जाथाम् | अभुङ्ग्ध्वम् |
| अभुनजम् | अभुञ्ज्व | अभुञ्ज्म | उत्तमः | अभुञ्जि | अभुञ्ज्वहि | अभुञ्ज्महि |

| परस्मैपदम् | | | लोट्लकारः | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
| भुनक्तु | भुङ्क्ताम् | भुञ्जन्तु | प्रथमः | भुङ्क्ताम् | भुञ्जाताम् | भुञ्जताम् |
| भुङ्ग्धि | भुङ्क्तम् | भुङ्क्त | मध्यमः | भुङ्क्ष्व | भुञ्जाथाम् | भुङ्ग्ध्वम् |
| भुनजानि | भुनजाव | भुनजाम | उत्तमः | भुनजै | भुनजावहै | भुनजामहै |

| परस्मैपदम् | | | विधिलिङ्लकारः | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
| भुञ्ज्यात् | भुञ्ज्याताम् | भुञ्ज्युः | प्रथमः | भुञ्जीत | भुञ्जीयाताम् | भुञ्जीरन् |
| भुञ्ज्याः | भुञ्ज्यातम् | भुञ्ज्यात | मध्यमः | भुञ्जीथाः | भुञ्जीयाथाम् | भुञ्जीध्वम् |
| भुञ्ज्याम् | भुञ्ज्याव | भुञ्ज्याम | उत्तमः | भुञ्जीय | भुञ्जीवहि | भुञ्जीमहि |

| परस्मैपदम् | | | लृट्लकारः | आत्मनेपदम् | | |
|---|---|---|---|---|---|---|
| ए.व. | द्विव. | ब.व. | पुरुषः | ए.व. | द्विव. | ब.व. |
| भोक्ष्यति | भोक्ष्यतः | भोक्ष्यन्ति | प्रथमः | भोक्ष्यते | भोक्ष्येते | भोक्ष्यन्ते |
| भोक्ष्यसि | भोक्ष्यथः | भोक्ष्यथ | मध्यमः | भोक्ष्यसे | भोक्ष्येथे | भोक्ष्यध्वे |
| भोक्ष्यामि | भोक्ष्यावः | भोक्ष्यामः | उत्तमः | भोक्ष्ये | भोक्ष्यावहे | भोक्ष्यामहे |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## जिज्ञासापत्रम्

**१) तालिकां पूरयत ।**

| धातवः | अर्थः | लकारः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| ब्रू (२ उ.प.) | वदति | लङ् | ______ | अब्रूताम् | अब्रुवन् |
| दा (३ उ.प.) | यच्छति | लट् | ______ | ददाते | ददते |
| | | लोट् | ______ | दत्तम् | दत्त |
| भुज् (७ उ.प.) | खादति | लट् | ______ | भुञ्जाथे | भुङ्ग्ध्वे |
| | | विधिलिङ् | भुञ्जीत | भुञ्जीयाताम् | ______ |
| ज्ञा (९ उ.प.) | अवगच्छति | लट् | जानीते | जानाते | ______ |
| | | लोट् | ______ | जानावहै | जानामहै |
| ग्रह् (९ उ.प.) | स्वीकरोति | लट् | गृह्णामि | गृह्णीवः | ______ |

**२) योग्यानि लट्रूपाणि लिखत ।**

अ) यशोदा दधि ______ । (मथ् ९ प.प.)
आ) बालकः क्षुधया ______ । (रुद् २ प.प.)
इ) अहं भोजनम् ______ । (अश् ९ प.प.)
ई) कृष्णः नरकासुरं ______ । (हन् २ प.प.)
उ) वयं भगवन्तं ______ । (स्तु २ प.प.)
ऊ) हरः हिमालये ______ । (शी २ आ.प.)
ए) मृगाः सिंहात् ______ । (भी ३ प.प.)
ऐ) मातामही आपणात् शाकानि ______ । (क्री ९ प.प.)
ओ) ऋषयः नित्यं सात्त्विकमन्नं ______ । (भुज् ७ आ.प.)

**पठत-बोधत-कण्ठस्थीकुरुत**

**दशलकाराः**

[१]लट् वर्तमाने [२]लेट् वेदे भूते [३]लुङ् [४]लङ् [५]लिटस्तथा ।
विध्याशिषौ तु [६]लिङ्-[७]लोटौ [८]लुट् [९]लृट् [१०]लृङ् च भविष्यति ।।




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## लकारजगत् – (ब) लिट् ।

मनुष्य: गृहे अवसत् ।





आदिमानव: गुहायाम् **उवास** ।

**एतानि वाक्यानि पठत ।**


| ह्य: | पुरा |
|---|---|
| मोहन: पाठशालाम् अगच्छत् । | श्रीकृष्ण: सान्दीपनिमुने: आश्रमं **जगाम** । |
| छात्रा: पुस्तिका: अयच्छन् । | देवा: शस्त्राणि **ददु:** । |
| गन्धार: फलम् अखादत् । | श्रीराम: बदरीफलानि **चखाद** । |
| बालक: देवम् अनमत् । | कर्ण: शक्रं **ननाम** । |

| प्राचीनकाले | ह्य: | अद्य | श्व:/आगामिकाले |
|---|---|---|---|
| **चकार** | अकरोत् | करोति | करिष्यति |
| (**लिट्**) | (लङ्) | (लट्) | (लृट्) |

### जिज्ञासापत्रम्

**कृति: –**

**१) मूलधातुं योजयत ।**






Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## भाषासूत्रम् – ३

**भूतकाल: ।**

| प्रथम: । | द्वितीय: । | तृतीय: । |
|---|---|---|
| अनद्यतन: (लङ्लकार:) | **परोक्ष:** (लिट्लकार:) | सामान्य:/अद्यतन: (लुङ्लकार:) |
| अगच्छत् | **जगाम** | अगमत् |

**परोक्षभूतकाल:** अतिप्राचीनत्वं सूचयति । **परोक्ष:** नाम अक्ष्णो: परम् ।

| परोक्षभूतकालस्य प्रकारद्वयम् | |
|---|---|
| **अभ्यस्त:** | **आमन्त:** |
| प्रथमत: नवमगणपर्यन्तम् धातव: (केचन अपवादा:) | दशमगणीया: धातव:, णिजन्ता: (प्रयोजका:), ई/ऊ/ ऋ/ए/ओ – स्वरादय: धातव: तथा च केचन अन्ये धातव: । |

परस्मैपदम् **लिट्–प्रत्यया:** आत्मनेपदम्

| ए.व. | द्विव. | ब.व. | पुरुष: | ए.व. | द्विव. | ब.व. |
|---|---|---|---|---|---|---|
| अ | अतुस् (अतु:) | उस् (उ:) | प्रथमपुरुष: | ए | आते | इरे |

### अभ्यस्त–लिट्लकार: (परोक्षभूतकाल:)

अभ्यास: नाम पुनरावृत्ति: । अत: प्रथमवर्णस्य पुनरावृत्ति: यस्मिन् भवति, स: अभ्यस्त: परोक्षभूतकाल:।

यथा दा – ददौ ददतु: ददु: ।

पा – पपौ पपतु: पपु: ।

ज्ञा – जज्ञौ जज्ञतु: जज्ञु: ।

दृश् – ददर्श ददृशतु: ददृशु: ।

या – ययौ ययतु: ययु: ।

### लिट्–रूपाणि (प. प.)

| धातु: | प्र.पु. ए.व | प्र.पु. द्विव. | प्र.पु. ब.व. | धातु: | प्र.पु. ए.व | प्र.पु. द्विव. | प्र.पु. ब.व. |
|---|---|---|---|---|---|---|---|
| गम् (१ प.प.) | जगाम | जग्मतु: | जग्मु: | वच् (२ प.प.) | उवाच | ऊचतु: | ऊचु: |
| चर् (१ प.प.) | चचार | चेरतु: | चेरु: | हन् (२ प.प.) | जघान | जघ्नतु: | जघ्नु: |
| तृ (१ प.प.) | ततार | तेरतु: | तेरु: | लिख् (६ प.प.) | लिलेख | लिलिखतु: | लिलिखु: |
| नम् (१ प.प.) | ननाम | नेमतु: | नेमु: | नृत् (४ प.प.) | ननर्त | ननृततु: | ननृतु: |
| पत् (१ प.प.) | पपात | पेततु: | पेतु: | शक् (५ प.प.) | शशाक | शेकतु: | शेकु: |
| नी (१ प.प.) | निनाय | निन्यतु: | निन्यु: | श्रु (५ प.प.) | शुश्राव | शुश्रुवतु: | शुश्रुवु: |
| बुध (१ प.प.) | बुबोध | बुबुधतु: | बुबुधु: | बन्ध् (९ प.प.) | बबन्ध | बबन्धतु: | बबन्धु: |
| दा (३ प.प.) | ददौ | ददतु: | ददु: | क्रुश् (१ प.प.) | चुक्रोश | चुक्रुशतु: | चुक्रुशु: |
| मुच् (६ प.प.) | मुमोच | मुमुचतु: | मुमुचु: | भू (१ प.प.) | बभूव | बभूवतु: | बभूवु: |
| भुज् (७ प.प.) | बुभोज | बुभुजतु: | बुभुजु: | वस् (१ प.प.) | उवास | ऊषतु: | ऊषु: |
| कृ (८ प.प.) | चकार | चक्रतु: | चक्रु: | अस् (२ प.प.) | आस | आसतु: | आसु: |
| ज्ञा (९ प.प.) | जज्ञौ | जज्ञतु: | जज्ञु: | भञ्ज् (७ प.प.) | बभञ्ज | बभञ्जतु: | बभञ्जु: |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| लिट्–रूपाणि (आ. प.) | | | | | | | |
|---|---|---|---|---|---|---|---|
| धातुः | प्र.पु. ए.व. | प्र.पु. द्विव. | प्र.पु. ब.व. | धातुः | प्र.पु. ए.व. | प्र.पु. द्विव. | प्र.पु. ब.व. |
| भाष् (१ आ.प.) | बभाषे | बभाषाते | बभाषिरे | बुध् (१ आ. प.) | बुबुधे | बुबुधाते | बुबुधिरे |
| रम् (१ आ.प.) | रेमे | रेमाते | रेमिरे | दा (३ आ.प.) | ददे | ददाते | ददिरे |
| वन्द् (१ आ.प.) | ववन्दे | ववन्दाते | ववन्दिरे | मुच् (६ आ.प.) | मुमुचे | मुमुचाते | मुमुचिरे |
| वृध् (१ आ.प.) | ववृधे | ववृधाते | ववृधिरे | भुज् (७ आ.प.) | बुभुजे | बुभुजाते | बुभुजिरे |
| मन् (४ प.प.) | मेने | मेनाते | मेनिरे | कृ (८ आ.प.) | चक्रे | चक्राते | चक्रिरे |
| नी (१ आ.प.) | निन्ये | निन्याते | निन्यिरे | ज्ञा (९ आ.प.) | जज्ञे | जज्ञाते | जज्ञिरे |

**आमन्त–लिट्लकारः (परोक्षभूतकालः)**

मूलधातुः + विकरणम् + आम् = आमन्त–अङ्गम् + अस्/भू/कृ (अभ्यस्तरूपाणि) = आमन्तक्रियापदम्

| | | | | | | |
|---|---|---|---|---|---|---|
| पूज् | + अय | + आम् = | पूजयाम् | + | आस | पूजयामास |
| | | | | | बभूव | पूजयाम्बभूव |
| | | | | | चकार | पूजयाञ्चकार |
| | | | | | चक्रे | पूजयाञ्चक्रे |

| धातुः | प्र.पु.ए.व. | प्र.पु. द्विव. | प्र.पु. ब.व. |
|---|---|---|---|
| कथ् (१० उ.प.) (प.प.) (आ.प.) | कथयामास<br>कथयाम्बभूव<br>कथयाञ्चकार<br>कथयाञ्चक्रे | कथयामासतुः<br>कथयाम्बभूवतुः<br>कथयाञ्चक्रतुः<br>कथयाञ्चक्राते | कथयामासुः<br>कथयाम्बभूवुः<br>कथयाञ्चक्रुः<br>कथयाञ्चक्रिरे |
| पूज् (१० उ.प.) (प.प.) (आ.प.) | पूजयामास<br>पूजयाम्बभूव<br>पूजयाञ्चकार<br>पूजयाञ्चक्रे | पूजयामासतुः<br>पूजयाम्बभूवतुः<br>पूजयाञ्चक्रतुः<br>पूजयाञ्चक्राते | पूजयामासुः<br>पूजायाम्बभूवुः<br>पूजयाञ्चक्रुः<br>पूजयाञ्चक्रिरे |
| ईक्ष् (१ आ.प.) | ईक्षामास<br>ईक्षाम्बभूव<br>ईक्षाञ्चक्रे | ईक्षामासतुः<br>ईक्षाम्बभूवतुः<br>ईक्षाञ्चक्राते | ईक्षामासु<br>ईक्षाम्बभुवुः<br>ईक्षाञ्चक्रिरे |
| गम् (णिजन्त) | गमयामास<br>गमयाम्बभूव<br>गमयाञ्चकार<br>गमयाञ्चक्रे | गमयामासतुः<br>गमयाम्बभूवतुः<br>गमयाचक्रतुः<br>गमयाञ्चक्राते | गमयामासुः<br>गमयाम्बभूवुः<br>गमयाञ्चक्रुः<br>गमयाञ्चक्रिरे |

**योग्य–लिट्रूपैः वाक्यानि पूरयत ।**

१) कंसं ______ कृष्णः । (हन्)
२) अप्सरसः स्वर्गे ______ । (नृत्)
३) अर्जुनः बाणं ______ । (मुच्)
४) पुरा ऋषयः हिमालये ______ । (वस्)
५) वाल्मीकिः रामायणं ______ । (रच्)
६) व्यासः महाभारतं ______ (कथ्) गणेशः च ______ । (लिख्)
७) गन्धर्वाः दुर्योधनं ______ । (बन्ध्)
८) लवकुशौ श्रीरामं ______ । (वन्द्)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# (क) वाच्यपरिवर्तनम् ।



अस्माभिः कर्तृवाच्यं कर्मवाच्यं च गतवर्षे पठिते । कर्तृवाच्यं क्रियापदं कर्तृपदं बोधयति । कर्मवाच्यं क्रियापदं कर्मपदं बोधयति । एतानि उदाहरणानि पश्यत ।

राम: ग्रन्थं पठति ।
कर्तृपदं कर्मपदं क्रियापदम्

अत्र 'ग्रन्थम्' इति कर्मपदम् ।

यदा क्रिया कर्मपदम् अपेक्षते तदा ते धातवः **सकर्मकाः** इति कथ्यन्ते । तानि वाक्यानि सकर्मकाणि कर्तृवाच्यानि भवन्ति ।

राम: पतति ।
कर्तृपदम् क्रियापदम्

अत्र **कर्मपदं नास्ति** ।

अन्य-कर्मपदस्य अपेक्षा यत्र न वर्तते ते धातवः **अकर्मकाः** इति कथ्यन्ते । तानि वाक्यानि कर्तृवाच्यानि एव, किन्तु अकर्मकाणि भवन्ति ।

**अकर्मकाः धातवः –**

केचन धातवः कर्मपदं न अपेक्षन्ते ते सर्वे अकर्मकाः इति कथ्यन्ते । भवति, पतति, तिष्ठति, वर्धते, रमते, जीवति, म्रियते, निद्राति, अस्ति, क्रन्दति इत्यादयः ।

**कानिचन उदाहरणानि पश्यन्तु –**

बालकः उत्तिष्ठति । राधा लज्जते ।
माता जागर्ति । सिंहः म्रियते ।
शशकः बिभेति । प्राची उपविशति । इ.

कारिका –
**लज्जा-सत्ता-स्थिति-जागरणम्**
**वृद्धि-क्षय-भय-जीवित-मरणम् ।**
**शयन-क्रीडा-रुचि-दीप्त्यर्थम्**
**धातुगणं तमकर्मकमाहुः ।।**

**अधोदत्तानि वाक्यानि पठन्तु –**

राम: ग्रन्थं पठति । (**सकर्मकं कर्तृवाच्यम्**)
सीता चित्रं पश्यति । (**सकर्मकं कर्तृवाच्यम्**)
सारिका हसति । (**अकर्मकं कर्तृवाच्यम्**)
अभिषेकः उपविशति । (**अकर्मकं कर्तृवाच्यम्**)

**पठत-बोधत**

**कर्तृवाच्यम् –** कर्तरि प्रथमा यत्र द्वितीयाऽथ च कर्मणि ।
कर्तृवाच्यं भवेत् तत्तु क्रिया कर्त्रानुसारिणी ।।

**कर्मवाच्यम् –** कर्मणि प्रथमा यत्र तृतीयाऽथ च कर्तरि ।
कर्मवाच्यं भवेत् तत्तु क्रिया कर्मानुसारिणी ।।

**भाववाच्यम् –** भाववाच्ये क्रिया वक्ति न कर्तरि न कर्मणि ।
तत्र कर्ता तृतीयायां क्रिया भावानुसारिणी ।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अधुना वाच्यपरिवर्तनं पश्याम: ।

**सकर्मकं कर्तृवाच्यम्** → **कर्मवाच्यम्**

राम: ग्रन्थं पठति । — रामेण ग्रन्थ: पठ्यते ।

बालक: ग्रन्थान् पठति । — बालकेन ग्रन्था: पठ्यन्ते ।

| **राम:** | ग्रन्थं | **पठति ।** |
|---|---|---|
| कर्तृपदम् | कर्मपदम् | क्रियापदम् |
| प्रथमा (१) | द्वितीया (२) | प्रथमान्तपदानुसारम् (१) |

| रामेण | **ग्रन्थ:** | **पठ्यते ।** |
|---|---|---|
| कर्तृपदम् | कर्मपदम् | क्रियापदम् |
| तृतीया (३) | प्रथमा (१) | प्रथमान्तपदानुसारम् (१) |

**अकर्मकं कर्तृवाच्यम्** → **भाववाच्यम्**

मधुरा पतति । — मधुरया पत्यते ।

बालिका: पतन्ति । — बालिकाभि: पत्यते ।

| **मधुरा** | | **पतति ।** |
|---|---|---|
| कर्तृपदम् | कर्मपदम् | क्रियापदम् |
| प्रथमा (१) | नास्ति (०) | प्रथमान्तपदानुसारम् (१) |

| मधुरया | | **पत्यते ।** |
|---|---|---|
| कर्तृपदम् | कर्मपदम् | क्रियापदम् |
| तृतीया (३) | नास्ति (०) | नित्यं प्रथमपुरुष-एकवचने (१) |

| **कर्तृवाच्यम्** | **कर्मवाच्यम्** |
|---|---|
| **बालक:** श्लोकं **गायति** । | बालकेन **श्लोक: गीयते** । |
| **माला** पुष्पाणि **नयति** । | मालया **पुष्पाणि नीयन्ते** । |
| **अहं** मुकुन्दं **स्मरामि** । | मया **मुकुन्द: स्मर्यते** । |
| **त्वं** रोटिका: करोषि । | _____ रोटिका: क्रियन्ते । |
| सूर्य: प्रकाशं ददाति । | _____ प्रकाश: दीयते । |
| माता अस्मान् ताडयति । | _____ वयं ताड्यामहे । |
| पिता त्वाम् उपदिशति । | पित्रा _____ उपदिश्यसे । |
| ऋषि: युष्मान् वदति । | ऋषिणा _____ उद्यध्वे । |
| त्वं मां पृच्छसि । | त्वया _____ पृच्छ्ये । |
| _____ _____ _____ । | मया माता वन्द्यते । |
| राजा मन्त्रिणम् आह्वयति । | राज्ञा मन्त्री आहूयते । |
| शृगाल: मृगकाकौ पश्यति । | _____ _____ _____ । |

अन्यलकारेषु प्रयोगपरिवर्तनम् ।

| | |
|---|---|
| **बालक:** श्लोकम् **अगायत्** । | बालकेन **श्लोक: अगीयत** । |
| **बालक:** श्लोकं **गायतु** । | बालकेन **श्लोक: गीयताम्** । |
| **बालक:** श्लोकं **गायेत्** । | बालकेन **श्लोक: गीयेत** । |

## जिज्ञासापत्रम्



**१) वाच्यपरिवर्तनं कुरुत ।**

अ) साधव: ईश्वरं नमन्ति । आ) हरि: भक्तान् रक्षति । इ) ब्रह्मा विश्वं निर्माति ।

ई) गर्दभेन भार: उह्यते । उ) पक्षिभि: नीडानि रच्यन्ते । ऊ) विघ्नहर्ता मोदकौ खादति ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## सप्तमः पाठः संस्कृतनाट्यस्तबकः । (सरलार्थलेखनार्थम्)

### प्रथमं पुष्पम्

संस्कृतकविषु कालिदासस्य स्थानम् अनन्यसाधारणम् । 'अभिज्ञानशाकुन्तलम्' इति तस्य प्रसिद्धं नाटकम्। तस्य काव्यनाटकेषु भारतीयसंस्कृतेः मूल्यानां च प्रतिबिम्बं दृश्यते । इदानीन्तनकालेऽपि तस्य साहित्यं जनान् रञ्जयति ।



(ततः प्रविशति वैखानसः, अन्यौ तापसौ च)

वैखानसः – (राजानम् अवरुध्य) राजन् ! आश्रममृगोऽयं, न हन्तव्यः, न हन्तव्यः । आशु प्रतिसंहर सायकम्। राज्ञां शस्त्रम् आर्तत्राणाय भवति न तु अनागसि प्रहर्तुम् ।

दुष्यन्तः – प्रतिसंहृत एषः सायकः । (यथोक्तं करोति)

वैखानसः – राजन् ! समिदाहरणाय प्रस्थिता वयम् । एष खलु कण्वस्य कुलपतेः अनुमालिनीतीरमाश्रमो दृश्यते। प्रविश्य प्रतिगृह्यताम् आतिथेयः सत्कारः ।

दुष्यन्तः – तपोवननिवासिनामुपरोधो मा भूत् । अत्रैव रथं स्थापय यावदवतरामि ।

सूतः – धृताः प्रग्रहाः । अवतरतु आयुष्मान् ।

दुष्यन्तः – (अवतीर्य) सूत, विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम । इदं तावत् गृह्यताम् । (इति सूतस्याभरणानि धनुश्चोपनीय) सूत, यावदाश्रमवासिनः दृष्ट्वाऽहमपावर्ते तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः।

सूतः – तथा । (इति निष्क्रान्तः ।)

### भाषाभ्यासः

१) **माध्यमभाषया उत्तरत ।** दुष्यन्तस्य कानि स्वभाववैशिष्ट्यानि ज्ञायन्ते ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



शूद्रकविरचितं 'मृच्छकटिकम्' संस्कृतनाट्यवाङ्मये वैशिष्ट्यपूर्णं खलु । चारुदत्तस्य पुत्रः रदनिकां 'सुवर्णशकटिकां' याचते किन्तु निर्धनः चारुदत्तः शकटं दातुं न शक्नोति । तदा एव वसन्तसेना तत्र आगच्छति। सोऽयं प्रसङ्गः ।



**रदनिका** – एहि वत्स! शकटिकया क्रीडावः ।

**दारकः** – (सकरुणम्) रदनिके! किं मम एतया मृत्तिकाशकटिकया; तामेव सौवर्णशकटिकां देहि ।

**रदनिका** – (सनिर्वेदं निःश्वस्य) जात! कुतोऽस्माकं सुवर्णव्यवहारः? तातस्य पुनरपि ऋद्ध्या सुवर्णशकटिकया क्रीडिष्यसि। (स्वगतम्) तद्यावद्विनोदयाम्येनम् । आर्यावसन्तसेनायाः समीपमुपसर्पिष्यामि । (उपसृत्य) आर्ये! प्रणमामि ।

**वसन्तसेना** – रदनिके! स्वागतं ते । कस्य पुनरयं दारकः? अनलङ्कृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम्।

**रदनिका** – एष खलु आर्यचारुदत्तस्य पुत्रो रोहसेनो नाम ।

**वसन्तसेना** – (बाहू प्रसार्य) एहि मे पुत्रक! अनुकृतमनेन पितुः रूपम् । अथ किं निमित्तमेष रोदिति?

**रदनिका** – एतेन प्रतिवेशिक-दारकस्य सुवर्णशकटिकया क्रीडितम्, तेन च सा नीता, ततः पुनस्तां याचते ततो मया इयं मृत्तिकाशकटिका कृत्वा दत्ता । ततो भणति..'रदनिके! किं मम एतया मृत्तिका-शकटिकया, तामेव सौवर्णशकटिकां देहि' इति ।

**वसन्तसेना** – हा धिक्, हा धिक् । मा रुदिहि, तद् गृहाणैतमलङ्कारम्, सौवर्णशकटिकां घटय ।

(इति दारकमादाय निष्क्रान्ता रदनिका ।)

## भाषाभ्यासः

**१) माध्यमभाषया उत्तरत ।** रोहसेनः किमर्थं रोदिति ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## तृतीयं पुष्पम्

भासः इति संस्कृतनाट्यसृष्टेः प्रथमः नाटककारः । तस्य शैली सुबोधा सरसा च । भासनाटकचक्रे महाभारतकथाम् अनुसृत्य लिखितः शोकात्मकः एकाङ्कः नाम 'कर्णभारम्' । अस्मिन् प्रसङ्गे शक्रः नाम इन्द्रः याचकरूपेण आगत्य कर्णं कवचकुण्डलानि याचते ।



(ततः प्रविशति याचकरूपेण शक्रः ।)

शक्रः – (कर्णमुपगम्य) भोः कर्ण, महत्तरां भिक्षां याचे ।

कर्णः – दृढं प्रीतोऽस्मि भगवन् । एषोऽहं नमस्करोमि ।

शक्रः – (आत्मगतम्) किं नु खल्वहं वदामि ? यदि दीर्घायुर्भवेति वदेयम् दीर्घायुर्भवेत् । यदि न वदेयम् मूढ इति मां परिभवति । तस्माद् उभयं परिहृत्य किं नु खलु भाषे ? भवतु, दृष्टम् । (प्रकाशम्) भोः कर्ण, सूर्य इव, चन्द्र इव, हिमवान् इव, सागर इव तिष्ठतु ते यशः ।

कर्णः – भगवन्, किं नोक्तम् दीर्घायुर्भवेति ? अथवा यदुक्तं तदेव शोभनम् । यतः हतेषु देहेषु गुणाः धरन्ते । भगवन्, किमिच्छसि ? किमहं ददामि ?

शक्रः – महत्तरां भिक्षां याचे ।

कर्णः – महत्तरां भिक्षां भवते प्रदास्ये । गोसहस्रं ददामि ।

शक्रः – गोसहस्रमिति ? मुहूर्तकं क्षीरं पिबामि । नेच्छामि कर्ण, नेच्छामि ।

कर्णः – किं नेच्छति भवान् ? अपर्याप्तं कनकं दास्यामि ।

शक्रः – गृहीत्वा गच्छामि । नेच्छामि कर्ण, नेच्छामि ।

कर्णः – तेन हि जित्वा पृथिवीं ददामि ।

शक्रः – पृथिव्या किं करिष्यामि । नेच्छामि कर्ण, नेच्छामि ।

कर्णः – अथवा मच्छिरो ददामि ।

शक्रः – अविहा । अविहा ।

कर्णः – न भेतव्यम् न भेतव्यम् । अन्यदपि श्रूयताम् । अङ्गैः सहैव जनितं कवचं कुण्डलाभ्यां सह ददामि ।

शक्रः – (सहर्षम्) ददातु, ददातु ।

### भाषाभ्यासः

१) माध्यमभाषया उत्तरत । शक्रस्य कपटं विशदीकुरुत ।

73CR1U




Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com

# अष्टमः पाठः  वाचनप्रशंसा । (सरलार्थलेखनार्थम्)

डॉ. ए. पी. जे. अब्दुलकलाममहोदयः 'मिसाईल मॅन' इति बिरुदेन ख्यातः। तस्य जीवने तेन छात्राणां शैक्षणिकविकासार्थं नैके यत्नाः कृताः। १५ ऑक्टोबर इति तस्य जन्मदिनं 'वाचनप्रेरणादिवसरूपेण' आचर्यते । विविधानां ग्रन्थानां, लघुग्रन्थानां, वृत्तपत्राणां वाचनेन मनुष्ये के गुणाः विकसिताः भवन्ति, इत्यादयः विषयाः पद्येऽस्मिन् वर्णिताः सन्ति ।



- पाठ्यपुस्तकं विहाय यूयं किं किं पठथ ?
- साहित्यस्य के प्रकाराः भवन्ति ?
- अपि यूयं प्रतिदिनं वृत्तपत्रं पठथ ?



शीलं सद्गुणसम्पत्तिः ज्ञानं विज्ञानमेव च ।
उत्साहो वर्धते येन वाचनं तद् हितावहम् ।।१।।

मनुजा वाचनेनैव बोधन्ते विषयान् बहून् ।
दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुताः ।।२।।

वाल्मीकिव्यासबाणाद्याः प्राचीनाः कविपण्डिताः ।
तान् शिक्षयन्ति सततं ये सदा वाचने रताः ।।३।।

अद्ययावद्धि ज्ञानाय वृत्तपत्रं पठेत्सदा ।
सर्वविधसुविद्यार्थं वाचनमुपकारकम् ।।४।।

वृथाभ्रमणकुक्रीडापरपीडापभाषणैः ।
कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत् ।।५।।

वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम् ।
वार्धक्ये दुःखहरणं हितं सद्ग्रन्थवाचनम् ।।६।।

**१) सन्धिविग्रहाः** – १) विज्ञानमेव = विज्ञानम् + एव। २) उत्साहो वर्धते = उत्साहः + वर्धते ।
**अन्वयः** – येन शीलं, सद्गुणसम्पत्तिः, ज्ञानं, विज्ञानम् उत्साहः च वर्धते तद् वाचनं हितावहम् एव ।

**२) सन्धिविग्रहाः** – १) वाचनेनैव = वाचनेन + एव । २) दक्षा भवन्ति = दक्षाः + भवन्ति ।
**अन्वयः** – मनुजाः वाचनेन एव बहून् विषयान् बोधन्ते । वाचनेन (मनुजाः) कार्येषु दक्षाः बहुश्रुताः (च)भवन्ति।

**३) अन्वयः** – ये सदा वाचने रताः तान् वाल्मीकि-व्यास-बाणाद्याः प्राचीनाः कविपण्डिताः शिक्षयन्ति।

**४) सन्धिविग्रहाः** – १) अद्ययावद्धि = अद्ययावत् + हि । २) पठेत्सदा = पठेत् + सदा ।
३) वाचनमुपकारकम् = वाचनम् + उपकारकम् ।
**अन्वयः** – मनुजः अद्ययावद् ज्ञानाय वृत्तपत्रं सदा हि पठेत् । सर्वविधसुविद्यार्थं वाचनम् उपकारकम् (वर्तते) ।

**५) सन्धिविग्रहाः** –१) कालक्षेपो न = कालक्षेपः + न । २) कर्तव्यो विद्यार्थी = कर्तव्यः + विद्यार्थी।
**अन्वयः** – (विद्यार्थिभिः) वृथाभ्रमण-कुक्रीडा-परपीडा-अपभाषणैः कालक्षेपः न कर्तव्यः । विद्यार्थी वाचनं श्रयेत् ।

**६) अन्वयः** – वाचनं बाल्ये ज्ञानदं, तारुण्ये शीलरक्षकम्, वार्धक्ये दुःखहरणं (भवति) (अतः) सद्ग्रन्थवाचनं हितं (भवति)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## भाषाभ्यासः

**१. पूर्णवाक्येन उत्तरं लिखत ।**

अ) वाचनेन के गुणाः वर्धन्ते ?

आ) वाचनेन मनुजाः किं बोधन्ते ?


इ) विद्यार्थिना कथं कालक्षेपः न कर्तव्यः ?

**२. समानार्थकशब्दान् लिखत ।**


शीलम्, दक्षः, रताः, कालक्षेपः, वार्धक्यम्, पण्डितः

**३. जालरेखाचित्रं पूरयत ।**


अ)




आ)




इ)




**४. विरुद्धार्थकशब्दान् लिखत ।**

सद्गुणः, उत्साहः, प्राचीनाः, उपकारकम्

**५. सन्धिविग्रहं कुरुत ।**

अ) वाचनेनैव आ) अद्ययावद्धि

**६. विशेषण-विशेष्याणां मेलनं कुरुत ।**

| विशेषणम् | विशेष्यम् |
|---|---|
| उपकारकम् | मनुजाः |
| प्राचीनाः | विषयान् |
| दक्षाः | वाचनम् |
| बहून् | कविपण्डिताः |

**उपक्रमः** **मम प्रियं पुस्तकम् ।**

अ) नाम

आ) लेखकः

इ) भाषा

ई) प्रकारः

ए) विषयः

ऐ) किमर्थम् अरोचत ?

ओ) लेखनविशेषः

इत्यधिकृत्य कक्षायां चर्चां कुरुत ।

**पठत-बोधत**

**पठनस्य दोषाः**

**गीती शीघ्री शिरःकम्पी यथालिखितपाठकाः ।**
**अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाऽधमाः ॥**

**उच्चारणविषयकश्लोकः ।**

**व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत् ।**
**भीता पतनभेदाभ्यां तद्वद् वर्णान् प्रयोजयेत् ॥**

73LH3H




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# नवमः पाठः धेनोर्व्याघ्रः पलायते ।

पुरा भोजराजेन समस्या उद्घोषिता आसीत्, 'मृगात् सिंहः पलायते' इति । सृष्टिनियमविरुद्धं किञ्चित् प्रतिपादितं तत्र । तथापि नैकैः कविभिः सा समस्या विभिन्नप्रकारैः पूरिता । ईदृशी एव काचित् समस्या समुत्पन्ना 'चिमणरावस्य' जीवने । चिमणरावः नाम चि. वि. जोशी इति लेखककवर्येण निर्मितम् अजरामरपात्रम्। 'चिमणरावाचे चऱ्हाट' इति कथासङ्ग्रहात् 'कॅप्टन चिमणराव-स्काउटमास्तर' इति कथायाः अयम् अनुवादः। 'स्काउट्' नाम 'बालवीरचमूः' । बाल्यादारभ्य एव परोपकारस्य, शौर्यस्य, परस्परसहकार्यस्य, समाजसेवायाः च संस्कारान् मनसि रोपयितुम् आरब्धा काचित् यन्त्रणा एषा । एतादृशं बालसैन्यं निर्मातव्यम् इति चिमणरावस्य महती आकाङ्क्षा आसीत् । तादृशं गणं निर्माय विरामकाले बनेश्वरग्रामं शिबिरार्थं सर्वे सम्प्राप्ताः। शिबिरसमये परोपकारस्य कथम् अवसरः लब्धः कः च अनवस्थाप्रसङ्गः उद्भूतः इति स्वयं निवेदयति चिमणरावः। कथायाम् अस्यां प्रासङ्गिकः, शाब्दिकः तथा चिमणरावस्य स्वभाववैशिष्ट्येन निर्मितः सरलः विनोदः वाचकस्य मुखे नूनं स्मितरेखां जनयति । कथा एषा **'समर्पणम्'** वार्षिकाङ्कात् स्वीकृता ।

शिबिरस्य प्रथमदिने एव भोजनादिकं समाप्य मध्याह्ने बालैः सह पत्रक्रीडायां मग्नः आसम् अहम् । तदा सद्यः एव परिचितः प्रोफेसर-सर्कसवाले (सर्कस-क्रीडारङ्गस्य स्वामी) मामेव अन्विष्यन् तत्र समागतः । ''कॅप्टनसाहेब, शृणोतु कॅप्टनसाहेब ! अस्माकं सर्कसक्रीडायां कतिपयेभ्यः मासेभ्यः लोकप्रियः सहभोजनकार्यक्रमः प्रचलति । गौः, भल्लूकः व्याघ्रश्च इत्येतेषाम् पशूनाम् अयं कार्यक्रमः प्रयोगस्य सर्वोच्चम् आकर्षणम् अस्ति । तथा विज्ञापनं कृत्वा प्रवेशपत्राणि अपि विक्रीतानि । परन्तु व्याघ्र-भल्लूकयोः कलहकारणात् द्वावपि व्रणितौ ।'' ''किं प्राणिनोः कलहः?'' ''महाशय, अस्माकं सर्कसक्रीडायां तु व्याघ्र-भल्लूकौ द्विपादौ एव ।'' एवं प्राध्यापकमहाशयेन रहस्यभेदः कृतः। ''नास्ति अस्माकम् सामर्थ्यं व्याघ्रं वा भल्लूकं वा पालयितुम् । क्रीडायां द्वौ बहुरूपधारिणौ नरौ एव व्याघ्रं भल्लूकं च नाटयतः ।'' ''किं धेनुरपि...?'' ''नहि नहि, धेनुस्तु वास्तविकी एव ।'' ''हंऽऽ .. कथयतु तर्हि किं मया करणीयम् अत्र?'' ''अहं प्रार्थये यत् भवतः बालवीरचमूतः कौ अपि द्वौ सैनिकौ अद्यतनक्रीडायां यदि व्याघ्र-भल्लूकवेषौ धृत्वा प्रेक्षकाणां मनोरञ्जनं कुर्यातां तर्हि महान् उपकारः स्यात्। कृपया साहाय्यं करोतु ।''





Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सर्कसस्वामिनः विवशता मया अवगता । यदृच्छया प्राप्तः अयं परोपकारस्य अवसरः इति मत्वा तस्य साहाय्यं करणीयमिति मया निश्चितम् । भल्लूकवेषे अब्दुलः शोभेत इति मत्वा सः भल्लूकपात्रे नियोजितः । व्याघ्रस्य अभिनयार्थम् अहं स्वयमेव सिद्धः। एवं पात्रयोजना निर्धारिता ।

कार्यक्रमात् प्रागेव अहं तथा अब्दुलः व्याघ्रभल्लूकवेषौ धृत्वा स्वपञ्जरयोः समुपस्थितौ। मम पञ्जरस्य पुरतः एव अधिकः सम्मर्दः जातः । यावच्छक्यम् अहं जनान् रञ्जयितुं प्रयत्तवान् किन्तु जनाः न सन्तुष्टाः । ''किमयं व्याघ्रः? कृशोऽयम्'' इति उपहासेन अवदन् । तदा एव एका महिला स्वपुत्रेण सह व्याघ्रं द्रष्टुम् आगता। मम गर्जनया बालः भीतः अतः सा माता मयि पाषाणखण्डान् अक्षिपत् । तदा वेदनया बाधितः अहं क्षणं यावत् व्याघ्रः न वदति इति विस्मृत्य अवदम्,

''दृष्ट्वा पञ्जरस्थितान् व्याघ्रान्, महिलाः क्षिपन्ति पाषाणखण्डान् ।''

मम वाक्यसमाप्तेः पूर्वमेव व्याघ्रस्य मनुष्यवाण्या भाषणेन मूर्च्छिता सा महिला 'भूतोऽयं भूत'...इति उच्चैः आक्रोशन्ती भूमौ पतिता । मम पुत्रः राघुः अपि एकवारं पञ्जरसमीपम् आगत्य, ''आप्पा ! चायं पातुम् इच्छति किम्?'' इति यदा पृष्टवान् तदा प्रेक्षकाः सम्भ्रान्ताः एव ।

रात्रौ दशवादने सर्कसक्रीडायाः प्रारम्भः जातः । द्वादशवादने क्रीडायाः चरमबिन्दुः समायातः-सहभोजनम्। प्रेक्षकाणाम् उत्कण्ठायाः पराकाष्ठा जाता । सेवकः मञ्चे त्रीणि आसनानि स्थापितवान् मध्यभागे च वर्तुलाकारं पीठम् । अहम् एकस्मिन् आसने उपावेशितः । अत्रान्तरे भल्लूकवेषधारी अब्दुलः तत्र प्राप्तः। गौः अपि मञ्चं समागता। ततः अस्माकं पुरतः खाद्यस्य योजना कृता । सहभोजनस्य प्रारम्भे जाते उत्तेजितैः प्रेक्षकैः आनन्देन तालिकावादनम् आरब्धम् । पूर्वमपि व्याघ्रभल्लूकौ मानुषौ एव । तथापि सा धेनुः ताभ्यां सह कार्यक्रमं कर्तुम् अभ्यस्ता आसीत् । अचिरादेव न इमौ परिचितौ व्याघ्रभल्लूकौ इति धेनुना लक्षितम्। सम्भ्रमेण संशयेन च एकैकशः आवां दृष्टवती। यदा च तस्याः प्रत्ययः जातः तदा शृङ्गे उन्नम्य नौ आक्रामत् । अहमपि गर्जनां कृत्वा तीक्ष्णदन्तान् दर्शितवान्। किन्तु न किञ्चिदपि भयं तस्याः। अब्दुलः तां हस्तेन ताडितवान्। तेन क्षुब्धा सा तम् अन्वधावत् । भल्लूकः तदा चापल्येन पटमण्डपस्तम्भम् आरूढवान् । इयं सर्वा क्रीडा पूर्वनियोजिता इति विचिन्त्य प्रेक्षकाः अपि प्रमुदिताः । भल्लूकः निर्गतः इति क्रुद्धा सा धेनुः अधुना व्याघ्रं माम् लक्ष्यं कृतवती ।

भीत्या अहं चतुष्पादविशिष्टं व्याघ्रत्वं विस्मृत्य द्विपादं मूलस्वरूपमाश्रितवान् । ''प्राध्यापकमहाशय, परित्रायतां, परित्रायताम्'' इति करुणं विलपन् अधावम् । तदा धेनोः भीतं, पलायमानं व्याघ्रं दृष्ट्वा प्रेक्षागारे महान् कोलाहलः उत्पन्नः । प्रेक्षकाः मम व्याघ्रवेषं निष्कास्य मां निर्घृणं ताडितवन्तः । वेदनाभिः अहं मूर्च्छितः। यदा च जागरितः तदा अस्माकं शकटः पुनः पुण्यपत्तनदिशं प्रस्थितः आसीत् । मम उत्तमाङ्गम् अन्यानि च अनुत्तमानि अङ्गानि उपचारपट्टिकाभिः विभूषितानि आसन् ।

## भाषाभ्यासः



१. पूर्णवाक्येन उत्तरं लिखत।

अ) चिमणरावः कस्यां मग्नः?
आ) क्रीडायां कौ व्याघ्रं भल्लूकं च नाटयतः?
इ) महिला केन मूर्च्छिता?
ई) चिमणरावेण किं निश्चितम्?
उ) सर्कसक्रीडायाः प्रारम्भः कदा जातः?
ऊ) चिमणरावः किमर्थं प्रयत्तवान्?
ए) कैः आनन्देन तालिकावादनम् आरब्धम्?
ऐ) धेनुना किं लक्षितम्?
ओ) भल्लूकः कुत्र आरूढवान्?
औ) कदा प्रेक्षागारे महान् कोलाहलः उत्पन्नः?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**२. माध्यमभाषया उत्तरं लिखत ।**

अ) सर्कसस्वामी किमर्थं चिमणरावं प्रति आगतः ?

आ) सर्कसक्रीडायाः आरम्भात् पूर्वं किं किम् अभवत् ?

इ) पशूनां सहभोजनसमये कः हास्यपूर्णः अनवस्थाप्रसङ्गः समुत्पन्नः ?

**३. समानार्थकशब्दान् लिखत ।**

मग्नः, गौः, व्याघ्रः, सैनिकः, क्रीडा, वेदना, भाषणम्, उत्कण्ठा, मनुष्यः, शृङ्गे, दन्ताः, उत्तमाङ्गम्

**४. विरुद्धार्थकशब्दान् लिखत ।**

समाप्य, प्राक्, विस्मृत्य, कृशः

**५. प्रश्ननिर्माणं कुरुत ।**

अ) अहं बालैः सह पत्रक्रीडायां मग्नः आसम् ।

आ) धेनुः वास्तविकी एव ।

इ) सर्कसस्वामिनः विवशता मया अवगता ।

ई) भल्लूकवेशे अब्दुलः शोभेत ।

उ) महिला मयि पाषाणखण्डान् अक्षिपत् ।

ऊ) गौः मञ्चं समागता ।

**६. कः कं वदति ?**

अ) 'विज्ञापनं कृत्वा प्रवेशपत्राणि अपि विक्रीतानि ।'

आ) 'किं धेनुरपि ...?'

इ) 'चायं पातुम् इच्छति किम् ?'

**७. विशेषण-विशेष्याणां मेलनं कुरुत ।**

| विशेषणम् | विशेष्यम् |
|---|---|
| लोकप्रियः | आकर्षणम् |
| सर्वोच्चम् | शुल्कम् |
| बहुरूपधारिणौ | व्याघ्रान् |
| अधिकम् | प्रेक्षकाः |
| अधिकः | प्रेक्षकेषु |
| भीतः | सहभोजनकार्यक्रमः |
| पञ्जरस्थितान् | नरौ |
| सम्भ्रान्ताः | सम्मर्दः |
| त्रीणि | व्याघ्रभल्लूकौ |
| निमग्नेषु | बालः |
| परिचितौ | आसनानि |

**८. अमरकोषात् शब्दं प्रयुज्य वाक्यं पुनर्लिखत ।**

अ) धेनुः तु वास्तविकी एव ।

आ) मम उत्तमाङ्गम् उपचारपट्टिकाभिः विभूषितम् ।

**९. सूचनानुसारं कृतीः कुरुत ।**

अ) पत्रक्रीडायां मग्नः आसम् अहम् ।
(बहुवचने लिखत।)

आ) जनाः वन्यपशून् द्रष्टुम् आगच्छन्ति स्म ।
('स्म' निष्कासयत ।)

इ) जनाः न सन्तुष्टाः । (एकवचने लिखत)

ई) अहं विरोधं दर्शितवान् ।
(वाच्यपरिवर्तनं कुरुत)

उ) प्रेक्षकाः मां निर्घृणं ताडितवन्तः ।
(वाच्यपरिवर्तनं कुरुत ।)

73VI55



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



# समासा: ।




**समासा:**

- द्वन्द्वः
  - इतरेतरद्वन्द्वः
  - समाहारद्वन्द्वः
- तत्पुरुषः
  - विभक्ति-तत्पुरुषः
  - उपपद-तत्पुरुषः
  - नञ्-तत्पुरुषः
  - कर्मधारयः
    - विशेषण-विशेष्य-सम्बन्धः
    - विशेषनाम-सामान्यनाम-सम्बन्धः
    - उपमान-उपमेय-सम्बन्धः
- बहुव्रीहिः
- अव्ययीभावः


द्वन्द्वः तथा च विभक्ति-तत्पुरुषः इति प्रकारद्वयम् अस्माभिः गतवर्षे पठितम् ।
अधुना समासानाम् अन्यप्रकारान् जानीमः ।

## पुनःस्मारणम्

**१. समासविग्रहं कुरुत ।**




धनधान्यानि । ________



मृगशृगालौ । ________



शुकसारिकाः । ________



हस्तपादम् । ________



सस्यपूर्णम् । ________



जलव्यवस्थापनम् ________



अश्मखण्डः । ________



नीतिनिपुणः । ________




Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com

**२. उदाहरणैः रेखाचित्रं पूरयत ।**


अ)




आ)




इ)




**३. षष्ठीतत्पुरुषसमासस्य समस्तपदम् अन्विष्य तत्परितः वर्तुलम् आलिखत ।**

| | | | | | | |
|---|---|---|---|---|---|---|
| भ्र | म | ण | स | म | यः | म् |
| ज | नः | रा | ज | ध | र्मः | ऋ |
| ल | द्व | चः | पु | नि | रा | ज्ञः |
| व्य | वः | हा | स्त | कः | प | स्था |
| व | नि | क्षे | क | हो | क्रि | या |
| स्था | तो | त्र | प | अ | या | स |
| प | ञ् | प | ठ | सा | सि | म् |
| न | ऋ | तिः | न | म् | द्धिः | म् |
| म् | भ्र | म् | म् | स | म् | र्मः |

१. क्षेत्रस्य पतिः ।
२. जलस्य व्यवस्थापनम् ।
३. राज्ञः धर्मः ।
४. पुस्तकस्य पठनम् ।
५. भ्रमणस्य समयः ।
६. क्रियायाः सिद्धिः ।

**४. तालिकां पूरयत ।**

| सामासिकपदम् | विग्रहवाक्यम् | समासनाम |
|---|---|---|
| चिन्ताकुलः | ______ | तृतीया-तत्पुरुषः । |
| प्रजाहितदक्षः | प्रजाहिते दक्षः । | ______ |
| ______ | चोरलुण्ठकेभ्यः भयम् । | पञ्चमी-तत्पुरुषः । |
| विदेशगमनम् | ______ | द्वितीया-तत्पुरुषः । |
| ______ | चरणाभ्यां विकलः । | तृतीया-तत्पुरुषः । |
| पुस्तकपठनमग्नः | ______ | सप्तमी-तत्पुरुषः । |
| विद्याविहीनः | ______ | तृतीया-तत्पुरुषः । |
| भुजगयमिताः | भुजगैः यमिताः । | ______ |
| ______ | पूजायै इदम् । | ______ |
| मदान्धः | मदेन अन्धः । | ______ |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com


## १. तत्पुरुषः समासः ।

### उपपद–तत्पुरुषः ।


१. जलं ददाति
इति **जलदः** ।



२. पादैः पिबति
इति **पादपः** ।



३. पर्वते तिष्ठति
इति **पर्वतस्थः** ।



४. कुम्भं करोति
इति **कुम्भकारः** ।



**अवधेयम् – उपपद–तत्पुरुषः**

* उत्तरपदे धातोः अंशः दृश्यते ।
* विग्रहे तस्य धातोः लट्लकारस्य प्रथमपुरुषस्य योग्यं वचनं योजनीयम् । यथा –
  शास्त्रज्ञः – शास्त्रं जानाति इति ।
* तथा च अर्थदृष्ट्या पूर्वपदस्य योग्या विभक्तिः योजनीया । यथा –
  पङ्कजम् – पङ्के जायते इति ।

**उदाहरणानि –** वरदा – वरं ददाति इति । गृहस्थाः – गृहे तिष्ठन्ति इति । मधुपः – मधु पिबति इति ।
विद्यार्थी – विद्याम् अर्थयते इति । जटाधारी – जटाः धारयति इति ।


### नञ्–तत्पुरुषः ।



योग्यम्



न योग्यम् – **अयोग्यम्** ।



अल्पम्



न अल्पम् – **अनल्पम्** ।

**अवधेयम् – नञ्–तत्पुरुषः**

* प्रथमपदम् 'अ/अन्' इति नकारं दर्शयति ।
* विग्रहे 'अ'/अन् स्थाने 'न' इति प्रयोजनीयः ।

**उदाहरणानि –** अनिच्छा – न इच्छा । अशक्यम् – न शक्यम् ।
अनावश्यकम् – न आवश्यकम् । असत्यम् – न सत्यम् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## कर्मधारयः ।


### * विशेषण-विशेष्य-सम्बन्धः ।



रक्तं पुष्पम् ।
**रक्तपुष्पम् ।**




हरिताः शुकाः ।
**हरितशुकाः ।**



स्थूलः पुरुषः ।
**स्थूलपुरुषः ।**



विविधाः वर्णाः ।
**विविधवर्णाः ।**




दीर्घा यष्टिका ।
**दीर्घयष्टिका ।**




उन्नताः वृक्षाः ।
**उन्नतवृक्षाः ।**

### * विशेषनाम-सामान्यनाम-सम्बन्धः ।



विवेकानन्दः नाम महोदयः ।
**विवेकानन्दमहोदयः ।**



गङ्गा नाम नदी ।
**गङ्गानदी ।**




भारतः नाम देशः ।
**भारतदेशः ।**



सरस्वती नाम देवी ।
**सरस्वतीदेवी ।**



भास्करः नाम आचार्यः ।
**भास्कराचार्यः ।**




शेगाव इति स्थानकम्
**शेगावस्थानकम् ।**




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

✲ उपमान–उपमेय–सम्बन्धः ।

अ) कर्पूरः इव गौरः =   


कर्पूरः (उपमानम्) इव गौरः (साधर्म्यम्) = **कर्पूरगौरः** (महादेवः–उपमेयम्)

घनः इव श्यामः =   

घनः(उपमानम्) इव श्यामः (साधर्म्यम्) = **घनश्यामः**(श्रीकृष्णः–उपमेयम्)

आ) **पादपङ्कजम्** =  

पादौ (उपमेयम्) पङ्कजम् (उपमानम्) इव ।

**मुखकमलम्** =  

मुखम्(उपमेयम्) कमलम् (उपमानम्) इव।

इ) **विद्याधनम्** =  

विद्या(उपमेयम्) एव धनम् (उपमानम्) ।

**गृहमन्दिरम्** =  

गृहम् (उपमेयम्) एव मन्दिरम् (उपमानम्) ।

**अवधेयम् –**

**कर्मधारयः**

✲ **समस्तपदानां विग्रहे पूर्वपदम् उत्तरपदं च प्रथमान्तम् ।**

✲ **पूर्वपदं विशेषणं चेत् तद् विशेष्यस्य लिङ्गं, वचनं, विभक्तिम् अनुसरति ।**

**उदाहरणानि –**

अ) प्रियभाषा – प्रिया भाषा ।
सर्वप्रदेशाः – सर्वे प्रदेशाः ।
बहुजनाः – बहवः जनाः ।

आ) कमलकोमलः – कमलम् इव कोमलः ।
सूक्तिसुधा – सूक्तिः सुधा इव ।

इ) मनोमन्दिरम् – मनः एव मन्दिरम् ।
संसारसागरः – संसारः एव सागरः ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## २. बहुव्रीहिः समासः ।



वाहनं हि ते भवति मूषको **मूषकवाहन** नमोऽस्तु ते ।
कर्णौ तव रे शूर्पाकारौ **शूर्पकर्ण** हे नमोऽस्तुते ।।
आननं हि ते गजस्यैव हे देव **गजानन** नमोऽस्तु ते ।
कायस्तव रे महामहीयान् **महाकाय** हे नमोऽस्तु ते ।।१।।



चन्द्रस्ते शोभते भाले **भालचन्द्र** नमोऽस्तु ते ।
कण्ठस्ते विद्यते नीलो **नीलकण्ठ** नमोऽस्तु ते ।।३।।



गदा हस्ते यस्य सः **गदाहस्त** नमोऽस्तु ते ।
महत् बलं यस्य सः **महाबल** नमोऽस्तु ते ।।४।।

**अवधेयम् –**

**बहुव्रीहिः –** ✻ अन्यपदार्थप्रधानः ।
✻ नित्यं विशेषणं दर्शयति ।
✻ विग्रहे 'यद्' इत्यस्य उपयोगः सम्बन्धदर्शनाय भवति ।
✻ विग्रहे 'तद्' इत्यस्य उपयोगः अन्यपदं सूचयति ।

✻ **बहुव्रीहिः – उदाहरणानि**

**मूषकः वाहनं** यस्य सः मूषकवाहनः ।
**श्वेतम् अम्बरं** यस्याः सा श्वेताम्बरा ।
**शुभ्रं वस्त्रं** यस्याः सा शुभ्रवस्त्रा ।
**पीतम् अम्बरं** यस्य सः पीताम्बरः ।
**शूर्पौ इव कर्णौ** यस्य सः शूर्पकर्णः ।

✻ **बहुव्रीहिः – उदाहरणानि**

**शशी शेखरे** यस्य सः शशिशेखरः ।
**चक्रं पाणौ** यस्य सः चक्रपाणिः ।
**शङ्खः हस्ते** यस्य सः शङ्खहस्तः ।
**भुजगे शयनं** यस्य सः भुजगशयनः ।

**समासविग्रहे क्वचित् पूर्वपदं उत्तरपदं च समानविभक्तौ भवतः क्वचित् न इत्यपि अवधेयम् ।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**कृतिः – समस्तपदान् अन्विष्य वर्तुलम् आलिखत ।**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| भा | ल | च | न्द्रः | वि | र | ई | अ |
| सु | ह | दः | वि | म | लः | श्व | जा |
| क्षु | द्र | बु | द्धिः | ला | ए | र | त |
| ल | ब्ध | शि | क्षः | म्बु | क | नि | श |
| ग | जा | न | नः | यः | द | ष्ठः | त्रुः |
| वि | शा | ल | बा | हुः | न्तः | न् | स |
| प | द्म | ह | स्ता | म | हो | द | यः |

१) क्षुद्रा बुद्धिः यस्य सः ।
२) विशालौ बाहू यस्य सः ।
३) एकः दन्तः यस्य सः ।
४) लब्धा शिक्षा येन सः ।
५) ईश्वरे निष्ठा यस्य सः ।
६) भाले चन्द्रः यस्य सः ।
७) पद्मं हस्ते यस्याः सा ।
८) गजस्य आननम् एव आननं यस्य सः ।
९) विमलम् अम्बु यस्मिन् तत् ।
१०) महान् उदयः यस्य सः ।

## ३. अव्ययीभावः समासः ।

* प्रथमं पदं तथा सम्पूर्णं समस्तपदम् अव्ययं भवति अतः अव्ययीभावः इति उच्यते ।
* विग्रहः तु अव्ययस्य अर्थानुसारम् ।
* नित्यं नपुंसकलिङ्गम् एकवचनं वर्तते ।
* नित्यं वाक्ये क्रियाविशेषणरूपेण प्रयुज्यते ।

**उदाहरणानि –**

१) श्यामः दिने दिने पाठशालां गच्छति ।
श्यामः **प्रतिदिनं** पाठशालां गच्छति ।

२) भारतस्य गृहे गृहे संस्कृतं भवतु ।
भारतस्य **प्रतिगृहं** संस्कृतं भवतु ।

३) माता अहनि अहनि देवपूजां करोति ।
माता **प्रत्यहं** देवपूजां करोति ।

४) भास्करः इच्छाम् अनुसृत्य भोजनं करोति ।
भास्करः **यथेच्छं** भोजनं करोति ।

५) रघुः शक्तिम् अनुसृत्य दानं करोति ।
रघुः **यथाशक्ति** दानं करोति ।

६) छात्राः क्रमम् अनुसृत्य वर्गं प्रविशन्ति ।
छात्राः **यथाक्रमं** वर्गं प्रविशन्ति ।

**सकोपम्, सवेगम्, सानन्दम् इत्यपि अव्ययीभाव-समासस्य एव उदाहरणानि –**

१) माता बालकं स्नेहेन सह भोजयति ।
माता बालकं **सस्नेहं** भोजयति ।

२) भक्तः श्रद्धया सह देवं पूजयति ।
भक्तः **सश्रद्धं** देवं पूजयति ।

३) वर्षाकाले मयूराः आनन्देन सह नृत्यन्ति ।
वर्षाकाले मयूराः **सानन्दं** नृत्यन्ति ।

४) छात्राः उत्साहेन सह संस्कृतं पठन्ति ।
छात्राः **सोत्साहं** संस्कृतं पठन्ति ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# दशमः पाठः नदीसूक्तम् । (सरलार्थलेखनार्थम्)

विश्वे विद्यमानं प्राचीनतमं साहित्यं नाम वेदवाङ्मयम् इति बुधाः मन्यन्ते। ऋग्वेदस्य तृतीयमण्डले 'विश्वामित्र-नदी' संवादः वर्तते। विश्वामित्रः नदीं माता इव पूजयति । मानवीया संस्कृतिः नदीतीरे एव विकसिता। अतः अस्माभिः नदी सर्वथा रक्षणीया । **डॉ. मञ्जूषा गोखले** महाभागया नदीसूक्तम् अनुसृत्य रचितात् नाट्यात् संवादोऽयं स्वीकृतः।

- 'नमामि गङ्गे' इति योजनाविषये किं जानासि ?
- जलविद्युन्निर्माणं कथं भवति ?



(रङ्गमञ्चे - कीर्तनकारः कीर्तनं करोति, श्रोतृवृन्दः श्रवणे मग्नः ।)

कीर्तनकारः - गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धुकावेरि पृथिव्यां सन्निधिं कुरु ।।
ज्येष्ठमासे शुक्लपक्षे दशम्यां तिथौ गङ्गादशहरापर्वप्रारम्भः। अस्मिन् पर्वणि नदीपूजनं कर्तव्यम्।

श्रोतृवृन्दः - नदीपूजनम् ? किमर्थं नदीपूजनम् ?

कीर्तनकारः - नदी खलु जीवनदायिनी । अतः अस्मिन्नवसरे कृतज्ञतां प्रदर्शयितुं जनाः जले दीपदानं कुर्वन्ति। द्रोणे दीपं प्रज्वाल्य नदीजले समर्पयन्ति ।

जलं प्राशनार्थम् । कृषिवर्धनार्थम् ।
विद्युन्निर्माणार्थम् । जलम् जीवनार्थम् ।।

सजीवानां कृते नदी देवितमा । नदी मातृतमा । अतः अद्य नदीसूक्तं सर्वथा श्रवणीयं स्मरणीयं च।

श्रोतृवृन्दः - भोः पुराणिकवर्य, कथं नदी अस्माकं माता ? कीदृशाः नदीनाम् उपकाराः ?

कीर्तनकारः - शृणुत आर्याः शृणुत । अतिप्राचीना खलु एषा कथा । अस्ति विश्वामित्रः नाम कुशिकपुत्रः मुनिवरः। सपरिवारं, सगोधनं सः दूरतः आगतः । मार्गम् आक्रामन् सः विपाट् तथा शुतुद्री एतयोः नद्योः सङ्गमं प्राप्तः ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(ततः प्रविशति विश्वामित्रः । नदीं प्रणम्य... )

विश्वामित्रः – कथं लङ्घनीयः प्रवाहो नदीनाम्, कथं रक्षितव्यं जनं गोधनं च ॥
कथं याचितव्यस्तरणाय मार्गः, कथं प्रार्थनीया शुभेच्छा नदीनाम् ॥

नदी(विपाट्)– कः खलु एषः मानवः ? अस्मान् किमर्थं वन्दते स्तौति च ? आर्य, किन्नामा भवान्? कस्माद् अस्मान् आह्वयति ?

विश्वामित्रः – अयि मातः, विश्वामित्रोऽहम् । दूरतः आयातः रथैः शकटैः च । वयं सर्वे परतीरं गन्तुं समुत्सुकाः ।

नदी(शुतुद्री) – विप्रवर, मधुरा खलु ते वाणी । रञ्जयति अस्मान् । वद कथं तव साहाय्यं कर्तव्यम् ?

विश्वामित्रः – अम्ब, शृणु मे अभ्यर्थनाम् । गाधा मे भविष्यसि ? स्वल्पीभवतु जलौघः । येन वयं सुखेनैव परतीरं प्राप्तुं शक्नुमः ।

नदी(विपाट्)– देवेन्द्रः खलु परमेश्वरः मार्गं मह्यं प्रदत्तवान् ।
हत्वा वृत्रं वज्रहस्तः नदीप्रवाहं विमुक्तवान् ॥
मया न कार्या तस्य अवज्ञा क्रुद्धो देवो भविष्यति ।
क्षमस्व विश्वामित्र कदापि नैव विरामः सम्भवति ॥

नद्यौ – रे विश्वामित्र, नैव विरमावः त्वत्कृते । नैव कुर्वः देवेन्द्रस्य कार्ये अधिक्षेपम् ।

विश्वामित्रः – नैव मातः, मास्तु देवेन्द्रस्य अवज्ञा । केवलम् इच्छामः परतीरं गन्तुम् । हे मातः, प्रसीद । वयं सर्वे तव पुत्राः एव । न वयं कदापि तव उपकारान् विस्मरामः । न किञ्चिदपि अस्माभिः कर्तव्यं येन तव अधिक्षेपः भवेत् । एषा मे प्रतिज्ञा ।

नदी(विपाट्)– किम्? एषः मर्त्यः माम् माता इति सम्बोधयति ?

नदी(शुतुद्री) – कथं माता न करोति साहाय्यं स्वपुत्रस्य? साधु मानवश्रेष्ठ साधु ! किन्तु, कच्चित् तव वंशजाः मनुजाः तवेदं वचनं विस्मरिष्यन्ति ?

विश्वामित्रः – न हि मातः, नैतत् शक्यम् । सर्वाः सरितः सुखं वहन्तु ।
सर्वे जनाः सुखिनः सन्तु ॥ (विश्वामित्रः निर्गच्छति ।)

कीर्तनकारः – एवं विश्वामित्रः नद्यौ प्रीणयित्वा परतीरं गतवान् । अयि श्रोतारः, इत्थं नद्यः मानवाः च परस्परं प्रीणयन्तः संस्कृतिं संवर्धितवन्तः ।

प्रवाहिता तरङ्गिणी संस्कृतिर्विकासिता ।
प्रमुदिताश्च मानवाः सरित्कृपासमुन्नताः ॥
नन्दिताः कृषीवलाः प्रफुल्लिता वसुन्धरा ।
अन्नदाननिर्भरा सस्यशामला धरा ॥
सेतुबन्धरोधितं नियन्त्रितं नदीजलम् ।
जनित्रमत्र चालितं जीवनं प्रकाशितम् ॥

अयि श्रोतृवराः, इत्थं मानवीयं जीवनं नदीतीरे, नदीनामेव साहाय्येन समृद्धम् ।

**अधुना कथयत, अपि विश्वामित्रस्य वचनं तस्य वंशजाः नाम वयं सर्वे मनुजाः अधुनाऽपि अनुसरामः?**

## भाषाभ्यासः


**१. माध्यमभाषया उत्तरत ।**

अ) विश्वामित्रः नद्यौ किं प्रार्थयते?


आ) मानवानां जीवनं नदीनां साहाय्येन कथं समृद्धं जातम्?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# एकादशः पाठः जटायुशौर्यम् ।




महर्षिः वाल्मीकिः रामायणं रचितवान् । रामायणे सप्तकाण्डानि सन्ति । १) बालकाण्डम् २) अयोध्याकाण्डम् ३) अरण्यकाण्डम् ४) किष्किन्धाकाण्डम् ५) सुन्दरकाण्डम् ६) युद्धकाण्डम् ७) उत्तरकाण्डम् ।

२४,००० श्लोकेषु सम्पूर्णं रामायणं रचितम् अस्ति । रामायणे निसर्गचित्रणं पशु-पक्षिणां चित्रणम् अपि अस्ति । रामायणस्य अरण्यकाण्डात् ४७ सर्गात् ४९ सर्गपर्यन्तं केचन श्लोकाः अत्र चिताः । एतेषु श्लोकेषु जटायुरावणयोः सङ्घर्षस्य वर्णनं विद्यते ।

वनवासकाले सीतां छलेन एकाकिनीं कृत्वा रावणः परिव्राजकवेषेण पर्णकुटीं सम्प्राप्तः । तस्मै भिक्षां दातुं सीता बहिरागता । तं परिव्राजकं रावणमिति ज्ञात्वा तस्य हेतुं च अवगम्य परुषशब्दैः तस्य निर्भत्सनां कृतवती । तथापि बलेन रावणः ताम् अपहर्तुं प्रायतत । ततः अग्रे . . .

सा गृहीता**ऽतिचुक्रोश** रावणेन यशस्विनी ।
रामेति सीता दुःखार्ता रामे दूरगते वने ।।१।।

सा तदा करुणा वाचो विलपन्ती सुदुःखिता ।
वनस्पतिगतं गृध्रं **ददर्शा**यतलोचना ।।२।।

जटायो पश्य मामार्य ह्रियमाणामनाथवत् ।
अनेन राक्षसेन्द्रेणाकरुणं पापकर्मणा ।।३।।



तं शब्दमवसुप्तस्तु जटायुरथ **शुश्रुवे** ।
निरैक्षद् रावणं क्षिप्रं वैदेहीं च **ददर्श** सः ।।४।।

ततः पर्वतशृङ्गाभस्तीक्ष्णतुण्डः खगोत्तमः ।
वनस्पतिगतः श्रीमान्**व्याजहार** शुभां गिरम् ।।५।।

निवर्तय मतिं नीचां परदाराभिमर्शनात् ।
न तत्समाचरेद्धीरो परो यद्धि विगर्हयेत् ।।६।।

वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी ।
तथाप्यादाय वैदेहीं कुशली न गमिष्यसि ।।७।।

तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः ।
**चकार** बहुधा गात्रे व्रणान्पतगसत्तमः ।।८।।

ततोऽस्य सशरं चापं मुक्तामणिविभूषितम् ।
चरणाभ्यां महातेजा **बभञ्ज** पतगोत्तमः ।।९।।

ततः क्रोधाद्दशग्रीवो गृध्रराजमपोथयत् ।
पक्षौ पार्श्वौ च पादौ च खड्गमुद्धृत्य सोऽच्छिनत् ।।१०।।

स छिन्नपक्षः सहसा रक्षसा रौद्रकर्मणा ।
**निपपात** हतो गृध्रो धरण्यामल्पजीवितः ।।११।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः** **पठत–बोधत**

१) रामे वने दूरगते, रावणेन गृहीता यशस्विनी सीता दुःखार्ता (भूत्वा) 'राम' इति अतिचुक्रोश ।
२) तदा सा आयतलोचना सुदुःखिता (सीता) करुणाः वाचः विलपन्ती वनस्पतिगतं गृध्रं ददर्श ।
३) हे आर्य जटायो, अनेन पापकर्मणा राक्षसेन्द्रेण अनाथवत् अकरुणं ह्रियमाणां मां पश्य ।
४) अवसुप्तः तु सः जटायुः अथ तं शब्दं शुश्रुवे, क्षिप्रं रावणं निरैक्षद् वैदेहीं च ददर्श ।
५) ततः पर्वतशृङ्गाभः तीक्ष्णतुण्डः खगोत्तमः वनस्पतिगतः श्रीमान् (जटायुः) शुभां गिरं व्याजहार ।
६) "(हे रावण,) परदारा–अभिमर्शनाद् नीचां मतिं निवर्तय । यद् हि परः विगर्हयेत् तद् धीरः न समाचरेत्।
७) (यद्यपि) अहं वृद्धः (अस्मि), त्वं युवा, धन्वी, सरथः कवची, शरी (असि), तथापि वैदेहीम् आदाय त्वं कुशली (भवन्) न गमिष्यसि ।"
८) महाबलः, पतगसत्तमः (जटायुः) तु तस्य तीक्ष्णनखाभ्यां चरणाभ्यां (रावणस्य) गात्रे बहुधा व्रणान् चकार।
९) ततः महातेजाः पतगोत्तमः (जटायुः) अस्य (रावणस्य) मुक्तामणिविभूषितं सशरं चापं चरणाभ्यां बभञ्ज।
१०) ततः सः दशग्रीवः क्रोधात् गृध्रराजम् अपोथयत् । खड्गम् उद्धृत्य पक्षौ पार्श्वौ पादौ च अच्छिनत् ।
११) (तदा) रक्षसा रौद्रकर्मणा सहसा हतः छिन्नपक्षः सः अल्पजीवितः गृध्रः धरण्याम् निपपात ।

## भाषाभ्यासः



**१. लिट्रूपाणि चित्वा लिखत ।**

पश्य, अतिचुक्रोश, चकार, निपपात, अच्छिनत्, अभवन्, गमिष्यसि, बभञ्ज, व्याजहार, निवर्तय, ददर्श, अपोथयत्, चुक्रोश, विगर्हयेत्, समाचरेत्, शुश्रुवे

**२. नाम–तालिकां पूरयत ।**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| | गृध्रौ | | द्वितीया |
| कर्मणा | | | तृतीया |
| | | धन्विभ्यः | पञ्चमी |

**३. सन्धिविग्रहं कुरुत ।** अ) ततस्सा आ) ददर्शायतलोचना इ) वृद्धोऽहम् ई) तथाप्यादाय

**४. माध्यमभाषया उत्तरं लिखत ।** जटायुरावणयोः सङ्घर्षस्य वर्णनं कुरुत ।

**५. समानार्थकशब्दान् लिखत ।** सीता, रावणः, शृङ्गम्, तुण्डः, पतगः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ६. धातु–तालिकां पूरयत ।


| लकाराः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|---|
| लङ् | | | अभवन् | प्रथमः पुरुषः |
| लृट् | गमिष्यसि | | | मध्यमः पुरुषः |
| लट् | | पश्यावः | | उत्तमः पुरुषः |

## ७. सर्वनाम–तालिकां पूरयत ।


| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| अस्य | | | षष्ठी |
| | आवाम्–नौ | | द्वितीया |
| | | ताः | प्रथमा |

## ८. विशेषणानि अन्विष्य लिखत ।


अ.




आ.




इ.




## ९. सूचनानुसारं कृतीः कुरुत ।

अ) सीता वनस्पतिगतं गृध्रं ददर्श ।(लङ्–लकारे परिवर्तयत ।)

आ) जटायुः रावणस्य गात्रे व्रणान् चकार ।(लङ्–लकारे परिवर्तयत ।)

इ) रावणः खड्गमुद्धृत्य पक्षौ अच्छिनत् ।(पूर्वकालवाचकम् अव्ययं निष्कासयत ।)

74EA8F



Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com

# द्वादशः पाठः  आदिशङ्कराचार्यः ।

भारतदेशे दीर्घा आचार्यपरम्परा वर्तते । तस्याम् अद्वैतसिद्धान्तस्य भाष्यकारः जगद्गुरुः आदिशङ्कराचार्यः प्रसिद्धः । महान् तत्त्वज्ञः अयं जनप्रबोधनार्थं भारतभ्रमणं कृत्वा भारतस्य चतसृषु दिक्षु पीठानि अस्थापयत्। तेन रचितानि गेयानि अर्थपूर्णानि स्तोत्राणि अद्यापि जनानां मुखेषु विराजन्ते। तस्य जीवनचरित्रात् महत्त्वपूर्णौ द्वौ प्रसङ्गौ अत्र उद्धृतौ।

- यूयं कानि स्तोत्राणि जानीथ ?
- चर्पटपञ्जरिकास्तोत्रस्य रचयिता कः ?
- आदिशङ्कराचार्यस्य कार्यविषये किं जानीथ ?





## प्रथमः प्रसङ्गः ।

## संन्यासार्थम् अनुमतिः प्राप्ता ।

भारतस्य दक्षिणदिशि केरलप्रदेशे आलुवा नगरस्य समीपं 'कालडि' नाम ग्रामः। सः ग्रामः पूर्णानदीतीरे वर्तते । तत्र जगद्गुरोः शङ्कराचार्यस्य जन्म ख्रिस्ताब्दे अष्टमे शतके अभवत्। तस्य पिता शिवगुरुः माता आर्याम्बा चास्ताम्। बाल्ये एव तस्य पिता शिवगुरुः दिवङ्गतः। तस्माद् मातैव पुत्रस्य पालनम् अकरोत्। पञ्चमे वयसि उपनीतः सः पठनार्थं गुरुमुपागच्छत्। तत्र वेद-वेदाङ्गानि, विविधशास्त्राणि च असाधारणवेगेन बालकोऽयम् अधीतवान् । पठनादिकं समाप्य शङ्करः गृहं प्रत्यागतवान्। गृहं प्राप्य मातृसेवाम् आरभत च । माता आर्याम्बा पुत्रस्य विवाहविषये सदैव चिन्तयति स्म । परन्तु मनसा वचसा कर्मणा च विरक्तः शङ्करः संन्यासार्थम् अनुमतिं प्रार्थयत। शङ्करस्य ऐहिकविषयेषु अरुचिं दृष्ट्वा आर्याम्बा चिन्तामग्ना जाता ।


एकस्मिन् दिने शङ्करः स्नानार्थं पूर्णानदीं गतः । यदा सः स्नाने मग्नः तदा तत्र एकः नक्रः आगतः। नक्रः झटिति तस्य पादम् अगृह्णात्। तदा शङ्करः उच्चैः आक्रोशत् । ''अम्ब! त्रायस्व । नक्रात् त्रायस्व!'' आक्रोशं श्रुत्वा नदीतीरं प्राप्ता आर्याम्बा पुत्रं नक्रेण गृहीतमपश्यत् । भयाकुला सा अपि रोदनम् आरभत । शङ्करः मातरम् आर्ततया प्रार्थयत - ''अम्ब, इतःपरम् अहं न जीवामि । मरणात् पूर्वं संन्यासी भवितुम् इच्छामि । अधुना वा देहि अनुमतिम् ।'' चेतसा अनिच्छन्ती अपि विवशा माता अवदत् - ''वत्स, यथा तुभ्यं रोचते तथैव भवतु । इदानीमेव संन्यासं स्वीकुरु। मम अनुमतिः अस्ति'' इति। तत्क्षणमेव आश्चर्यं घटितम् । दैववशात् शङ्करः नक्राद् मुक्तः । स नदीतीरम् आगत्य मातुः चरणौ प्राणमत् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अनन्तरं शङ्करः मातरं संन्यासस्य महत्त्वम् अवाबोधयत् । संन्यासी न केवलम् एकस्याः पुत्रः । विशालं जगद् एव तस्य गृहम् । 'मातः, यदा त्वं स्मरिष्यसि तदा एव त्वत्समीपमागमिष्यामि' इति मात्रे प्रतिश्रुत्य सः गृहात् निरगच्छत् । ततः गोविन्दभगवत्पादानां शिष्यो भूत्वा सः सर्वाणि दर्शनानि अपठत् । तेभ्यः संन्यासदीक्षां गृहीत्वा वैदिकधर्मस्य स्थापनार्थं प्रस्थानम् अकरोत् ।



**द्वितीयः प्रसङ्गः । यस्माद् ज्ञानं लभते स गुरुः ।**

एकस्मिन् दिने आचार्यः शिष्यगणेन सह गङ्गास्नानार्थम् अगच्छत् । तदा मार्गे कोऽपि दरिद्रः मलिनकायः, जीर्णवस्त्रधारी मनुष्यः तस्य पुरतः आगच्छत् । तं दृष्ट्वा शिष्याः तम् 'अपसर, अपसर' इति उच्चैः अवदन् ।

सः मनुष्यः अपृच्छत्–''अपसर, अपसर इति कं वदसि ? शरीरं वा आत्मानं वा ? आत्मा तु परमेश्वरस्य अंशः अतः सर्वेषां समानः एव । तथा च सर्वेषां शरीराणि पञ्चमहाभूतात्मकानि । तर्हि कथं तव शरीरं मम शरीराद् भिन्नम्, अहं च त्वद् भिन्नः ?'' वेदान्ततत्त्वस्य सारं तस्य मुखात् श्रुत्वा आचार्यः तं प्रणनाम । ज्ञानं तु कस्मादपि ग्राह्यम्। यस्माद् ज्ञानं लभते स गुरुरेव इति विचारेण आचार्यः तत्रैव 'मनीषापञ्चकम्' इति स्तोत्रं रचितवान् ।

एवम् आसेतुहिमाचलं पर्यटन् अद्वैत-सिद्धान्तस्य प्रचारम् अकरोत् सः ।

**अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित् ।**
**षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात् ।।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## भाषाभ्यासः



**१. पूर्णवाक्येन उत्तरं लिखत।**

अ) गुरुमुपगम्य शङ्करः किम् अधीतवान्?
आ) शङ्करः किमर्थम् आक्रोशत्?
इ) शङ्करः मात्रे किं प्रतिश्रुत्य गृहाद् निरगच्छत्?
ई) शङ्करः कस्य शिष्यः अभवत्?
उ) शङ्करः संन्यासदीक्षां गृहीत्वा किम् अकरोत्?
ऊ) शिष्यगणेन सह आचार्यः स्नानार्थं कुत्र अगच्छत्?
ए) शङ्कराचार्यः आसेतुहिमाचलं पर्यटन् किम् अकरोत्?

**२. माध्यमभाषया उत्तरत।**

अ) शङ्करेण संन्यासार्थं कथम् अनुमतिः लब्धा ?
आ) ज्ञानग्रहणविषये शङ्कराचार्याणां किं मतम्?

**३. प्रश्ननिर्माणं कुरुत।**

अ) माता आर्याम्बा पुत्रस्य विवाहविषये सदैव चिन्तयति स्म ।
आ) नक्राद् मुक्तः शङ्करः मातुः चरणौ प्राणमत् ।
इ) आचार्यः स्तोत्रं रचितवान् ।

**४. सन्धिविग्रहं कुरुत ।**

(अ) चास्ताम् (आ) त्वत्समीपमागमिष्यामि (इ) गुरुमुपागच्छत् (ई) मुनिरभ्यगात् (उ) मातैव

**५. मेलनं कुरुत ।**

**विशेष्यम्** – शिवगुरुः, आर्याम्बा, शङ्करः, जगत्, मनुष्यः ।
**विशेषणम्** – मलिनकायः, प्रसन्नः, विशालम्, दिवङ्गतः, विरक्तः, चिन्तामग्ना ।


**६.सूचनानुसारं कृतीः कुरुत ।**

अ) सः पठनार्थं गुरुमुपागच्छत् । (बहुवचनं कुरुत ।)
आ) आचार्यः शिष्यगणेन सह गङ्गास्नानार्थं गच्छति स्म । ('स्म' निष्कासयत ।)
इ) मात्रे प्रतिश्रुत्य सः गृहाद् निरगच्छत् । (पूर्वकालकवाचकं निष्कासयत ।)
ई) प्रश्नं श्रुत्वा सर्वे आश्चर्यचकिताः अभवन्। (त्वान्तं निष्कासयत ।)
उ) यदा त्वं स्मरिष्यसि तदा एव त्वत्समीपमागमिष्यामि । (लकारं लिखत ।)
ऊ) आचार्यः तं प्रणनाम । (लङ्-लकारे परिवर्तयत ।)

**८. समानार्थकशब्दं लिखत ।**

दिवङ्गतः, शीघ्रम्, चिन्तामग्ना, मग्नः, नक्रः, पादः, पुत्रः, शिष्यः, ईश्वरः, पण्डितः, गृहम् ।


**९. स्थानाधारेण शब्दपेटिकां पूरयत ।**



(कालडीग्रामः, केरलप्रदेशः,
भारतदेशः, आलुवानगरम्, )

**१०. प्रवाहि जालचित्रं पूरयत ।**

शङ्करस्य



(गृहं प्रत्यागमनम्, गुरुमुपगमनम्,
मातृसेवा, वेद-वेदाङ्गानाम् अध्ययनम्)




Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com

११. जालरेखाचित्रं पूरयत ।

अ)




आ)




## आदिशङ्कराचार्यैः रचितं साहित्यम् ।

**स्तोत्राणि –** शिवभुजङ्गप्रयातस्तोत्रम्, शिवपञ्चाक्षरस्तोत्रम्, वेदसारशिवस्तोत्रम्, नारायणस्तोत्रम्, त्रिपुरसुन्दरीस्तोत्रम्, अन्नपूर्णास्तोत्रम्, दक्षिणामूर्तिस्तोत्रम्, द्वादशज्योतिर्लिङ्गम्, कालभैरवाष्टकम्, अच्युताष्टकम्, अम्बाष्टकम्, कृष्णाष्टकम्, गोविन्दाष्टकम्, पाण्डुरङ्गाष्टकम्, गङ्गाष्टकम्, यमुनाष्टकम्, नर्मदाष्टकम्, ललितापञ्चकम् इत्यादीनि ।

**भाष्याणि –** ब्रह्मसूत्रभाष्यम्, उपनिषद्भाष्यम्, भगवद्गीताभाष्यम्, विष्णुसहस्रनामभाष्यम्, सनत्सुजातीयभाष्यम् ।

**अन्यरचनाः –** अपरोक्षानुभूतिः, आत्मबोधः, तत्त्वोपदेशः, प्रौढानुभूतिः, ब्रह्मज्ञानावलीमाला, लघुवाक्यवृत्तिः, सदाचारानुसन्धानम्, स्वात्मनिरूपणम्, अद्वैतानुभूतिः, दशश्लोकी, प्रबोधसुधाकरः, प्रश्नोत्तररत्नमालिका, ब्रह्मानुचिन्तनम्, मोहमुद्गरः, योगतारावलिः, शतश्लोकी, स्वात्मप्रकाशिका, सर्ववेदान्तसिद्धान्तसारसंग्रहः, विवेकचूडामणिः, उपदेशसाहस्री, वेदान्तस्तोत्राणि, अनात्मश्रीविगर्हणप्रकरणम्, आत्मानात्मविचारः, जीवन्मुक्तानन्दलहरी, वाक्यसुधा, अध्यात्मपटलविवरणम् ।

74N6A3



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अभ्यासपत्रम् ३

(८, ९, ११, १२ पाठानाम् आधारेण)

**१. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत ।**

अ) सर्कसक्रीडायां लोकप्रियः सङ्गीतकार्यक्रमः प्रचलति ।
आ) व्याघ्रवेषे अब्दुलः समुपस्थितः ।
इ) रात्रौ दशवादने सर्कसक्रीडायाः प्रारम्भः जातः ।
ई) श्रोतृवृन्दः लेखने मग्नः ।
उ) सर्वेषां शरीराणि सप्तमहाभूतात्मकानि ।
ऊ) आचार्यः तत्रैव कनकधारास्तोत्रं रचितवान् ।

**२. उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।**

अ) प्रेक्षकाः मम व्याघ्रवेषं निष्कास्य मां ________ ताडितवन्तः । (निर्घृणं/सस्नेहं)
आ) तथा विज्ञापनं कृत्वा ________ विक्रीतानि । (प्रवेशपत्राणि/पिहितपत्राणि)
इ) ________ वयसि उपनीतः सः पठनार्थं गुरुम् उपागच्छत् । (पञ्चमे/दशमे)
ई) पठनादिकं समाप्य शङ्करः ________ प्रत्यागतवान् । (गृहम्/नदीम्)
उ) आर्याम्बा पुत्रं ________ गृहीतम् अपश्यत् । (नक्रेण/मत्स्येन)
ऊ) आचार्यः शिष्यगणेन सह ________ अगच्छत् । (गङ्गास्नानार्थम्/समुद्रस्नानार्थम्)
ए) यस्मात् ज्ञानं लभते सः ________ । (ज्येष्ठः/गुरुः)

**३. क्रमेण योजयत ।**

अ) १. माता व्याघ्रे पाषाणखण्डान् अक्षिपत् । २. व्याघ्रस्य पुरतः सम्मर्दः जातः ।
३. व्याघ्रस्य मनुष्यवाण्या भाषणेन महिला मूर्च्छिता । ४. व्याघ्रस्य गर्जनया बालः भीतः ।
आ) १. शिबिरस्य प्रथमं दिनम् । २. सर्कसस्वामिनः साहाय्ययाचना ।
३. सहभोजनस्य रहस्यभेदः । ४. सर्कसस्वामिनः आगमनम् ।
इ) १. भल्लूकस्य पटमण्डपस्तम्भम् आरोहणम्। २. धेनोः सम्भ्रमः आक्रमणं च ।
३. चिमणरावस्य व्याघ्रत्वं विस्मृत्य द्विपादरूपाश्रयः । ४. सहभोजनस्य प्रारम्भः ।
ई) १. संन्यासार्थम् अनुमतियाचना । २. नक्रेण पादग्रहणम् ।
३. मात्रा अनुमतिप्रदानम्। ४. शङ्करस्य आक्रोशः ।
उ) १. गोविन्दभगवत्पादानां शिष्यत्वम् । २. मात्रे प्रतिश्रुत्य गृहात् निगर्मनम् ।
३. वैदिकधर्मस्य स्थापनार्थं प्रस्थानम् । ४. मातरं संन्यासस्य महत्त्वबोधनम् ।
ऊ) १. मार्गे मलिनकायपुरुषस्य आगमनम् । २. शिष्यगणेन सह गङ्गास्नानार्थं गमनम् ।
३. 'मनीषापञ्चकम्' इति स्तोत्रस्य रचना । ४. मलिनकायपुरुषस्य मुखात् वेदान्ततत्त्वसारस्य श्रवणम्।

**४. समासविग्रहं कुरुत ।**

सद्गुणसम्पत्तिः, कविपण्डिताः, सपरिवारम्, लोकप्रियः, बालवीरचमूः, पाषाणखण्डाः, चरमबिन्दुः, अनिच्छा, भल्लूकवेषधारी, व्याघ्रभल्लूकौ, अनुत्तमानि, खगोत्तमः, आयतलोचना, वनस्पतिगतः, गृध्रराजः, मातृसेवा, गृहस्थः, अरुचिः, चिन्तामग्ना, पूर्णानदी ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**५. उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।**

अ) माता व्याघ्रे पाषाणखण्डान् क्षिपति यतः ______________________ ।

१. तस्याः पुत्रः व्याघ्रगर्जनां श्रुत्वा भीतः । २. माता व्याघ्रं पीडयितुम् इच्छति स्म ।

आ) माता मूर्च्छिता यतः ______________________ ।

१. माता ज्वरपीडिता । २. तस्याः पुरतः व्याघ्रः मनुष्यवाण्या अवदत् ।

इ) कार्यक्रमस्य अन्ते प्रेक्षकाः व्याघ्रवेषधारिणं मनुष्यं ताडितवन्तः यतः ______________ ।

१. व्याघ्रवेषधारिणा मनुष्येण चौर्यकार्यं कृतम् । २. तेन मनुष्येण व्याघ्रवेषं धृत्वा प्रेक्षकाणां वञ्चना कृता ।

ई) शङ्करः उच्चैः आक्रोशत् यतः ______________________ ।

१. सः नदीजले अमज्जत् । २. नक्रः तस्य पादम् अगृह्णात् ।

उ) शङ्करः मलिनकायं मनुष्यं प्रणनाम यतः ______________________ ।

१. मलिनकायः मनुष्यः शङ्करं सङ्कटात् अरक्षत् । २. सः मलिनकायः मनुष्यः वेदान्तस्य सारं जानाति स्म ।

**६. सर्वनामतालिकां पूरयत ।**

| ए.व. | द्विव. | ब.व. | विभक्तिः |
|---|---|---|---|
| ________ | आवाभ्याम् | ________ | पञ्चमी |
| इयम् | ________ | ________ | प्रथमा |
| ________ | ________ | येषु | सप्तमी |

| ए.व. | द्विव. | ब.व. | विभक्तिः |
|---|---|---|---|
| ________ | ________ | एतासु | सप्तमी |
| सर्वस्मात् | ________ | ________ | पञ्चमी |
| ________ | भवन्तौ | ________ | द्वितीया |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## कृत्य - प्रत्ययान्तानि

**(कर्मणि-भूतकालवाचक-धातुसाधित-विशेषणानि)**

१)

| | |
|---|---|
| पाठ्यः ग्रन्थः ।<br>पठितव्यः ग्रन्थः ।<br>पठनीयः ग्रन्थः । | पठनाय योग्यः ग्रन्थः । |

कः पाठ्यः ?
ग्रन्थः पाठ्यः ।

२)

| | |
|---|---|
| रक्ष्यः देशः ।<br>रक्षितव्यः देशः ।<br>रक्षणीयः देशः । | देश-रक्षणम् इति कर्तव्यम् । |

कः रक्षणीयः ?
देशः रक्षणीयः ।

३)

| | |
|---|---|
| खाद्यानि फलानि ।<br>खादितव्यानि फलानि ।<br>खादनीयानि फलानि । | खादनाय योग्यानि फलानि । |

कानि खादनीयानि?
फलानि खादनीयानि ।

४)

| | |
|---|---|
| वन्द्या माता ।<br>वन्दितव्या माता ।<br>वन्दनीया माता । | वन्दनार्हा माता । |

का वन्दनीया ?
माता वन्दनीया ।

अन्यानि उदाहरणानि -

पेयं जलम् । दर्शनीयः चित्रपटः । गेयं सुभाषितम् । चिन्ता न कार्या ।
सुगम्यः पर्वतः । देयं दानम् । चिन्तनीयः विषयः ।

**कृतिः -** १) शिक्षिका मूलधातुं वदति । छात्राणां प्रथमः वृन्दः 'य' प्रत्यययुक्तं रूपं वदति । द्वितीयः वृन्दः 'तव्य' प्रत्यययुक्तं तृतीयः च वृन्दः 'अनीय' प्रत्यययुक्तं रूपं वदति । यथा -

| शिक्षिका वदति | प्रथमः छात्रवृन्दः | द्वितीयः छात्रवृन्दः | तृतीयः छात्रवृन्दः |
|---|---|---|---|
| | य | तव्य | अनीय |
| त्यज् | त्याज्य | त्यक्तव्य | त्यजनीय |
| वच् | वाच्य | वक्तव्य | वचनीय |
| प्र + अर्थ् | प्रार्थ्य | प्रार्थयितव्य | प्रार्थनीय |
| घुष-घोष् | घोष्य | घोषयितव्य | घोषणीय |
| दा | देय | दातव्य | दानीय |
| क्षिप् | क्षेप्य | क्षेप्तव्य | क्षेपणीय |
| दृश् | दृश्य | द्रष्टव्य | दर्शनीय |
| गै | गेय | गातव्य | गानीय |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## सम्भाषापत्रम्

### १) कृत्य–प्रत्ययान्त–रूपाणि अन्विष्यत ।

त्यज्, दण्ड, नम्, ज्ञा, पा, कृ, वच्, चिन्त्

| | | | | |
|---|---|---|---|---|
| स्मा | त्य | नी | का | र्य |
| व | क्त | व्य | द | क्त |
| द्य | व्य | न | ण्ड | ज्ञे |
| पे | चि | न्त | नी | य |
| य | ध्ये | व्य | य | ग्ध |

### २) योग्यं विशेषणं योजयत ।

| | |
|---|---|
| माता | दण्डनीया: |
| शाटिका: | श्राव्याणि |
| ज्ञानम् | क्रेतव्ये |
| मापिके | अर्जनीयम् |
| जय: | प्रक्षालनीया: |
| चोरा: | प्राप्तव्य: |
| सत्यवचनम् | वन्द्या |
| गीतानि | वक्तव्यम् |

### पठत–बोधत ।

विदर्भप्रान्ते नागपुरे जात: 'प्रज्ञाभारती डॉ. श्रीधर भास्कर वर्णेकर:' इति महान् संस्कृतपण्डित: । संस्कृतनिष्ठ: अयं संस्कृते स्नातकोत्तरपदवीं प्राप्य अग्रे डी. लिट् इति उपाधिम् अपि प्राप्तवान् । महाभागेनानेन विपुलं संस्कृतलेखनं कृतं विवेकानन्दविजयम्, शिवराज्याभिषेकम् इति नाटके, 'शिवराज्योदयम्' इति महाकाव्यं, 'श्रमगीता' इत्यादीनि नैकानि लघुकाव्यानि च लिखितानि। 'मनसा सततं ...' इति गीतं वर्णेकरमहोदयेन लिखितम् ।

द्विसहस्राधिक–सप्तदशतमं वर्षं (२०१७) महोदयस्यास्य जन्मशताब्दपूर्तिवर्षम् । अस्मै पण्डितश्रेष्ठाय नम: ।

### गायत नन्दत ।

**लोकहितं मम करणीयम्**

मनसा सततं **स्मरणीयम्**
वचसा सततं **वदनीयम्**
लोकहितं मम **करणीयम्** ।। लोकहितं।।

न भोगभवने **रमणीयम्**
न च सुखशयने **शयनीयम्** ।
अहर्निशं **जागरणीयम्**
**लोकहितं मम करणीयम्** ।। मनसा।।

न जातु दु:खं **गणनीयम्**
न च निजसौख्यं **मननीयम्** ।
कार्यक्षेत्रे **त्वरणीयम्**
**लोकहितं मम करणीयम्** ।। मनसा।।

दु:खसागरे **तरणीयम्**
कष्टपर्वते **चरणीयम्**
विपत्तिविपिने **भ्रमणीयम्**
**लोकहितं मम करणीयम्** ।। मनसा।।

गहनारण्ये घनान्धकारे
बन्धुजना ये स्थिता गह्वरे ।
तत्र मया **सञ्चरणीयम्**
**लोकहितं मम करणीयम्** ।। मनसा।।

**–डॉ. श्रीधर भास्कर वर्णेकर**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# भाषासूत्रम् – ४

## कृत्य–प्रत्ययान्तानि

**(कर्मणि–विध्यर्थक–धातुसाधित–विशेषणानि)**

**सूत्रम् – मूलधातुः + य/तव्य/अनीय**

उदाहरणानि –

कृ – कार्य/कृत्य/कर्तव्य/करणीय

पठ् – पाठ्य/पठितव्य/पठनीय

दृश् – दृश्य/द्रष्टव्य/दर्शनीय

दा – देय/दातव्य/दानीय

मुच् – मोच्य/मोक्तव्य/मोचनीय

**देव–शब्दवत् (पुं)** **माला–शब्दवत् (स्त्री.)** **वन–शब्दवत् (नपुं)**

| पुंलिङ्गरूपाणि | | | स्त्रीलिङ्गरूपाणि | | | नपुंसकलिङ्गरूपाणि | | |
|---|---|---|---|---|---|---|---|---|
| करणीयः | करणीयौ | करणीयाः | करणीया | करणीये | करणीयाः | करणीयम् | करणीये | करणीयानि |
| दानीयः | दानीयौ | दानीयाः | दानीया | दानीये | दानीयाः | दानीयम् | दानीये | दानीयानि |
| पाठ्यः | पाठ्यौ | पाठ्याः | पाठ्या | पाठ्ये | पाठ्याः | पाठ्यम् | पाठ्ये | पाठ्यानि |
| मोक्तव्यः | मोक्तव्यौ | मोक्तव्याः | मोक्तव्या | मोक्तव्ये | मोक्तव्याः | मोक्तव्यम् | मोक्तव्ये | मोक्तव्यानि |
| दृश्यः | दृश्यौ | दृश्याः | दृश्या | दृश्ये | दृश्याः | दृश्यम् | दृश्ये | दृश्यानि |

**पठनीयः ग्रन्थः ।** **पठनीया कविता ।** **पठनीयं काव्यम् ।**

**खादनीयः मोदकः ।** **खादितव्या कुण्डलिका ।** **खाद्यं फलम् ।**

**एतानि विशेषणानि क्रियायाः अर्हतां सूचयन्ति । तथैव कर्मपदम् अनुसरन्ति । अतः केवलं कर्मवाच्ये वाक्ये एतेषाम् उपयोगः भवति ।**

**उपयोजनम् –**

अ) विशेषणरूपेण – स्मरणीया कथा, प्रेक्षणीयं स्थलम्, पूज्यः पुरुषः ।

आ) कर्मवाच्ये वाक्ये क्रियापदस्थाने – १. रामेण **ग्रन्थः पाठ्यः** / **पठितव्यः** / **पठनीयः** ।

२. सीतया **पत्रं लेख्यम्** / **लेखितव्यम्** / **लेखनीयम्** ।

३. छात्रैः **प्रश्नाः प्रच्छ्याः** / **प्रष्टव्याः** / **प्रच्छनीयाः** ।

**रूपमेलनं कुरुत ।**

| | |
|---|---|
| १. खादति | (अ) क्तवतु–प्रत्ययान्तरूपम् |
| २. खादितम् | (आ) लट् (कर्मवाच्यम्) |
| ३. खादितवान् | (इ) कृत्य–प्रत्ययान्तरूपम् |
| ४. खादनीयः | (ई) क्त–प्रत्ययान्तरूपम् |
| ५. खाद्यते | (उ) लट् (कर्तृवाच्यम्) |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## शतृ-शानच्-प्रत्ययान्तानि ।
## कर्तरि-वर्तमानकालवाचक-धातुसाधित-विशेषणानि ।

मन्दं **हसन्तं** प्रभया **लसन्तं**
जनस्य चित्तं सततं **हरन्तम्** ।
वेणुं नितान्तं मधु **नादयन्तं**
बालं मुकुन्दं मनसा स्मरामि ॥



अहं मुकुन्दं स्मरामि ।
मुकुन्दः किं करोति ?
मुकुन्दः मन्दं हसति । मुकुन्दः प्रभया लसति ।
मुकुन्दः जनस्य चित्तं सततं हरति ।
मुकुन्दः नितान्तं मधु वेणुं नादयति ।

कीदृशः मुकुन्दः ? (मुकुन्दस्य विशेषणानि कानि ?)

हसन्
↑
नादयन् ← मुकुन्दः → लसन्
↓
हरन्

अहम् एतादृशं **हसन्तं** प्रभया **लसन्तं** चित्तं **हरन्तं** वेणुं **नादयन्तं** मुकुन्दं स्मरामि ।



कृष्णः हसति ।
**हसन्** कृष्णः ।




युवकः गायति ।
**गायन्** युवकः ।



बालिका नृत्यति ।
**नृत्यन्ती** बालिका ।

यानं गच्छति ।
**गच्छत्** यानम् ।





महिला धावति ।
_____ महिला ।

फलं पतति ।
_____ फलम् ।



**हसन्**, **नृत्यन्ती**, **पतत्** एतानि हस्, नृत्, पत् इति धातुभ्यः निर्मितानि विशेषणानि (धातुसाधितानि) । एतानि विशेषणानि क्रिया न समाप्ता इति सूचयन्ति । अतः एतानि वर्तमानकालवाचक-धातुसाधित-विशेषणानि ।

**एतादृशानि विशेषणानि अस्मिन् श्लोके अन्विष्यत ।**

**खादन् न गच्छामि हसन् न भाषे**
**गतं न शोचामि कृतं न मन्ये ।**
**द्वयोस्तृतीयो न भवामि राजन्**
**किं कारणं येन भवामि मूर्खः ॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# भाषासूत्रम् – ५

## शतृ–शानच्– प्रत्ययान्तानि

(कर्तरि–वर्तमानकालवाचक–धातुसाधित–विशेषणानि ।)

सूत्रम् – मूल धातुः + गणविकरणम् + अत् / मान / आन
(आदेशः) (प.प.) (१ तः १०) / (आ.प.) (१, ४, ६, १०) / (आ.प.) (२, ३, ५, ७, ८, ९)

**शतृ (अत्)–प्रत्ययान्त–उदाहरणानि – (परस्मैपदिनः धातवः, १ तः १० गणीयाः)**

| मूलधातुः | प्रातिपदिकम् | पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|---|
| अ) गम्–गच्छ् (१ प.प.) | गच्छत् | गच्छन् | गच्छन्ती | गच्छत् |
| आ) नृत् (४ प.प.) | नृत्यत् | नृत्यन् | नृत्यन्ती | नृत्यत् |
| इ) लिख् (६ प.प.) | लिखत् | लिखन् | लिखन्ती | लिखत् |
| ई) पूज् (१० प.प.) | पूजयत् | पूजयन् | पूजयन्ती | पूजयत् |
| उ) * कृ (८ प.प.) | कुर्वत् | कुर्वन् | कुर्वती | कुर्वत् |
| ऊ) * ज्ञा (९ प.प.) | जानत् | जानन् | जानती | जानत् |

एतेषां विशेषणानां रूपाणि पुंलिङ्गे प्रायः भगवत्–सदृशानि भवन्ति । यथा **गच्छन् गच्छन्तौ गच्छन्तः** । स्त्रीलिङ्गे नदी–सदृशानि तथैव नपुंसकलिङ्गे जगत्–सदृशानि रूपाणि भवन्ति ।

**शानच् (मान)–प्रत्ययान्त–उदाहरणानि – (आत्मनेपदिनः धातवः, १, ४, ६, १० गणीयाः)**

| मूलधातुः | प्रातिपदिकम् | पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|---|
| अ)मन् (४ आ.प.) | मन्यमान | मन्यमानः | मन्यमाना | मन्यमानम् |
| आ)रम् (१ आ.प.) | रममाण | रममाणः | रममाणा | रममाणम् |
| इ) मृ (६ आ.प.) | म्रियमाण | म्रियमाणः | म्रियमाणा | म्रियमाणम् |
| ई) मन्त्र् (१० आ.प.) | मन्त्रयमाण | मन्त्रयमाणः | मन्त्रयमाणा | मन्त्रयमाणम् |

**शानच् (आन)–प्रत्ययान्त–उदाहरणानि – (आत्मनेपदिनः धातवः, २, ३, ५, ७, ८, ९ गणीयाः)**

| मूलधातुः | प्रातिपदिकम् | पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|---|
| अ) ब्रू (२ आ.प.) | ब्रुवाण | ब्रुवाणः | ब्रुवाणा | ब्रुवाणम् |
| आ) चि (५ आ.प.) | चिन्वान | चिन्वानः | चिन्वाना | चिन्वानम् |
| इ) * कृ (८ आ.प.) | कुर्वाण | कुर्वाणः | कुर्वाणा | कुर्वाणम् |
| ई) * ज्ञा (९ आ.प.) | जानान | जानानः | जानाना | जानानम् |

एतेषां विशेषणानां रूपाणि पुंलिङ्गे देव–सदृशानि भवन्ति । यथा **मन्यमानः मन्यमानौ मन्यमानाः** । स्त्रीलिङ्गे माला–सदृशानि तथैव नपुंसकलिङ्गे वन–सदृशानि भवन्ति ।

**उपयोजनम् –** १. शालां गच्छन् छात्रः पतति । २. नृत्यत् अपत्यं दृष्ट्वा माता आनन्दति ।
३. खेलने रममाणः बालकः शिक्षकं पश्यति । ४. स्तोत्रं ब्रुवाणा महिला पूजां करोति ।

**रूपपरिचयः –** गच्छन् – गम्–गच्छ् (१ प.प.), शतृ–प्रत्ययान्तम्, पुंलिङ्ग–प्रथमा–एकवचनम्
हसन्तम् – हस् (१ प.प.), शतृ–प्रत्ययान्तम्, पुंलिङ्ग–द्वितीया–एकवचनम् ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## क्त-प्रत्ययान्तानि

**(कर्मणि-भूतकालवाचक-धातुसाधित-विशेषणानि)**

**सूत्रम् - मूलधातुः + त (त/ध/न/ट/ढ/ण)**

उदाहरणानि - कृ (८ उ.प.) - कृत, दा (१ प.प./३ उ.प.) - दत्त, पठ् (१ प.प.) - पठित,
लभ् (१ आ.प.) - लब्ध, मुच् (६ उ.प.) - मुक्त, दृश् (१ प.प.) - दृष्ट

**प्रथमान्तरूपाणि**

| पुंलिङ्गरूपाणि | | | स्त्रीलिङ्गरूपाणि | | | नपुंसकलिङ्गरूपाणि | | |
|---|---|---|---|---|---|---|---|---|
| कृतः | कृतौ | कृताः | कृता | कृते | कृताः | कृतम् | कृते | कृतानि |
| दत्तः | दत्तौ | दत्ताः | दत्ता | दत्ते | दत्ताः | दत्तम् | दत्ते | दत्तानि |
| पठितः | पठितौ | पठिताः | पठिता | पठिते | पठिताः | पठितम् | पठिते | पठितानि |
| लब्धः | लब्धौ | लब्धाः | लब्धा | लब्धे | लब्धाः | लब्धम् | लब्धे | लब्धानि |
| मुक्तः | मुक्तौ | मुक्ताः | मुक्ता | मुक्ते | मुक्ताः | मुक्तम् | मुक्ते | मुक्तानि |
| दृष्टः | दृष्टौ | दृष्टाः | दृष्टा | दृष्टे | दृष्टाः | दृष्टम् | दृष्टे | दृष्टानि |

**पठितः ग्रन्थः** **पठिता कविता** **पठितं काव्यम् ।**

**खादितः मोदकः** **खादिता कुण्डलिका** **खादितं फलम् ।**

**एतानि विशेषणानि धातुभ्यः निर्मितानि अतः धातुसाधितानि । एतानि विशेषणानि कर्मपदम् अनुसरन्ति ।**

**उपयोजनम् -** अ) विशेषणरूपेण - अहं वृक्षात् **पतितं फलं** खादामि ।

आ) कर्मवाच्ये वाक्ये क्रियापदस्थाने - १. रामेण **ग्रन्थः पठितः** ।

२. सीतया **पत्रं लिखितम्** ।

३. छात्रैः **प्रश्नाः पृष्टाः** ।

## क्तवतु-प्रत्ययान्तानि

**(कर्तरि-भूतकालवाचक-धातुसाधित-विशेषणानि)**

**सूत्रम् - मूलधातुः + तवत्**

उदाहरणानि - कृ - कृतवत्, दा - दत्तवत्, पठ् - पठितवत्,
लभ् - लब्धवत्, मुच् - मुक्तवत्, दृश् - दृष्टवत्

**प्रथमान्तरूपाणि**

| पुंलिङ्गरूपाणि | | | स्त्रीलिङ्गरूपाणि | | | नपुंसकलिङ्गरूपाणि | | |
|---|---|---|---|---|---|---|---|---|
| कृतवान् | कृतवन्तौ | कृतवन्तः | कृतवती | कृतवत्यौ | कृतवत्यः | कृतवत् | कृतवती | कृतवन्ति |
| दत्तवान् | दत्तवन्तौ | दत्तवन्तः | दत्तवती | दत्तवत्यौ | दत्तवत्यः | दत्तवत् | दत्तवती | दत्तवन्ति |
| पठितवान् | पठितवन्तौ | पठितवन्तः | पठितवती | पठितवत्यौ | पठितवत्यः | पठितवत् | पठितवती | पठितवन्ति |
| लब्धवान् | लब्धवन्तौ | लब्धवन्तः | लब्धवती | लब्धवत्यौ | लब्धवत्यः | लब्धवत् | लब्धवती | लब्धवन्ति |
| मुक्तवान् | मुक्तवन्तौ | मुक्तवन्तः | मुक्तवती | मुक्तवत्यौ | मुक्तवत्यः | मुक्तवत् | मुक्तवती | मुक्तवन्ति |
| दृष्टवान् | दृष्टवन्तौ | दृष्टवन्तः | दृष्टवती | दृष्टवत्यौ | दृष्टवत्यः | दृष्टवत् | दृष्टवती | दृष्टवन्ति |

**पठितवान् बालकः** **पठितवती बालिका** **पठितवत् अपत्यम् ।**

**खादितवान् बालकः** **खादितवती बालिका** **खादितवत् अपत्यम् ।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**एतानि विशेषणानि धातुत: निर्मितानि अत: धातुसाधितानि । एतानि विशेषणानि कर्तृपदम् अनुसरन्ति ।**

**उपयोजनम् –**

अ) विशेषणरूपेण – अभ्यासं **कृतवान् छात्र:** गुणान् प्राप्नोति ।


आ) कर्तृवाच्ये वाक्ये क्रियापदस्थाने – **बालक:** ग्रन्थं **पठितवान्** । **सीता** पत्रं **लिखितवती** । छात्रा: प्रश्नान् **पृष्टवन्त:** ।

| कर्तृवाच्यम् | कर्मवाच्यम् |
|---|---|
| **कवि:** काव्यं **रचितवान्** । | कविना **काव्यं रचितम्** । |
| **गुरु:** ज्ञानं **दत्तवान्** । | गुरुणा **ज्ञानं दत्तम्** । |
| **छात्रा:** पाठान् **पठितवन्त:** । | छात्रै: **पाठा: पठिता:** । |
| **मालाकार:** पुष्पाणि **चितवान्** । | मालाकारेण **पुष्पाणि चितानि** । |
| **ग्राहक:** आपणिकं **पृष्टवान्** । | ग्राहकेण **आपणिक: पृष्ट:** । |
| **देवी** भक्तं **प्रेरितवती** । | देव्या **भक्त: प्रेरित:** । |


**अवधेयम् –**
**वाच्यपरिवर्तनसमये लट्लकार–वाक्यानि तथा च केवलं भूतकालवाचक–धातुसाधित–विशेषणानि एव अपेक्षितानि ।**

**क्रीडत–नन्दत**

**धातुरूपाणि वा धातुसाधितानि निरीक्षध्वम् ।**




**भाष् धातो: योग्यरूपै: रिक्तस्थानानि पूरयत ।**






Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

धातु–साधित–विशेषणानि (पुं., प्रथमा, ए.व.)

| धातुः | क्त | क्तवतु | कृत्याः | | | शतृ/शानच् |
|---|---|---|---|---|---|---|
| गम्–गच्छ् (१ प.प.) | गतः | गतवान् | गम्यः | गन्तव्यः | गमनीयः | गच्छन् |
| रम् (१ आ.प.) | रतः | रतवान् | रम्यः | रन्तव्यः | रमणीयः | रममाणः |
| मन् (४ आ.प.) | मतः | मतवान् | मान्यः | मन्तव्यः | मननीयः | मन्यमानः |
| दा–यच्छ् (१ प.प.) | दत्तः | दत्तवान् | देयः | दातव्यः | दानीयः | यच्छन् |
| पा–पिब् (१ प.प.) | पीतः | पीतवान् | पेयः | पातव्यः | पानीयः | पिबन् |
| ज्ञा (९ उ.प.) | ज्ञातः | ज्ञातवान् | ज्ञेयः | ज्ञातव्यः | ज्ञानीयः | जानन्/जानानः |
| नी–नय् (१ उ.प.) | नीतः | नीतवान् | नेयः | नेतव्यः | नयनीयः | नयन्/नयमानः |
| कृ (८ उ.प.) | कृतः | कृतवान् | कार्यः/ कृत्यः | कर्तव्यः | करणीयः | कुर्वन्/कुर्वाणः |
| सृ (१ प.प.) | सृतः | सृतवान् | सार्यः | सर्तव्यः | सरणीयः | सरन् |
| पठ् (१ प.प.) | पठितः | पठितवान् | पाठ्यः | पठितव्यः | पठनीयः | पठन् |
| पत् (१ प.प.) | पतितः | पतितवान् | पात्यः | पतितव्यः | पतनीयः | पतन् |
| खाद् (१ प.प.) | खादितः | खादितवान् | खाद्यः | खादितव्यः | खादनीयः | खादन् |
| वद् (१ प.प.) | उदितः | उदितवान् | वाद्यः | वदितव्यः | वदनीयः | वदन् |
| नृत् (४ प.प.) | नर्तितः | नर्तितवान् | नृत्यः | नर्तितव्यः | नर्तनीयः | नृत्यन् |
| लिख् (६ प.प.) | लिखितः | लिखितवान् | लेख्यः | लेखितव्यः | लेखनीयः | लिखन् |
| सेव् (१ आ.प.) | सेवितः | सेवितवान् | सेव्यः | सेवितव्यः | सेवनीयः | सेवमानः |
| वन्द् (१ आ.प.) | वन्दितः | वन्दितवान् | वन्द्यः | वन्दितव्यः | वन्दनीयः | वन्दमानः |
| प्र+अर्थ् (१०आ.प.) | प्रार्थितः | प्रार्थितवान् | प्रार्थ्यः | प्रार्थयितव्यः | प्रार्थनीयः | प्रार्थयमानः |
| पूज् (१० उ.प.) | पूजितः | पूजितवान् | पूज्यः | पूजयितव्यः | पूजनीयः | पूजयन्/पूजयमानः |
| कथ् (१० उ.प.) | कथितः | कथितवान् | कथ्यः | कथयितव्यः | कथनीयः | कथयन्/कथयमानः |
| दृश्–पश्य् (१ प.प.) | दृष्टः | दृष्टवान् | दृश्यः | द्रष्टव्यः | दर्शनीयः | पश्यन् |
| प्रच्छ्–पृच्छ् (६ प.प.) | पृष्टः | पृष्टवान् | प्रच्छ्यः | प्रष्टव्यः | प्रच्छनीयः | पृच्छन् |
| प्र+विश् (६ प.प.) | प्रविष्टः | प्रविष्टवान् | प्रवेश्यः | प्रवेष्टव्यः | प्रवेशनीयः | प्रविशन् |
| आ+दिश् (६ उ.प.) | आदिष्टः | आदिष्टवान् | आदेश्यः | आदेष्टव्यः | आदेशनीयः | आदिशन्/ आदिशमानः |
| मुच्–मुञ्च् (६ उ.प.) | मुक्तः | मुक्तवान् | मोच्यः | मोक्तव्यः | मोचनीयः | मुञ्चन्/मुञ्चमानः |
| वच् (२ प.प.) | उक्तः | उक्तवान् | वाच्यः | वक्तव्यः | वचनीयः | वचन् |
| आ+रभ् (१ आ.प.) | आरब्धः | आरब्धवान् | आरभ्यः | आरब्धव्यः | आरभणीयः | आरभमाणः |
| लभ् (१ आ.प.) | लब्धः | लब्धवान् | लभ्यः | लब्धव्यः | लभनीयः | लभमानः |
| वह् (१ उ.प.) | ऊढः | ऊढवान् | वाह्यः | वोढव्यः | वहनीयः | वहन्/वहमानः |
| आ+रुह्–रोह्(१ प.प.) | आरूढः | आरूढवान् | आरोह्यः | आरोढव्यः | आरोहणीयः | आरोहन् |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# त्रयोदशः पाठः चित्रकाव्यम् । (कण्ठस्थीकरणार्थम्)

सुभाषितं नाम सम्यक् रूपेण भाषितम् । संस्कृतसुभाषितानि आदर्शजीवनस्य गुह्यम् आख्यान्ति । वैशिष्ट्यपूर्णानि सुभाषितानि संस्कृतभाषायाः सौन्दर्यस्थानानि खलु । बुद्धिविकासकानि सुभाषितानि नाम चित्रकाव्यानि । तानि रञ्जकानि अपि सन्ति । अस्मिन् चित्रकाव्ये अन्तरालापः, अन्योक्तिः, हास्योक्तिः, कर्तृगुप्ता प्रहेलिका, समस्यापूर्तिः, वाकोवाक्यम् इत्यादयः सुभाषितानां प्रकाराः सन्ति ।














वृत्तम्–अनुष्टुप्

कं संजघान कृष्णः<br>
का शीतलवाहिनी गङ्गा ।<br>
के दारपोषणरताः<br>
कं बलवन्तं न बाधते शीतम् ।।१।।

–(अन्तरालापः)



वृत्तम्–शार्दूलविक्रीडितम्

रे रे चातक सावधानमनसा मित्र क्षणं श्रूयताम्<br>
अम्भोदा बहवोऽपि सन्ति गगने सर्वेऽपि नैतादृशाः ।<br>
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा<br>
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ।।२।।

–(अन्योक्तिः)





Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com



**वृत्तम्–अनुष्टुप्**


वैद्यराज नमस्तुभ्यं यमराजसहोदर ।
यमस्तु हरति प्राणान् त्वं तु प्राणान् धनानि च ।।३।।

–(हास्योक्तिः)



**वृत्तम्–अनुष्टुप्**

राक्षसेभ्यः सुतां हृत्वा जनकस्य पुरीं ययौ ।
अत्र कर्तृपदं गुप्तं यो जानाति स पण्डितः ।।४।। –(कर्तृगुप्ता प्रहेलिका)





Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com





वृत्तम्–उपजातिः

अयं न भक्तो न च पूजको वा
घण्टां स्वयं नादयते तथापि ।
धनं जनेभ्यः किल याचतेऽयं
न याचको वा न च निर्धनो वा ॥५॥

–(प्रहेलिका)






वृत्तम्–इन्द्रवज्रा

रामाभिषेके जलमाहरन्त्या
हस्तात् सृतो हेमघटो युवत्याः ।
सोपानमार्गेण करोति शब्दं
ठंठं ठठं ठं ठठठं ठठं ठः ॥६॥
–(समस्यापूर्तिः)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



वृत्तम्–शार्दूलविक्रीडितम्

**भिक्षु: क्वास्ति बलेर्मखे**
**पशुपति: किं नास्त्यसौ गोकुले**
**मुग्धे पन्नगभूषण:**
**सखि सदा शेते च तस्योपरि ।**
**आर्ये मुञ्च विषादमाशु**
**कमले नाहं प्रकृत्या चला**
**चेत्थं वै गिरिजासमुद्रसुतयो:**
**सम्भाषणं पातु: व: ।।७।।**
**–(वाकोवाक्यम्)**

**सन्धिविग्रहा:**

| | | | |
|---|---|---|---|
| १) बहवोऽपि | = बहव: + अपि | ९) जलमाहरन्त्या | = जलम् + आहरन्त्या । |
| २) सर्वेऽपि | = सर्वे + अपि । | १०) क्वास्ति | = क्व + अस्ति । |
| ३) नैतादृशा: | = न + एतादृशा: । | ११) नास्त्यसौ | = न + अस्ति + असौ । |
| ४) वृष्टिभिरार्द्रयन्ति | = वृष्टिभि: + आर्द्रयन्ति । | १२) तस्योपरि | = तस्य + उपरि । |
| ५) नमस्तुभ्यम् | = नम: + तुभ्यम् । | १३) विषादमाशु | = विषादम् + आशु । |
| ६) यमस्तु | = यम: + तु । | १४) नाहम् | = न + अहम् । |
| ७) तथापि | = तथा + अपि । | १५) चेत्थम् | = च + इत्थम् । |
| ८) याचतेऽयम् | = याचते + अयम् । | | |

## स्पष्टीकरणम्

**श्लोक: १ –** अन्तरालापस्य उदाहरणम् एतत् । अत्र प्रश्नचतुष्टयं वर्तते । प्रश्ने एव तस्य उत्तरं वर्तते । एषा शब्दालङ्कारस्य चमत्कृति: । कस्यचिद् अक्षरस्य संयोजनेन विघटनेन वा प्रश्नस्य उत्तरं प्राप्यते । यथा – १) **कं सं**जघान कृष्ण: ? कृष्ण: कं मारितवान् ? उत्तरम् – **कंसं** जघान कृष्ण:। २) **का शी**तलवाहिनी गङ्गा ? उत्तरम् – **काशी**तलवाहिनी गङ्गा। ३) **के दार**पोषणरता: ? **दारा:** नाम पत्नी । दाराणां (कुटुम्बस्य) पोषणे **के** रता: ? उत्तरम् – **केदार**–पोषणरता: । केदारा: नाम क्षेत्राणि । ४) **कं बल**वन्तं न बाधते शीतम् ? उत्तरम् – **कम्बल**वन्तं शीतं न बाधते। य: कम्बलं धारयति, तं शीतं न बाधते इति ।

**श्लोक: २ –** अन्योक्तिकाव्यप्रकारस्य उदाहरणमेतत् । चातक: पक्षी नवजलबिन्दून् एव पिबति । अत: मेघ: एव तस्य आश्रय:। सर्वे मेघा: जलदायका: न । केचन वसुधां वृष्टिभि: आर्द्रयन्ति, केचन वृथा एव गर्जन्ति । अत: कवि: चातकं वदति, ''त्वं यं यं पश्यसि तस्य तस्य पुरत: दीनं वच: मा ब्रूहि ।'' चातकमाध्यमेन वस्तुत: कवि: दीनजनान् उद्दिश्य वदति, ''ये ये धनिका: तेषां पुरत: दीनतया याचनां मा कुरु, यत: सर्वे दानशूरा: न सन्ति ।

**श्लोक: ३ –** हे यमराजसहोदर वैद्यराज, तुभ्यं नम: । यम: तु प्राणान् हरति किन्तु त्वं तु प्राणान् धनानि च सर्वं हरसि। एतेन श्लोकेन कवि: धनलुब्धान् अपरिपक्ववैद्यान् निन्दति हासञ्च जनयति ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**श्लोकः ४ –** चित्रकाव्यस्य अपरः प्रकारोऽयम् । अस्य सरलार्थः वर्तते – कश्चन जनः राक्षसेभ्यः सुतां हत्वा जनकस्य पुरीं गतः। अपरः अर्थः – कश्चन जनः राक्षसेभ्यः जनकस्य सुतां हत्वा पुरीं गतः । अत्र कर्तृपदं गुप्तं तद् अन्वेष्टव्यम् । रामायणे ईदृशः कोऽपि उल्लेखः नास्ति । न कोऽपि राक्षसेभ्यः सुतां हत्वा जनकपुरीं (पितृपुरीं) गतः । न वा जनकसुतां राक्षसेभ्यः हत्वा स्वपुरीं गतः । अतः उत्तरस्य अवगमनं न भवति । उत्तरस्य अवबोधाय 'राक्षसेभ्यः' इति पञ्चमीविभक्तेः बहुवचनम् इति न ग्रहीतव्यम् । प्रत्युत 'राक्षसानाम् इभ्यः' राक्षसेभ्यः इति षष्ठी तत्पुरुषसमासः ग्रहणीयः। तेन उत्तरं प्राप्यते – राक्षसानाम् इभ्यः (राजा) रावणः। तेन अर्थसङ्गतिः अपि भवति । यथा – रावणः (राक्षसेभ्यः) जनकस्य सुतां हत्वा पुरीं गतः ।

**श्लोकः ५ –** एषः श्लोकः काव्यप्रवाहः इति काव्यसङ्ग्रहात् उद्धृतः, **कविः – श्री. सदाशिव त्र्यम्बक रहातेकर** । एतद् अपह्नुति-अलङ्कारस्य उदाहरणम् । अयं जनः यद्यपि न भक्तः न पूजकः तथापि स्वयं घण्टां नादयते। सः न याचकः न वा निर्धनः तथापि जनेभ्यः (जनान्) धनं याचते । तर्हि वदत, सः कः ? अस्य उत्तरं वर्तते । 'कःहवानयाकलो।' (विपरीतक्रमेण पठत ।)

**श्लोकः ६ –** समस्यापूर्तेः उदाहरणम् एतत् । 'ठंठं ठठं ठं ठठठं ठठं ठः ।' इति वर्तते समस्या । रामस्य राज्याभिषेकसमये काचित् युवती सुवर्णघटेन जलानयने मग्ना आसीत् । सोपानमार्गेण गमनसमये तस्याः हस्तात् सुवर्णघटः पतितः, तदा यः ध्वनिः अभवत् स एव शब्दोऽयम् ।

**श्लोकः ७ –** लक्ष्मीपार्वत्योः संवादोऽयम् । अत्र लक्ष्मीः पार्वतीं शिवस्य उपस्थितिविषये प्रश्नान् पृच्छति । तत्कृते सा ईदृशानि विशेषणानि योजयति येन शिवस्य अधनत्वं सूचितं भवति । लक्ष्म्याः एतं भावं ज्ञात्वा चतुरा पार्वती अपि सर्वाणि विशेषणानि सुबुद्ध्या नारायणं प्रति परिवर्तयति । तयोः संवादः

लक्ष्मीः = भिक्षुः (शिवः) कुत्र अस्ति ?
पार्वती = बलेः मखे (वामनरूपेण गतः खलु ।)
लक्ष्मीः = पशुपतिः (कुत्र अस्ति ?)
पार्वती = किम् असौ गोकुले नास्ति ?
लक्ष्मीः = मुग्धे, पन्नगभूषणः (कुत्र अस्ति ?)
पार्वती = सखि, सदा तस्य (शेषस्य) उपरि च शेते ।
लक्ष्मीः = आर्ये, विषादं (दुःखं/विषम् अत्ति सः विषादः शिवः, तं) मुञ्च ।
पार्वती = कमले, अहं (त्वत्सदृशी) प्रकृत्या न चला ।
तयोः ईदृशः संवादः वः (युष्मान्) पातु (रक्षतु) ।

## भाषाभ्यासः



**श्लोकः १**

**१. पूर्णवाक्येन उत्तरत।**

अ) कृष्णः कं जघान ? आ) दारपोषणे के रताः ?
इ) कं शीतं न बाधते ?

**२. समानार्थकं शब्दं लिखत ।**

कृष्णः, गङ्गा, रतः, बलवान् ।

**३. 'गङ्गा' इति पदस्य विशेषणम् अन्विष्यत लिखत च ।**

**४. 'कं संजघान' इति श्लोकं माध्यमभाषया स्पष्टीकुरुत ।**

**श्लोकः २.**

**१. पूर्णवाक्येन उत्तरत।**

अ) गगने के सन्ति ?
आ) कविः कं 'मित्र' इति सम्बोधयति ?
इ) जलदाः काम् आर्द्रयन्ति ?

**२. मेलनं कुरुत ।**

| विशेषणम् | विशेष्यम् |
|---|---|
| बहवः | वचः |
| दीनम् | चातकः |
| | अम्भोदाः |

**३. सूचनानुसारं कृतीः कुरुत ।**

अ) अम्भोदाः वसुधाम् आर्द्रयन्ति ।
(कर्तृपदम् एकवचने परिवर्तयत ।)

आ) त्वं दीनं वचः मा ब्रूहि ।
('त्वं' स्थाने भवान् योजयत ।)

**४. 'रे रे चातक' इति श्लोकं माध्यमभाषया स्पष्टीकुरुत ।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**श्लोकः ३.**

**१. पूर्णवाक्येन उत्तरत ।**

अ) कविः कं नमति? आ) कौ प्राणान् हरतः?

इ) वैद्यः किं किं हरति?

**२. श्लोकात् सम्बोधनान्तपदद्वयम् अन्विष्य लिखत ।**

**३. समानार्थकशब्दं लिखत ।**

यमः, वैद्यः, सहोदरः, धनम्


**४. सूचनानुसारं कृतीः कुरुत ।**

अ) _______ नमः । ('वैद्यराज' शब्दस्य योग्यं रूपं लिखत)

आ) वैद्यः प्राणान् हरति । (वाक्यं लङ्-लकारे परिवर्तयत ।)

**५. 'वैद्यराज नमस्तुभ्यम्' अस्य श्लोकस्य स्पष्टीकरणं माध्यमभाषया लिखत ।**

**६. जालरेखाचित्रं पूरयत ।**




**श्लोकः ४.**

**१. पूर्णवाक्येन उत्तरत ।**

अ) जनकस्य सुतां हत्वा कः ययौ?

आ) अत्र कर्तृपदं किम् ?

**२. समानार्थकं पदं लिखत ।**

सुता, पुरी, ययौ, पण्डितः ।

**३. सूचनानुसारं कृतीः कुरुत ।**

अ) राक्षसेभ्यः जनकस्य सुतां हत्वा पुरीं ययौ । (लङ्लकारे परिवर्तयत ।)

आ) यो जानाति स पण्डितः । (बहुवचने परिवर्तयत ।)

**४. प्रथमान्तं द्वितीयान्तं च पदं चित्वा लिखत ।**

**श्लोकः ५.**

**१. पूर्णवाक्येन उत्तरत ।**

अ) कः धनं याचते?


आ) 'अयं न भक्तो' इति प्रहेलिकायाः उत्तरं किम्?

**२. सन्धिविग्रहं कुरुत ।**

अ) याचतेऽयम् = याचते + _______ ।

आ) याचको वा = _______ + वा ।

**३. जालरेखाचित्रं पूरयत ।**




**श्लोकः ६.**

**१. पूर्णवाक्येन उत्तरत ।**

अ) कः शब्दं करोति?

आ) कस्याः हस्तात् सुवर्णघटः पतितः?

**२. समानार्थकशब्दं लिखत ।**

हेम, जलम्, शब्दः ।

**३. 'रामाभिषेके' अस्य श्लोकस्य स्पष्टीकरणं माध्यमभाषया लिखत ।**

**श्लोकः ७.**

**१. पूर्णवाक्येन उत्तरत ।**

अ) श्लोके कयोः सम्भाषणं वर्तते?

आ) श्लोके निर्दिष्टानि सम्बोधनपदानि लिखत ।

इ) विष्णुः भिक्षुरूपेण कुत्र गच्छति?

ई) विष्णुः कुत्र शेते ?

**२. समानार्थकं पदं लिखत ।**

भिक्षुः, मखः, पशुपतिः, कमला, गिरिजा

**३. श्लोके कानि क्रियापदानि ?**

**उपक्रमः**

१) 'समस्यापूर्ति'-श्लोकानां सङ्ग्रहं कुरुत ।

यथा- अ) मृगात् सिंहः पलायते ।

आ) शतचन्द्रं नभस्तलम् ।

२) अन्योक्तिश्लोकानां सङ्ग्रहं कुरुत ।

३) कामपि अन्याम् एकां प्रहेलिकां लिखत ।




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# चतुर्दशः पाठः प्रतिपदं संस्कृतम् ।

संस्कृतभाषा भारतस्य ज्ञानभाषा वर्तते । संस्कृते विद्यमानं ज्ञानं कालातीतम् अद्यापि सुसङ्गतं च । 'किमर्थं संस्कृतम् ?' 'कः लाभः संस्कृतपठनेन मम ?' 'विद्यालयोत्तरमपि अस्ति वा संस्कृताध्ययनस्य अवसरः ?' 'अपि संस्कृताध्ययनेन अहं वृत्तिं लभेय ?' इति बहवः प्रश्नाः छात्रजीवने अस्मान् सन्त्रासयन्ति । संस्कृताध्ययनेन युगानुकूला वृत्तिः तु लभ्यते एव अपि तु यस्मिन् क्षेत्रे वयं कार्यरताः तत्र अस्माकं गुणवत्ता अपि वर्धते । तदर्थं संस्कृतम् अवश्यम् अध्येतव्यम् । यः संस्कृतं सम्यक् जानाति स एव यथार्थतया तस्य सर्वेषु क्षेत्रेषु उपयोजनं कर्तुं शक्नोति ।



- अपि संस्कृतस्य अध्ययनं नाम रटनं तथा च प्रायः तत् अधिकगुणान् प्राप्तुम् एव करणीयम् ?
- संस्कृतभाषायाः उपयोजनं केषु कार्यक्षेत्रेषु भवति ?



(संवादस्थलम् – विमानतलस्य प्रतीक्षालयः ।) केचन जनाः यात्रायाः आरम्भार्थं प्रतीक्षन्ते । केचन सुखेन निद्रामग्नाः । केचन कॉफिपानस्य आनन्दम् अनुभवन्ति । तत्र एका महोदया प्राप्नोति । सा उपविश्य किमपि पुस्तकं पठितुं प्रारभते । पुस्तकस्य मुखपृष्ठे संस्कृत-सूक्ति-सङ्ग्रहः इति शीर्षकं वर्तते । तत् दृष्ट्वा समीपस्थः कोऽपि महाजनः तया सह वक्तुं प्रारभते ।

महोदयः – अपि भवती संस्कृतं पाठयति ?

महोदया – (सस्मितं) न खलु ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

महोदयः – भवत्याः समीपे एतं सुभाषितसङ्ग्रहं दृष्ट्वा मया एवं चिन्तितम् ।

महोदया – ओह् ! यद्यपि संस्कृतं न पाठयामि तथापि अस्य पुस्तकस्य मम कार्यक्षेत्रेण सह सम्बन्धः अस्ति।

महोदयः – एवम् । कस्मिन् क्षेत्रे कार्यरता भवती ?

महोदया – अहं व्यवस्थापनप्रशिक्षिकारूपेण कार्यं करोमि । मया अवगतं यद् रामायण–महाभारत–किरातार्जुनीय–रघुवंश–इत्यादिषु बहवः श्लोकाः सन्ति येषु व्यवस्थापनशास्त्रस्य मूलतत्त्वानि दृष्टान्तसहितानि निर्दिष्टानि । अनेन काव्यमाध्यमेन विषयप्रवेशः सुगमः भवति । एषा पद्धतिः मया स्वीकृता जनैरपि अभिमता । अतः मया पुनरेकवारं संस्कृतभाषायाः संस्कृतकाव्यादीनां च अध्ययनं प्रारब्धम्।

महोदयः – अहो आश्चर्यम्! शालायाः अनन्तरं खण्डितं मम संस्कृताध्ययनम् । तदपि अधुनैव पुनः आरब्धम् ।

महोदया – कथं कथम् ?

महोदयः – वस्तुतः अहं वाणिज्यशाखायाः स्नातकः । विधिशाखायाः पदवी अपि प्राप्ता मया । साम्प्रतं बहुराष्ट्रियसंस्थायां विधिविमर्शकरूपेण कार्यं करोमि । तदनुसृत्य कौटिलीयम् अर्थशास्त्रं, याज्ञवल्क्यस्मृतिः आदीनां ग्रन्थानाम् अध्ययनं साहाय्यकरं भवेत् इति गुरुभिः उक्तम् । अतः अधुना अहं शास्त्रविषयकाणां संस्कृतग्रन्थानाम् अध्ययने यत्नं करोमि । (स्यूतात् किमपि संस्कृतपुस्तकं दर्शयति ।)

(तयोः पृष्ठतः केचन युवकाः गोष्ठिषु रताः । प्रसादः, समीरः, लीना तथा तनुजा इत्येतानि परस्परमित्राणि । तेषु अन्यतमः तत् पुस्तकं दृष्ट्वा महोदयम् उपगम्य वदति ।)

समीरः – महोदय, भवतोः संवादे संस्कृतस्य सन्दर्भः श्रुतः मया । भवानपि विश्वसंस्कृतपरिषन्निमित्तं विदेशं प्रस्थितः ?

महोदयः – न खलु । परं कीदृशी एषा विश्वसंस्कृतपरिषद्? अपि भवान् संस्कृतस्य छात्रः ?

समीरः – आम् । अहम् आय. आय. टी. अर्थात् भारतीय–प्रौद्योगिकी–संस्थानम् इत्यत्र सङ्गणक – अभियान्त्रिकी इति विषयस्य छात्रः । तत्र छात्राः संस्कृतमपि पठितुं शक्नुवन्ति । अष्टाध्यायी इति व्याकरणशास्त्रविषयकः ग्रन्थः पाठ्यते तत्र मानव्यविद्याविभागे । अहं संस्कृतव्याकरणं सङ्गणकशास्त्रं च इति विषयम् अधिकृत्य संशोधनं करोमि । तद्विषयकं शोधनिबन्धं प्रस्तोतुम् अहं परिषदि निमन्त्रितः।

महोदया – अहो आश्चर्यम्! तन्त्रज्ञानसंस्थायाम्? संस्कृतस्य अध्ययनम् ?

महोदयः – महाविद्यालये संस्कृताध्ययनं केवलं कलाशाखायाः छात्राः कुर्वन्ति इत्यासीत् मे मतिः ।

समीरः – तिष्ठतु तावत् । तर्हि अवश्यं मेलयामि मे मित्राणि । एते सर्वेऽपि परिषदि सहभागिनः ।

प्रसादः – (अग्रे आगत्य) नमस्ते । अहं रसायनशास्त्रस्य छात्रः । प्राचीनभारतीयरसायनशास्त्रम् इति मम संशोधनक्षेत्रम् । तद्विषयकाः ग्रन्थाः संस्कृतभाषया लिखिताः । शालायां यद् संस्कृताध्ययनं कृतं तस्य उपयुक्तताम् अहम् अधुना अवगच्छामि ।

लीना – अहमपि भाषाशास्त्रम् अधीत्य बेङ्गलुरू इत्यत्र सॉफ्टवेअर–क्षेत्रे भारतीयभाषाविश्लेषिकारूपेण कार्यं करोमि । संस्कृतस्य ज्ञानम् आधुनिकभारतीय–भाषाणां विश्लेषणे अतीव साहाय्यकरं भवति इति मे अनुभवः ।

तनुजा – पार्श्वनिवेदनम् इति मे व्यवसायः । संस्कृतश्लोकादीनां पठनेन शब्दोच्चारणस्य उत्तमः अभ्यासः भवति। तेन अभिनये निवेदने च प्रभावः वर्धते । साम्प्रतं कलाक्षेत्रे कार्यरताः अस्मासु केचन भरतमुनेः नाट्यशास्त्रस्य अध्ययनं कुर्वन्ति ।

समीरः – भोः, भारतीयविद्यायाः नाम भारतीयतत्त्वज्ञान–योगशास्त्र–इतिहास– स्थापत्यादिशास्त्राणाम् अध्ययनाय विदेशेष्वपि नैके जनाः उत्सुकाः । तदर्थं काश्चन दूरचित्रवाहिन्यः अपि सन्ति । तत्र संस्कृततज्ज्ञानाम् आवश्यकता वर्तते । मम सुहृद् आशयसम्पादकरूपेण तत्र कार्यरतः ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

महोदया – अस्माभिः संस्कृतस्य अध्ययनं शालायां कृतम् । परं तस्य अनेन प्रकारेण उपयोजनं भवेदिति अस्माभिः नैव चिन्तितम् ।

महोदयः – सत्यमेव ।

लीना – यस्मिन् कस्मिन्नपि क्षेत्रे वयं वृत्त्यर्थं कार्यरताः स्याम, तत्र संस्कृतज्ञानम् अस्मत्कृते विशेषार्हता भवति ।

## भाषाभ्यासः



### १. पूर्णवाक्येन उत्तरत ।

अ) महोदया किं रूपेण कार्यं करोति ?

आ) केन माध्यमेन विषयप्रवेशः सुगमः भवति ?

इ) व्याकरणशास्त्रविषयकग्रन्थस्य नाम किम् ?

ई) समीरः किम् अधिकृत्य संशोधनं करोति ?

उ) प्रसादस्य संशोधनक्षेत्रं किम् ?

ऊ) तनुजायाः व्यवसायः कः ?

ए) शब्दोच्चारणस्य अभ्यासः केन भवति ?

### २. माध्यमभाषया उत्तरत ।

अ) संस्कृताध्ययनम् अन्यक्षेत्रेषु कथम् उपयुक्तम् ?

### ३. प्रश्ननिर्माणं कुरुत ।

अ) श्लोकेषु व्यवस्थापनशास्त्रस्य मूलतत्त्वानि निर्दिष्टानि ।

आ) पदवी मया प्राप्ता ।

इ) प्रसादेन संस्कृतस्य अध्ययनं शालायां कृतम् ।

ई) समीरः परिषदि निमन्त्रितः ।

उ) संस्कृताध्ययनं कलाशाखायाः छात्राः कुर्वन्ति ।

### ४. समानार्थकशब्दं मेलयत ।

अ) संशोधनम्, अवगतम्, सुगमः, भाषा

आ) ज्ञातम्, सुलभः, अनुसन्धानम्, भारती

### ५. विरुद्धार्थकशब्दान् लिखत ।

मित्राणि, उत्सुकाः, विदेशः

### ६. सन्धिविग्रहं कुरुत ।

(अ) जनैरपि (आ) अधुनैव (इ) सर्वेऽपि

(ई) विदेशेष्वपि (उ) कस्मिन्नपि

### ७. मेलनं कुरुत ।

| विशेषणम् | विशेष्यम् |
|---|---|
| बहवः | ग्रन्थान् |
| सुगमः | जनाः |
| एका | ज्ञानम् |
| शास्त्रविषयकान् | अभ्यासः |
| साहाय्यकरम् | महिला |
| उत्तमः | विषयप्रवेशः |
| उत्सुकाः | श्लोकाः |

### ८. सूचनानुसारं कृतीः कुरुत ।

अ) अहं वाणिज्यशाखायाः स्नातकः । (बहुवचने परिवर्तयत ।)

आ) अहम् अध्ययने यत्नं करोमि । (वाक्यं विधिलिङ्लकारे परिवर्तयत ।)

इ) सः महोदयम् उपगम्य वदति । (पूर्वकालवाचकं निष्कास्य वाक्यं लिखत ।)

ई) अपि भवती संस्कृतं पाठयति ? ('भवती' स्थाने 'त्वं' योजयत ।)

उ) पदवी अपि प्राप्ता मया । (प्रयोगपरिवर्तनं कुरुत ।)

ए) छात्राः संस्कृतमपि पठितुं शक्नुवन्ति । (एकवचने परिवर्तयत ।)

ऐ) वयं कार्यरताः स्याम । (लोट्-लकारे परिवर्तयत ।)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

९) धातुसाधित–विशेषण–तालिकां पूरयत ।

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| प्रच्छ्–पृच्छ् (६ प.प.) | ________ | पृष्टवान् | ________ | पृच्छन् |
| रम् (१ आ.प.) | रतः | ________ | रन्तव्यः | ________ |
| कृ (८ उ.प.) | ________ | ________ | कार्यः | कुर्वाणः |

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| आ+रुह्–रोह् (१ प.प.) | ________ | आरूढवान् | ________ | आरोहन् |
| लिख् (२ प.प.) | लिखितः | ________ | लेखितव्यः | ________ |
| सेव् (१ आ.प.) | सेवितः | सेवितवान् | ________ | ________ |

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| रभ्(१ आ.प.) | रब्धः | ________ | ________ | रभमाणः |
| मुच्–मुञ्च् (६ उ.प.) | ________ | ________ | मोचनीयः | मुञ्चन् |
| ज्ञा (९ उ.प.) | ज्ञातः | ज्ञातवान् | ________ | ________ |

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| पा–पिब् (१ प.प.) | ________ | ________ | पेयः | पिबन् |
| प्र+विश् (६ उ.प.) | प्रविष्टः | ________ | ________ | प्रविशन् |
| वद् (१ प.प.) | ________ | उदितवान् | वदनीयः | ________ |

१०. जालरेखाचित्रं पूरयत ।

अ)

**संस्कृतग्रन्थाः**

- कौटिलीयम् अर्थशास्त्रम्
- 
- 
- 

आ)

**विदेशीयाः जनाः उत्सुकाः**

- ________ अध्ययनाय
- ________ अध्ययनाय
- ________ अध्ययनाय
- ________ अध्ययनाय

११. तालिकां पूरयत ।

| विश्वसंस्कृतपरिषदि सहभागिनः जनाः | |
|---|---|
| समीरः | ________ |
| ________ | रसायनशास्त्रच्छात्रः |
| लीना | ________ |
| ________ | पार्श्वनिवेदिका |

756XDD




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## पञ्चदशः पाठः मानवताधर्मः । (सरलार्थलेखनार्थम्)

कलियुगेऽस्मिन् सर्वत्र विविधधर्माणां प्रचारः भवति इति दृश्यते । किन्तु, 'धर्मः' सङ्कल्पनायाः कः अर्थः इति चेत् यः धारयति सः धर्मः । स्वकर्तव्यस्य पालनं नाम धर्मः । यथा – राजधर्मः, पितृधर्मः, कन्याधर्मः, पतिधर्मः, पत्नीधर्मः इत्यादयः ।

यदि मानवः सर्वत्र शान्तिम् इच्छति, विवादं युद्धं च त्यक्तुम् इच्छति तर्हि तेन मानवताधर्म एव पालनीयः । सर्वे धर्माः मानवताहितवादिनः एव । अतः मानवता सर्वधर्माणां मूलम् । स मानवताधर्म एव अत्र वर्णितः अस्ति **म. म. डॉ. देवीप्रसाद खरवण्डीकरमहाभागैः** ।




यथैव सकला नद्यः प्रविशन्ति महोदधिम्।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ।।१।।

षड्जमूला यथा सर्वे सङ्गीते विविधाः स्वराः ।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ।।२।।

एकीभूय यथा सर्वे वर्णा गच्छन्ति शुक्लताम् ।
तथा सम्भूय शंसन्ति धर्मा मानवतागुणम् ।।३।।

सर्वं व्याप्नोति सलिलं शर्करा लवणं यथा ।
एवं मानवताधर्मो धर्मान् व्याप्नोति सर्वथा ।।४।।

यथा प्रकाशयत्येको भानुर्भुवनमण्डलम् ।
धर्मान् प्रकाशयत्येकस्तथा मानवतागुणः ।।५।।

आत्मौपम्यं समाश्रित्य मानवो मानवैः सह ।
यदा व्यवहरेल्लोके तदा मानवता भवेत् ।।६।।

सर्वधर्मान् परित्यज्य भज मानवतां ध्रुवम् ।
एषोऽभ्युदयकृत् पन्थाः तथा श्रेयस्करोऽपि च ।।७।।

### भाषाभ्यासः

**१. पूर्णवाक्येन उत्तरं लिखत ।**

अ) सकला नद्यः कं प्रविशन्ति ?
आ) सङ्गीते स्वराः कीदृशाः ?
इ) कः सर्वधर्मान् व्याप्नोति ?
ई) भानुः कं प्रकाशयति ?
उ) कां भज इति कविः वदति ?

**२. सन्धिविग्रहं कुरुत ।**

अ) भानुर्भुवनमण्डलम् = ______ + भुवनमण्डलम् ।
आ) प्रकाशयत्येकस्तथा = ______ + ______ + तथा ।
इ) व्यवहरेल्लोके = ______ + लोके ।
ई) एषोऽभ्युदयकृत् = एषः + ______ ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**३. पाठात् ल्यबन्त–अव्ययानि चित्वा लिखत ।**

**४. सूचनानुसारं कृती: कुरुत ।**

अ) सर्वधर्मान् परित्यज्य ध्रुवं मानवतां भज । (पूर्वकालवाचकं निष्कासयत।)
आ) नद्य: महोदधिं प्रविशन्ति । (कर्तृपदं एकवचने परिवर्तयत ।)
इ) त्वं सर्वधर्मान् परित्यज्य मानवतां भज । ('त्वं' स्थाने 'भवान्' योजयत ।)
ई) सर्वे धर्मा: मानवतागुणं शंसन्ति । (कर्मवाच्ये परिवर्तयत ।)
उ) भानु: भुवनमण्डलं प्रकाशयति । (णिजन्तं निष्कासयत ।)

**५. समानार्थकशब्दमेलनं कुरुत ।**

(१) सरित् (२) रङ्ग: (३) अम्भ: (४) दिनकृत् (५) मार्ग:
(अ) वर्ण: (आ) भानु: (इ) नदी (ई) पन्था: (उ) सलिलम्

**६. विशेष्यै: रिक्तस्थानानि पूरयत ।**

सर्वे — ______
सकला: — ______
श्रेयस्कर: — ______
षड्जमूला: — ______

**७. क्रियापदतालिकां पूरयत ।**

| ए.व. | द्विव. | ब.व. | पुरुष: | लकार: |
|---|---|---|---|---|
| नर्तिष्यति | ______ | ______ | प्रथम: | लृट् |
| ______ | दिशेथे | ______ | मध्यम: | लट् |
| ______ | ______ | अमिलाम | उत्तम: | लङ् |

**८. नामतालिकां पूरयत ।**

| ए.व. | द्विव. | ब.व. | विभक्ति: |
|---|---|---|---|
| ______ | ऋत्विग्भ्याम् | ______ | तृतीया |
| ______ | ______ | स्रग्भ्य: | चतुर्थी |
| दिशि | ______ | ______ | सप्तमी |

| ए.व. | द्विव. | ब.व. | विभक्ति: |
|---|---|---|---|
| ______ | ______ | योगिषु | सप्तमी |
| ______ | श्रेष्ठिनौ | ______ | प्रथमा |
| धाम्ना | ______ | ______ | तृतीया |

75FTF1



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अभ्यासपत्रम् ४



(१३, १४, १५ पाठानाम् आधारेण)

**१. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत ।**

अ) अष्टाध्यायी इति नाट्यशास्त्रविषयक: ग्रन्थ: अस्ति ।

आ) संस्कृतस्य ज्ञानम् आधुनिकभारतीयभाषाणां विश्लेषणे अतीव साहाय्यकरं भवति ।

**२. उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।**

अ) ________ समीपे सुभाषितसङ्ग्रहं दृष्ट्वा मया चिन्तितम् । (भवत्यै/भवत्या:)

आ) ________ अवगतम् । (मया/अहम्)

इ) पृष्ठत: ________ युवका: गोष्ठिषु रता: । (कश्चन/केचन)

ई) अस्माभि: संस्कृतस्य अध्ययनं ________ कृतम् । (शालां/शालायां)

उ) एते सर्वेऽपि ________ सहभागिन: । (परिषदि/कार्यशालायां)

**३. विरुद्धार्थकशब्दान् लिखत ।**

बलवान्, पुरत:, निर्धन:, मित्रम्, पण्डित:, श्रेयस्कर: ।

**४. समासविग्रहं कुरुत ।**

दारपोषणरता:, यमराजसहोदर:, रामाभिषेक:, हेमघट:, पशुपति:, पन्नगभूषण:, समुद्रसुता, प्रतीक्षालय:, निद्रामग्न:, समीपस्थ:, सुभाषितसङ्ग्रह:, महाकाव्यम्, महाविद्यालय:, भरतमुनि:, विशेषार्हता, मानवताधर्म:, सर्वधर्मा:, अभ्युदयकृत्, अम्भोदा:, सावधानमन: ।

**५. नामतालिकां पूरयत ।**

| ए.व. | द्विव. | ब.व. | विभक्ति: |
|---|---|---|---|
| ________ | भूमिभ्याम् | ________ | पञ्चमी |
| विद्युति | ________ | ________ | सप्तमी |
| ________ | ________ | अम्बूनि | प्रथमा |

**६. सर्वनामतालिकां पूरयत ।**

| ए.व. | द्विव. | ब.व. | विभक्ति: |
|---|---|---|---|
| एतेन | ________ | ________ | तृतीया |
| ________ | ________ | युष्मान्/व: | द्वितीया |
| ________ | ________ | काभ्य: | चतुर्थी |

**७. क्रियापदतालिकां पूरयत ।**

| ए.व. | द्विव. | ब.व. | पुरुष: | लकार: |
|---|---|---|---|---|
| ________ | यच्छत: | ________ | प्रथम: | लट् |
| ________ | स्तम् | ________ | मध्यम: | लोट् |
| विन्देयम् | ________ | ________ | उत्तम: | विधिलिङ् |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| ए.व. | द्विव. | ब.व. | पुरुषः | लकारः |
|---|---|---|---|---|
| सहते | ________ | ________ | प्रथमः | लट् |
| ________ | लिखेतम् | ________ | मध्यमः | विधिलिङ् |
| आसीत् | ________ | ________ | प्रथमः | लङ् |

| ए.व. | द्विव. | ब.व. | पुरुषः | लकारः |
|---|---|---|---|---|
| ________ | ________ | पूजयाम | उत्तमः | लोट् |
| ________ | अकुर्वाथाम् | ________ | मध्यमः | लङ् |
| ________ | ________ | गमिष्यामः | उत्तमः | लृट् |

८. **धातुसाधित-विशेषण-तालिकां पूरयत ।**

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| पूज् (१० उ.प.) | ________ | ________ | पूज्यः | पूजयमानः |
| खाद् (१ प.प.) | खादितः | खादितवान् | ________ | ________ |
| लभ् (१ आ.प.) | ________ | लब्धवान् | लभनीयः | ________ |

## वाक्यं शुद्धं कुरुत ।

**(कर्ता-क्रियापद-सम्बन्धः, विशेषण-विशेष्य-सम्बन्धः, उपपद-विभक्ति-अव्ययानि)**

यथा- वानरः फलानि खादन्ति । ⇨ **वानराः** फलानि खादन्ति ।

१) ज्ञानस्य विना सुखं नास्ति ।
२) भवान् किं करोषि ।
३) विद्यालयस्य परितः वृक्षाः सन्ति ।
४) निर्धनः पुरुषं तु मित्राणि अपि त्यजन्ति ।
५) अहं कथायाः पुस्तकं पठति ।
६) एकं बालिका पाठं न अस्मरत् ।
७) भारतदेशे विशालाः अरण्यानि सन्ति ।
८) अन्नं पूर्णः ब्रह्म अस्ति ।
९) इदं पत्राणि स्वच्छानि सन्ति ।
१०) नदीभ्यः गङ्गा श्रेष्ठा ।
११) तिस्रः फलानि आनय ।
१२) नगरस्य बहिः वनं विद्यते ।
१३) त्वं नृत्यं करोति ।
१४) हनुमान् नमः ।
१५) शशिनि सह तारकाः अपि रात्रौ गगने शोभन्ते ।
१६) विद्यार्थिभ्यः कृते शिक्षकः पुस्तकानि आनयति ।
१७) भूभृते उभयतः अमात्यद्वयम् अस्ति ।
१८) विवादात् अलम् ।
१९) चन्द्रमसं समीपे तारका विद्यते ।
२०) सवित्रा अभितः ग्रहाः भ्रमन्ति ।

**एतादृशानि अन्यानि वाक्यानि प्रष्टव्यानि ।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



# णिजन्ताः (प्रयोजकाः)।





बालकः पठति ।



शिक्षकः बालकं पुस्तकं **पाठयति** ।



बालकः अन्नं भुङ्क्ते ।




माता बालकम् अन्नं **भोजयति** ।



बालकः जलं पिबति ।



पिता बालकं जलं **पाययति** ।



वृक्षः वर्धते ।



बालिका वृक्षं **वर्धयति** ।



बालकः आसन्दात् पतति ।



रमेशः बालकम् आसन्दात् **पातयति** ।



बालिका चित्रं पश्यति ।



सखी बालिकां चित्रं **दर्शयति** ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



यानं चलति ।



चालकः यानं **चालयति** ।



बालिका गायति ।



पिता बालिकया
गीतं **गापयति** ।



सूदः अन्नं पचति ।



गृहिणी सूदेन
अन्नं **पाचयति** ।

## सम्भाषापत्रम्

**रूपशृङ्खलां पूरयत ।**

| | | | |
|---|---|---|---|
| स्था – स्थापयति/ते | भू – ______ | वच् – वाचयति/ते | नम् – ______ |
| दा – ______ | कृ –कारयति/ते | पठ् – ______ | मुच् – मोचयति/ते |
| मा – ______ | मृ – ______ | वद् – ______ | कुप् – ______ |
| ज्ञा – ______ | वृ – ______ | हस् – ______ | बुध् – ______ |
| पा – पालयति/ते | तॄ – ______ | मन् – ______ | भुज् – ______ |
| पा – पाययति/ते | स्मृ – ______ | लिख् – लेखयति/ते | रुद् – ______ |
| गै – ______ | धृ – ______ | प्र + विश् – ____ | वृध् – वर्धयति/ते |
| ध्यै – ______ | गम् – गमयति/ते | सिच् – ______ | सृज् – ______ |
| नी – नाययति/ते | खाद् – ______ | विद् – ______ | नृत् – ______ |
| श्रु – श्रावयति/ते | भक्ष् – ______ | धाव् – ______ | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# भाषासूत्रम् – ६

| मूलं वाक्यम् | | |
|---|---|---|
| रामः | वनं | गच्छति । |
| कर्ता | कर्म | क्रियापदम् |

→

| णिजन्तं वाक्यम् | | | |
|---|---|---|---|
| कैकेयी | रामं | वनं | गमयति । |
| प्रयोजक-कर्ता | प्रयोज्य-कर्ता | गौण-कर्म | णिजन्तं क्रियापदरूपम् |

- णिजन्तप्रयोगे प्रयोजककर्ता प्रथमान्तः भवति ।
- णिजन्तप्रयोगे सर्वेषां धातूनाम् 'अय' विकरणं भवति ।
- सर्वेषां धातूनां णिजन्तरूपाणि उभयपदीनि भवन्ति ।
- सर्वेषु लकारेषु णिजन्तप्रयोगाः भवन्ति ।

मूलवाक्ये यः कर्ता सः णिजन्तवाक्ये प्रयोज्यकर्ता भवति । प्रयोज्यकर्तुः का विभक्तिः ?

| धातुप्रकारः | प्रयोज्यकर्तुः विभक्तिः+ उदाहरणम् |
|---|---|
| १) अकर्मक-धातवः – (पत्, हस्, नृत् इत्यादयः) | द्वितीया – मिहिरः **आदित्यं** पातयति । |
| २) गत्यर्थक-ज्ञान/अध्ययनात्मक-सेवनात्मक-शब्दकर्मात्मक-धातवः । (गम्-गच्छ्, या, पठ्, बुध्, ज्ञा, अधि+इ, विद्, शिक्ष्, भुज्, पा-पिब्, अश्, श्रु, स्मृ इत्यादयः) | द्वितीया – वैद्यः **बालकम्** औषधं पाययति ।<br>शिक्षकः **बालकं** पाठं पाठयति ।<br>माता **शिशुं** प्रेङ्खागीतं श्रावयति । |
| ३) सकर्मक-धातवः (लिख्, दा, पच्, रक्ष् इत्यादयः) | तृतीया – धनिकः **स्वपुत्रेण** भिक्षुकाय धनं दापयति । |
| ४) नी-नय्, वह्, खाद् | तृतीया – स्वामी **गर्दभेन** भारं वाहयति । |
| ५) कृ, हृ | द्वितीया/तृतीया<br>शिक्षकः **छात्रान्/छात्रैः** वृक्षारोपणं कारयति । |
| ६) दृश् | द्वितीया/चतुर्थी<br>कौसल्या **रामं/रामाय** चन्द्रं दर्शयति । |

## जिज्ञासापत्रम्

### अ) णिजन्तं कुरुत ।

१. वृक्षः पतति । (प्रभञ्जनः)
२. अन्धकारः नश्यति । (सूर्यः)
३. छात्रः प्रविशति । (रक्षकः)
४. कृष्णः नवनीतं भुङ्क्ते । (यशोदा)
५. अर्जुनः शस्त्रविद्याम् अधीते । (द्रोणाचार्यः)
६. रसिकः काव्यं शृणोति । (कविः)
७. यक्षः सन्देशं नयति । (मेघः)
८. पुत्रः पत्रं लिखति । (पिता)

### आ) णिजन्तं निष्कासयत ।

१. बालकः शुकं फलं खादयति ।
२. व्यासः गणेशेन महाभारतं लेखयति ।
३. आरक्षकः चालकं नियमं ज्ञापयति ।
४. शृगालः मृगं क्षेत्रं दर्शयति ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



# सङ्ख्याविश्वम् १– क्रमवाचकाः ।



(मातामह्या सह दौहित्राः दौहित्र्यः च उपवने उपविश्य वार्तालापं कुर्वन्ति ।)

पृथा – (आनन्देन) मातामहि, कियन्तः वृक्षाः सन्ति अस्माकम् उपवने!

मातामही – अपि अभिजानीथ के वृक्षाः एते ? नामानि कथयत ।

वेणुः – एषः **प्रथमः** वृक्षः आम्रवृक्षः । **द्वितीयः** च कदलीवृक्षः ।

पृथा – अत्र **तृतीयः** दाडिमवृक्षः ।

सुधेन्दुः – **चतुर्थः** च नारङ्गवृक्षः ।

वेणुः – भोः, न केवलं **प्रथमः** वृक्षः अपि तु वृक्षाणां **प्रथमा** आवलिः एव आम्रवृक्षाणाम् । **द्वितीया** कदलीवृक्षाणाम् ...

पृथा – **तृतीया** दाडिमानां **चतुर्थी** च नारङ्गाणाम् ।

मातामही – साधु बालकाः । सुष्ठु अभिज्ञातम् । अपि जानीथ, **प्रथम**, **द्वितीय**, **तृतीय** एते शब्दाः नाम क्रमवाचक–सङ्ख्याविशेषणानि । कथम् उपयुज्यन्ते इमानि ?

वेणुः – **प्रथमः** बालकः – **प्रथमा** बालिका – **प्रथमं** गृहम् ।

सुधेन्दुः – तथैव **द्वितीयः** – **द्वितीया** – **द्वितीयम्** ।

पृथा – **तृतीयः** – **तृतीया** – **तृतीयं** च ।

मातामही – उत्तमम् । किन्तु चतुर्थतः स्त्रीलिङ्गरूपाणि **चतुर्थी**, **पञ्चमी**, **षष्ठी** इत्यादीनि भवन्ति ।

पृथा – अत एव नाग**पञ्चमी**, रथ**सप्तमी**, आषाढ–**एकादशी**, अनन्त**चतुर्दशी** इत्यादीनि तिथिनामानि भवन्ति खलु ।

मातामही – सम्यक् । तर्हि क्रमवाचकानि उपयुज्य इतोऽपि वाक्यानि वदत ।

सुधेन्दुः – अहं **प्रथमे** तले वसामि । पाठशालायां मम वर्गः तु **द्वितीये** तले ।

वेणुः – गतवर्षे अहं **नवम्यां** कक्षायां पठामि स्म । अस्मिन् वर्षे **दशम्यां** कक्षायां पठामि । अग्रिमे वर्षे **एकादश्यां** कक्षायां पठिष्यामि ।

पृथा – पठनस्पर्धायाम् अहं **द्वितीयं** पाठम् अपठम् । तदा **प्रथमं** पारितोषिकं प्राप्नवम् ।

वेणुः – **षष्ठस्य** प्रश्नस्य उत्तरम् **अष्टम्या** छात्रया दत्तम् । अत्र गणेशस्तोत्रं स्मरामि '**प्रथमं** वक्रतुण्डं च . . . इति।

मातामही – बाढं बाढम् । अस्य कृते युष्माकं पारितोषिकं नाम मधुराणि फलानि । यावन्ति फलानि इच्छथ तावन्ति खादथ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## क्रमवाचकानि विशेषणानि

| पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|
| प्रथमः | प्रथमा | प्रथमम् |
| द्वितीयः | द्वितीया | द्वितीयम् |
| तृतीयः | तृतीया | तृतीयम् |
| चतुर्थः | चतुर्थी | चतुर्थम् |
| पञ्चमः | पञ्चमी | पञ्चमम् |
| षष्ठः | षष्ठी | षष्ठम् |
| सप्तमः | सप्तमी | सप्तमम् |
| अष्टमः | अष्टमी | अष्टमम् |
| नवमः | नवमी | नवमम् |
| दशमः | दशमी | दशमम् |




## सम्भाषापत्रम्

**(१) सङ्ख्यायानं पूरयत ।**

प्रथमः ______ ______ ______ ______

१ २ ३ ४ ५




**(२) मेलनं कुरुत ।**

| | |
|---|---|
| तृतीयया | सोपानात् |
| पञ्चमात् | कन्यया |
| सप्तमम् | देव्यै |
| अष्टम्यै | कक्षायाम् |
| दशम्याम् | तलम् |

### चान्द्रमासनामानि ।

कण्ठस्थीकुरुत ।

जानीयात् प्रथमं चैत्रं वैशाखं च द्वितीयकम् ।
तृतीयं कीर्तितं ज्येष्ठम् आषाढं च चतुर्थकम् ॥१॥
श्रावणं पञ्चमं मासं षष्ठं भाद्रपदं तथा ।
अश्विनं सप्तमं विद्याद् अष्टमं कार्तिकं तथा ॥२॥
नवमं मार्गशीर्षं च पौषं च दशमं तथा ।
एकादशं तु माघं च द्वादशं फाल्गुनं तथा ॥३॥
नामानि चान्द्रमासानां द्वादशानां यथाक्रमम् ।
निबोधेद् मासचक्रं च मनुजो वर्षसञ्ज्ञकम् ॥४॥

### सरस्वतीस्तोत्रम् ।

सरस्वती मया दृष्टा वीणापुस्तकधारिणी ।
हंसवाहनसंयुक्ता विद्यादानं करोतु मे ॥ १॥
प्रथमं भारती नाम द्वितीयं च सरस्वती ।
तृतीयं शारदादेवी चतुर्थं हंसवाहिनी ॥२॥
पञ्चमं तु जगन्माता षष्ठं वागीश्वरी तथा ।
सप्तमं चैव कौमारी चाष्टमं वरदायिनी ॥३॥
नवमं सिद्धिदात्री च दशमं ब्रह्मचारिणी ।
एकादशं चन्द्रघण्टा द्वादशं भुवनेश्वरी ॥४॥
द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः ।
जिह्वाग्रे वसते तस्य ब्रह्मरूपा सरस्वती ॥५॥
इति श्रीसरस्वतीस्तोत्रं सम्पूर्णम् ।

**उपक्रमः** – एवमेव अन्यानि सङ्ख्यावाचकयुक्तानि स्तोत्राणि अन्विष्यत ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# दीर्घसङ्ख्याः ।

पठत–बोधत

| | | | |
|---|---|---|---|
| १०८ अष्टाधिकशतम् | २०० द्विशतम् | ४०० चतुश्शतम् | ५०० पञ्चशतम् |
| १००० सहस्रम् | १०,००० दशसहस्रम् | १,००,००० लक्षम् | १,००,००,००० कोटिः |

५७२८
पञ्चसहस्रं सप्तशतं अष्टाविंशतिः

आचार्यः – छात्राः, अद्यतनः दिनाङ्कः कः ?

सुमेधः – अद्य ऑगस्टमासस्य द्वादशः दिनाङ्कः अस्ति । आचार्य, दीर्घा सङ्ख्या कथं पठितव्या ?

आचार्यः – सुष्ठु पृष्टम् ! पठनसमये सङ्ख्यायाः पठनं वामतः करणीयम् । यथा (२०१८ वर्षम्) **अष्ट–एक–शून्य–द्वि** नाम अष्टैकशून्यद्वितमं वर्षम् । छात्राः, अस्मिन् मासे के के दिनविशेषाः सन्ति ?

वेदेशः– आचार्य, अद्य विजयस्य जन्मदिनम् ।

आचार्यः – एवं वा । सुष्ठु । विजय, शुभजन्मदिनं ते । वेदेश, तव जन्मदिनं कदा अस्ति ?

वेदेशः – आचार्य, मम जन्मदिनम् ऑक्टोबरमासस्य सप्तविंशतितमे दिनाङ्के अस्ति । अहम् एक–शून्य–शून्य–द्वितमे वर्षे जनिम् अलभे । आचार्य (२००१) **द्विसहस्राधिकैक** इति अपि पठितुं शक्यते न वा ?

आचार्यः – आम् । बहूत्तमम् ।

सुमेधः – आचार्य, मम आसनक्रमाङ्कः (१६५६) **एकसहस्रं–षट्शतं–षट्पञ्चाशत्** इति। युक्तम् खलु ?

आचार्यः – आम् । युक्तम् अस्ति आधुनिकसंस्कृते । सर्वे छात्राः अग्रिमायां परीक्षायाम् एवं प्रकारेण एव आसनक्रमाङ्कं लिखन्तु ।

वेदेशः – आचार्य, अग्रिमे मासे सामान्यज्ञानस्पर्धा अस्ति । स्पर्धायाः प्रवेशशुल्कं पुस्तकस्य च शुल्कं ज्ञातुमिच्छामि ।

आचार्यः – वेदेश ! सामान्यज्ञानपरीक्षायाः शुल्कमस्ति शताधिकविंशतिः/विंशत्यधिकशतम् (१२०) रूप्यकाणि तथा पुस्तकस्य मूल्यमस्ति शताधिकत्रिंशत् / त्रिंशदधिकशतं (१३०) रूप्यकाणि । आहत्य सार्धद्विशतम् (२५०) । छात्राः, यदि स्पर्धाविषयकी कापि समस्या अस्ति तर्हि पत्रके एव चलभाषक्रमाङ्कः दत्तः । तत्रैव सम्पर्कं कुर्वन्तु। चलभाषक्रमाङ्कः अस्ति (९३७४५३२६४२) **नव–त्रीणि–सप्त–चतुर्–पञ्च–त्रीणि–द्वे–षट्–चत्वारि–द्वे** ।

---

अक्षरैः लिखत – १०५ | २०८ | १०१० | १,१०,००० | ५२०



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# सङ्ख्याविश्वम् २ – आवृत्तिवाचकाः समूहवाचकाश्च ।



(वेणुः शुद्धं सुस्वरं स्तोत्रं पठति । सर्वे शृण्वन्ति ।)

मातामही – उत्तमं वेणो ! **सकृत्** श्रुत्वा अपि कथं त्वया स्तोत्रं कण्ठस्थीकृतम् !

सुधेन्दुः – मातामहि, **सकृत्** इत्युक्ते किम् ?

मातामही – **सकृत्** नाम **एकवारम्** । 'कतिवारम्' इति प्रश्नस्य यद् उत्तरं तद् आवृत्तिवाचकम् इति कथ्यते ।

पृथा – तर्हि आवृत्तिवाचकानि नाम **एकवारं, द्विवारं, त्रिवारं, चतुर्वारम्** इति ।

मातामही – सत्यम् । एतानि अव्ययानि । **सकृत्** , **द्विः**, **त्रिः**, **चतुः** एतानि अनुक्रमं तेषामेव समानार्थकानि ।

वेणुः – हंऽऽ... अस्माकं शिक्षिका सर्वदा वदति, '**दशवारं** कथितं मया ।' '**द्विवारं** पाठं पठत ।' '**त्रिवारं** सुभाषितमालां लिखत' इति । एतादृशः खलु उपयोगः आवृत्तिवाचकानाम् ।

सुधेन्दुः – तथा च वर्षस्य **सकृत्** वयं मातामही–गृहम् आगच्छामः ।

पृथा – अहमपि कथयामि वाक्यम् । अं ..... अहं दिनस्य **द्विः** भोजनं करोमि । (सुधेन्दुं दृष्ट्वा विहस्य) एषः तु दिनस्य **चतुः** भुङ्क्ते । अपि योग्यम्, मातामहि ?

सुधेन्दुः – सर्वथा अयोग्यम् । नाहं **वारंवारं** खादामि । एषा एव अध्ययनं विहाय सप्ताहस्य **त्रिः** नृत्यवर्गं गच्छति ।

मातामही – वाक्यानि तु योग्यानि । किन्तु बालक**त्रयं** कोलाहले मग्नं दृश्यते ।

वेणुः – अधुना '**त्रयम्**' इति किम् ?

सुधेन्दुः – मया अवगतम् । अपि समूहवाचकमेतत् ?

मातामही – साधु सुधेन्दो । **द्वयम्, त्रयम्, चतुष्टयम्, पञ्चकम्, षट्कम्** इत्यादीनि समूहवाचकानि एव ।

पृथा – तर्हि मधुराष्टके अष्ट श्लोकाः सन्ति खलु ?

मातामही – समीचीनम् । अपि जानीथ महेन्द्रेण धावनशतकं कृतं ह्यः ?

पृथा – हंऽऽ... अहं वदामि वाक्यम् । छात्र**त्रयेण** प्रकल्पः कृतः ।

वेणुः – वृक्ष**पञ्चके** प्रभूतानि फलानि सन्ति ।

सुधेन्दुः – जन**चतुष्टयं** संस्कृतेनैव वार्तालापं करोति ।

मातामही – सर्वथा योग्यम् । सम्यक् अवगतं सङ्ख्याविश्वं युष्माभिः । बाढम् ।

| | |
|---|---|
| सकृत् | एकवारम् |
| द्विः | द्विवारम् |
| त्रिः | त्रिवारम् |
| चतुः | चतुर्वारम् |
| पञ्चकृत्वः | पञ्चवारम् |
| षट्कृत्वः | षट्वारम् |
| सप्तकृत्वः | सप्तवारम् |
| अष्टकृत्वः | अष्टवारम् |
| नवकृत्वः | नववारम् |
| दशकृत्वः | दशवारम् |

आवृत्तिवाचकेन सह यदा कालवाचकः शब्दः प्रयुक्तः भवति तदा कालवाचकस्य **षष्ठीविभक्तिः** कार्या

यथा – **दिनस्य द्विः** ।
**सप्ताहस्य चतुर्वारम्** ।
**संवत्सरस्य सकृत्** इति ।

समूहवाचकाः सर्वदा नपुंसकलिङ्गे एकवचने भवन्ति ।
यथा – मार्गे **यानचतुष्टयं** धावति ।

**पठत–बोधत**

सकृदेव प्रपन्नाय तवास्मीति च वादिने ।
अभयं सर्वभूतेभ्यो ददाम्येतत् व्रतं मम ।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## सम्भाषापत्रम्

**(१) आवृत्तिवाचकेन वाक्यं पूरयत ।**


अ) छात्रः दिनस्य _______ (२) अध्ययनं करोति ।

आ) माता _______ (५) मम युतकं प्रक्षालितवती ।

इ) तेन _______ (३) प्रयोगः कृतः ।

**(२) समूहवाचकं लिखत ।**



**(३) क्रम-सङ्ख्या-आवृत्ति-वाचकानां योग्यं रूपं लिखत ।**

अ) सङ्ख्यावाचकानि ।

क) भगवता व्यासेन _______(१८) पुराणानि रचितानि ।

ख) _______(४) वेदाः वर्तन्ते ।

ग) _______(३) महिलाः जलमाहर्तुं गच्छन्ति ।

घ) भोजने _______(६) रसेषु मधुरः रसः मम प्रियः ।

च) भगवद्गीतायाम् अष्टादशे अध्याये _______(७८) श्लोकाः सन्ति ।

आ) क्रमवाचकानि ।

क) श्रीकृष्णः देवक्याः _______(८) अपत्यम् ।

ख) पौषमासः संवत्सरस्य _______(१०) मासः ।

ग) आर्यभट्टः इति भारतवर्षेण प्रेषितः _______(१) उपग्रहः ।

घ) भवने मम गृहं _______(७) तले वर्तते ।

च) _______(२) भवने योगेशः निवसति ।

इ) आवृत्तिवाचकानि ।

क) सप्ताहस्य _______(३) संस्कृतवर्गः भवति ।

ख) दिनस्य _______(९) लोकयानम् आगच्छति ।

ग) अस्माकं कुटुम्बं संवत्सरस्य _______(१) पर्यटनार्थं गच्छति ।

घ) अहम् एकं पाठं _______(२) सम्यक् पठामि ।

च) वर्षस्य _______(४) परीक्षा भवति ।



Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com

# लेखनकौशलम्

## अ–वाक्यरचना

**विभक्त्यर्थाः ।**

**१) प्रथमा–विभक्तिः ।**





**उदाहरणानि –**

१) अ) बालकः दुग्धं पिबति । (कर्तृवाच्यम्)
आ) वृक्षात् फलं पतति ।

२) बालकेन श्लोकः पठ्यते । (कर्मवाच्यम्)

३) अ) सा सानिका अस्ति ।
आ) भारते हिमालयः नाम पर्वतः वर्तते ।

**२) द्वितीया–विभक्तिः ।**




**उदाहरणानि –**

१) बालकः दुग्धं पिबति । (कर्म)

२) रामः वनं गच्छति / याति ।

३) याचकः नृपं धनं याचते ।

४) वत्सः धेनुं प्रति धावति ।


५) जलं विना जीवनम् अशक्यम् ।

६) शालाम् अभितः वृक्षाः सन्ति ।

७) पुष्पं परितः भ्रमराः गुञ्जन्ति ।

८) मार्गम् उभयतः क्षेत्राणि सन्ति ।

**३) तृतीया–विभक्तिः ।**




**उदाहरणानि –**

१) राकेशः हस्तेन लिखति । (करणम्)

२) गणेशेन मोदकाः खाद्यन्ते । (कर्मवाच्यम्)

३) विद्यया विना न मोक्षः ।

४) अथर्वः मित्रेण सह/साकं/सार्धं/समं चित्रपटं पश्यति ।


५) अलं कोपेन ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com


**४) चतुर्थी–विभक्तिः ।**




**उदाहरणानि –**

१) अ. शिक्षकः छात्रेभ्यः ज्ञानं यच्छति । (सम्प्रदानम्)
   आ. जनाः भोजनाय उपाहारगृहं गच्छन्ति ।
२) शुकाय दाडिमं रोचते ।
३) जननी पुत्राय क्रुध्यति /कुप्यति ।
४) यमः नचिकेतसे वरत्रयं प्रतिशृणोति ।
५) पितामही बालकेभ्यः कथां कथयति ।
६) शुकः दाडिमाय स्पृहयति ।
७) शारदायै नमः ।


**५) पञ्चमी–विभक्तिः ।**




**उदाहरणानि –**

१) अ. कृषीवलः क्षेत्रात् गृहम् आगच्छति । (अपादानम्)
   आ. वृक्षात् फलं पतति ।
२) सज्जनाः सत्कार्यात् न विरमन्ति ।
३) सैनिकाः शत्रुभ्यः देशं रक्षन्ति ।
४) ज्ञानात् विना नरः न शोभते ।
५) नगराद् बहिः उद्यानं वर्तते ।
६) धनात् ऋते जीवनं कठिनम् ।


**६) षष्ठी–विभक्तिः ।**




**उदाहरणानि –**

१) रामस्य भ्राता लक्ष्मणः । (सम्बन्धवाचकः)
२) बालानां कृते शिक्षणम् आवश्यकम् ।
३) गृहस्य समीपे वाचनालयः वर्तते ।
४) पाठशालायाः पुरतः क्रीडाङ्गणं वर्तते ।
५) गृहस्य पृष्ठतः पर्वतः अस्ति ।
६) रामस्य वामतः सीता दक्षिणतः लक्ष्मणः च वर्तते ।
७) वृक्षस्य अधः शुनकः उपविशति ।
८) वृक्षस्य उपरि मर्कटः वसति ।

**७) सप्तमी–विभक्तिः ।**




**उदाहरणानि –**

१) अ. पुस्तकं स्यूते अस्ति । (अधिकरणम्)
   आ. पुस्तकम् उत्पीठिकायाम् अस्ति ।
   इ. अहं पुण्यपत्तने वसामि ।
   ई. सः जून मासे प्रथमे सप्ताहे आगमिष्यति ।
२) माता पुत्रे स्निह्यति ।
३) मुख्याध्यापकः छात्रेषु पारितोषिकाणि वितरति ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**लेखनकौशलार्थं व्याकरणदृष्ट्या योग्या वाक्यरचना अपेक्षिता । लेखननियमानां पालनमपि आवश्यकम् । वाक्यरचनायाः नियमान् सम्यग् अधीत्य स्वयं वाक्यानि निर्मातुं प्रयतध्वम् ।**

## अ-१. उपपद-विभक्तिः । (पुनःस्मारणम्)

### १) स्तम्भमेलनं कुरुत ।

अ)

| | |
|---|---|
| रुच् | द्वितीया |
| रक्ष् | चतुर्थी |
| याच् | पञ्चमी |

आ)

| | |
|---|---|
| दा-यच्छ् | सप्तमी |
| वि + रम् | पञ्चमी |
| स्निह् | चतुर्थी |

इ)

| | |
|---|---|
| स्पृह् | सप्तमी |
| गम् | चतुर्थी |
| वि + तॄ-तर् | द्वितीया |

ई)

| | |
|---|---|
| प्रति + श्रु | द्वितीया |
| पत् | चतुर्थी |
| या | पञ्चमी |

### २) योग्यं रूपं लिखत ।

अ) _____ रक्तपुष्पाणि **रोचन्ते** । (भगवत्)

आ) कृषीवलः _____ **अकथयत्** । (राजन्)

इ) शङ्करः _____ **क्रुध्यति** । (असुर)

ई) प्रजाः _____ **स्निह्यन्ति** । (भूभृत्)

उ) त्वम् अयोग्यात् _____ **विरम** । (कर्मन्)

ऊ) सौम्या _____ **स्पृहयति** । (स्रज्)

ए) सुहृदः _____ न **क्रुध्यन्तु** । (सुहृद्)

ऐ) राजा _____ अस्मान् **रक्षति** । (वैरिन्)

ओ) सरितः _____ अम्भः **ददति** । (अस्मद्)

औ) श्रीमन्तः _____ धनम् **अयच्छन्** । (धीमत्)

**वाक्यनिर्माणम्**

**परीक्षार्थं निर्धारिताः धातवः**

गम्-गच्छ्, याच्, कुप्, क्रुध्, दा-यच्छ्, कथ्, रक्ष्, स्निह्, रुच्, स्पृह्, पत्, वि+रम्, वि+तॄ, प्रति+श्रु।

## अ-२. अमरकोषात् समानार्थकशब्दं योजयित्वा वाक्यं पुनर्लिखत ।

यथा - १. रामः श्रेष्ठः **राजा** आसीत् । ⇨ रामः श्रेष्ठः **पार्थिवः/नृपः/भूपः** आसीत् ।

२. कृषकः क्षेत्रे बीजानि वपति ।

३. उर्वरा भूमिः सस्यानि ददाति ।

४. धेनुः दुग्धं यच्छति ।

५. मृगः वने वसति ।

६. भारते दण्डकं नाम वनम् अवर्तत ।

७. सुदामा श्रीकृष्णस्य मित्रम् ।

८. लक्ष्मीः समुद्रमन्थनात् उद्भूता ।

९. गुरुः छात्रेभ्यः विद्यां यच्छति ।

१०. नीलवर्णं गगनं सुन्दरं दृश्यते ।

११. रविः अपारनभसः पारं याति ।

१२. सुगतः अष्टाङ्गमार्गम् उपदिष्टवान् ।

१३. तडागे पद्मं विकसति ।

१४. पादपः परोपकाराय फलति ।

१५. कनकं महिलानां प्रियम् ।

१६. तृषार्तः काकः घटे उपविशति ।

१७. नरः सर्वदा सत्यं वदेत् ।

१८. शङ्करेण जटायां गङ्गा धार्यते ।

१९. महाराष्ट्रे 'गोदावरी' नाम नदी प्रसिद्धा ।

२०. जनाः सर्वदा धनं प्राप्तुं प्रयतन्ते ।

२१. कृष्णः मेघः जलं वर्षति ।

२२. सैनिकः देशस्य रक्षणं करोति ।

२३. नगरे अनन्तभट्टः नाम वैद्यः वसति स्म ।

२४. देशस्य उत्तरस्यां दिशि 'मानसं' नाम तडागः वर्तते ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# आ-१. निबन्धलेखनम्

निबन्धलेखनार्थं निर्दिष्टाः विषयाः –

मम प्रियः कविः ।

मम प्रियः खगः ।

मम प्रियः नेता ।

मम प्रियः उत्सवः ।

मम प्रियं पुस्तकम् ।

मम प्रिया भाषा ।

भारतीयं प्रसिद्धं स्थलम् ।

- ✓ ७-८ वाक्यात्मकः निबन्धः अपेक्ष्यते ।
- ✓ ३-४ शब्दात्मकम् वाक्यम् आवश्यकम् ।
- ✓ अर्थपूर्णानि वाक्यानि एव गुणाङ्कदानाय गणनीयानि ।
- ✓ प्रतिपाद्यः विषयः केन कारणेन भवतां प्रियः इति लेखितव्यम् ।
- ✓ निबन्धसोपानानि अनुसर्तव्यानि ।

**सोपानक्रमः**

१ शब्दसङ्ग्रहः ।

२ विषयाधिष्ठिताः प्रश्नाः ।

३ प्रश्नान् अनुसृत्य वाक्यानि ।

४ उत्तमः प्रारम्भः समारोपः च ।

५ संस्कृतसूक्तयः, सुभाषितानि ।

६ वाक्यानाम् उचितः क्रमः ।

**अवधेयम् –**

प्रश्नपत्रिकायां केवलं विषयस्य निर्देशः भवेत् यथा 'मम प्रियः खगः' इति ।
मयूरः/कपोतः/शुकः/काकः/चटकः वा इति यं कमपि खगमधिकृत्य निबन्धलेखने छात्राणां स्वातन्त्र्यम् अस्ति ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**मम प्रियः खगः – शुकः ।**

१. हरितः, चञ्चूः, रक्ता, वदति, दाडिमम्, मरीचिका, पक्षौ, उड्डयते, मधुरम्, गायति, वृक्षेषु, विहरति, बालानां मित्रम्, खगः

२. कः वर्णः ? किं करोति ? कुत्र निवसति ? किं किं खादति ? तस्मै किं किं रोचते ? कानि वैशिष्ट्यानि ? किमर्थं प्रियः ?

३. तस्य वर्णः हरितः । तस्य चञ्चूः रक्ता । सः वृक्षस्य कोटरे निवसति । आकाशे विहरति । सः मरीचिकाः बीजपूरफलं च खादति । दाडिमं शुकाय अतीव रोचते । सः मधुरं गायति । 'विठू विठू' इति वदति । मनुष्यशब्दानाम् अनुकरणं करोति ।

४. १) प्रारम्भः – अस्माकं सङ्कुले नैके खगाः दृश्यन्ते । तेषु मम प्रियः खगः शुकः ।
२) समारोपः – सः अतीव मनोहारी । अहं शुकाय स्पृहयामि ।

५. सुभाषितम् – आशुशब्दस्य अन्तेन कलायाः प्रथमेन च ।
विहगो यो भवेत्तस्य वर्णं शीघ्रं निवेदय ।।

६.

**मम प्रियः खगः – शुकः ।**

आशुशब्दस्य अन्तेन कलायाः प्रथमेन च
विहगो यो भवेत्तस्य वर्णं शीघ्रं निवेदय ।।

कः एषः खगः ? एषः शुकः । अस्माकं गृहसङ्कुले नैके खगाः दृश्यन्ते । तेषु मम प्रियः खगः शुकः । तस्य वर्णः हरितः चञ्चूः च रक्ता ।

सः वृक्षस्य कोटरे निवसति । आकाशे स्वेच्छया विहरति । सः मरीचिकाः बीजपूरफलं च खादति । दाडिमं शुकाय अतीव रोचते । सः 'विठू विठू' इति वदति मधुरं गायति च । शुकः मनुष्यशब्दानाम् अनुकरणमपि करोति । यथा वयं वदामः तथैव सः रटति ।

सः अतीव मनोहारी । अहं शुकाय स्पृहयामि ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## आ–२. संवादलेखनम्

* संवादलेखनार्थं निर्दिष्टा: विषया: –
गृहसंवाद:/शालासंवाद:/आपणसंवाद:/
प्रवाससंवाद:/कार्यालयसंवाद:/रुग्णालयसंवाद:/
दूरवाणीसंवाद: ।
* ७–८ वाक्यात्मक: अर्थपूर्ण: संवाद:,
उत्तमा संस्कृतरचना
* संवादार्थं पात्राणि काल्पनिकानि,न्यूनातिन्यूने द्वे
पात्रे
* प्रसङ्गरचनाया: स्वातन्त्र्यम्

### गृहसंवाद: ।

पात्राणि – त्रीणि (पिता, पुत्र:, पितामह:)

पिता – अये सौमित्र, भारत–ऑस्ट्रेलियादेशयो: क्रीडास्पर्धा अस्ति खलु ?
पुत्र: – आम् तात ।
पितामह: – का क्रीडा, कदा च ?
पुत्र: – पादकन्दुकक्रीडास्पर्धा वर्तते अद्य । सायं सप्तवादने ‘स्टार’क्रीडावाहिन्याम् ।
पिता – अस्तु तर्हि अहं कार्यालयात् शीघ्रम् आगन्तुं प्रयते । सौमित्र, त्वमपि शीघ्रं स्वाध्यायं पूर्णं कुरु ।
पितामह: – सौमित्र, शालायां परीक्षा कदा प्रारभते ? स्वाध्यायेन सह स्वयमध्ययनमपि आवश्यकम् ।
पुत्र: – सत्यम् । परीक्षा तु विलम्बेन अस्ति । तथा च अहं नियमितरूपेण अध्ययनं करोमि एव । नास्ति हानि: अद्य क्रीडादर्शने ।
पिता – अस्तु । तर्हि निश्चितम् । अद्य सायङ्काले वयं त्रय: मिलित्वा क्रीडास्पर्धां पश्याम: ।
पुत्र: – तात, आगमनसमये रुचिरखाद्यं शीतपेयं च आनयतु । अपि मम मित्राणि आह्वयानि?
पितामह: – अथ किम् ! सर्वे मिलित्वा क्रीडानन्दम् अनुभवाम: ।

**अवधेयम् –**

**प्रश्नपत्रिकायां संवादलेखनस्य केवलं विषय: निर्दिष्ट: भवेत् । विषयानुसारं पात्राणां चयनं प्रसङ्गस्य वर्णनं छात्रै: कर्तव्यम् ।**

**यथा गृहसंवादे माता–पुत्री, अग्रजा – अनुजा, अतिथि: – गृहस्थ:, पिता – पुत्र: इति पात्रकल्पना भवितुम् अर्हति ।**




Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com





## इ–१. संस्कृतानुवादः


८, ९, १० कक्षायाः पाठ्यक्रमे चित्रपदकोषे पाठेषु च ये शब्दाः, धातवः पठिताः तान् अनुसृत्य अनुवादवाक्यानि भवेयुः । अनुवादस्य कृते क्यु. आर. (Q.R.code) माध्यमेन कानिचन वाक्यानि अभ्यासार्थं दत्तानि । तत्सदृशानि वाक्यानि एव प्रश्नपत्रिकायां भवेयुः ।


१.




२.




३.



४.



५.



६.



७.



८.






Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## इ–२. चित्रवर्णनम् ।

✓
- ९–१० शब्दात्मिका मञ्जूषा
- मञ्जूषेतरशब्दानाम् उपयोगः
- अर्थपूर्णानि पञ्च–सप्त वाक्यानि
- लेखनं सुसूत्रं भवेत्
- व्याकरणदोषरहितं शुद्धं च लेखनम्
- वाक्यं ३–४ शब्दात्मकम् आवश्यकम्

✗
- एतद् चित्रं रम्यम् ।
- मह्यम् एतत् चित्रम् अतीव रोचते ।
- केवलं निर्देशः यथा –
  एषा नदी/एतद् गृहम्




**(मञ्जूषा – वपति, कर्षति, सम्भाषणम्)**

**मञ्जूषायां केवलं प्रथमाविभक्तौ शब्दाः दत्ताः । चित्रवर्णनार्थम् उपयुक्तानि धातुरूपाणि अपि प्रथमपुरुषे एकवचने एव सन्ति । वाक्यस्य अर्थानुसारं विभक्तिं, वचनं पुरुषं च प्रयुज्य वाक्यं लेखनीयम् ।**

**अवधेयम्**

**कृषिकार्यम्, उद्यानम्, रेलस्थानकम्, ध्वजवन्दनम्, वर्षाकालः, विद्यालयः, सायङ्कालः, प्रातःकालः, विपणिः एतान् विषयान् अधिकृत्य एव चित्रं दातव्यम् ।**




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com




(मञ्जूषा – ददाति, गृह्णाति, नयति, विक्रीणीते, स्वीकरोति, वहति, पचति)




(मञ्जूषा – पश्यति, क्रीडति, धावति, क्षिपति, नयति, क्रीणाति, जल्पति, उपविशति, चालयति)





Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com


# परिशिष्टम्

## (अ) तरतमवाचकाः ।


**उन्नतः** बालकः


**उन्नततरः** बालकः



**उन्नततमः** बालकः



**दीर्घा** मापिका


**दीर्घतरा** मापिका


**दीर्घतमा** मापिका


**बृहत्** पुस्तकम्


**बृहत्तरं** पुस्तकम्


**बृहत्तमं** पुस्तकम्

| क्रमाङ्कः | विशेषणम् | तरवाचकम् | तमवाचकम् |
|---|---|---|---|
| १ | बलवत् | बलवत्तर (बलीयस्) | बलवत्तम(बलिष्ठ) |
| २ | साधु | साधुतर | साधुतम |
| ३ | स्वादु | स्वादुतर (स्वादीयस्) | स्वादुतम (स्वादिष्ठ) |
| ४ | स्थूल | स्थूलतर | स्थूलतम |
| ५ | दीर्घ | दीर्घतर | दीर्घतम |
| ६ | उन्नत | उन्नततर | उन्नततम |
| ७ | वृद्ध | वृद्धतर (ज्यायस्) | वृद्धतम (ज्येष्ठ) |
| ८ | अल्प | अल्पतर (कनीयस्) | अल्पतम (कनिष्ठ) |
| ९ | प्रशस्य | प्रशस्यतर (श्रेयस्) | प्रशस्यतम (श्रेष्ठ) |
| १० | गुरु | गुरुतर (गरीयस्) | गुरुतम (गरिष्ठ) |
| ११ | लघु | लघुतर (लघीयस्) | लघुतम (लघिष्ठ) |
| १२ | महत् | महत्तर | महत्तम |
| १३ | सूक्ष्म | सूक्ष्मतर | सूक्ष्मतम |
| १४ | दृढ | दृढतर (द्रढीयस्) | दृढतम (द्रढिष्ठ) |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१) मध्यमा अनामिकाया: **दीर्घतरा** ।
२) मध्यमा पञ्च-अङ्गुलिषु **दीर्घतमा** ।
३) पाण्डवेषु भीम: **बलिष्ठ:** ।
४) पाण्डवेषु युधिष्ठिर: **ज्येष्ठ:** ।
५) विराज: सर्वबालकेषु **बलवत्तम:** ।
६) जननी जन्मभूमिश्च स्वर्गात् अपि **गरीयसी** ।
७) भक्षकात् रक्षक: **श्रेयान्** ।
८) मधु शर्कराया: **स्वादुतरम्** ।

* तर-तम-इष्ठ-प्रत्ययान्त-विशेषणानां रूपाणि अकारान्तानि ।
अत: देव-वन-मालानां रूपसदृशानि भवन्ति। ईयस्-प्रत्ययान्त-विशेषणानां रूपाणि स-कारान्तानि अत:
* **पुंलिङ्गे** - प्रथमा, द्वितीया, सम्बोधनम् 'विद्वस्' शब्दमनुसृत्य भवन्ति ।
यथा श्रेयान्, श्रेयांसौ, श्रेयांस:-प्रथमा ।
तृतीयात: सप्तमीपर्यन्तं चन्द्रमस्-शब्दम् अनुसृत्य रूपाणि भवन्ति ।
* **स्त्रीलिङ्गे** - ईयस् प्रत्ययान्तानि 'नदीवत्' भवन्ति । यथा- प्रेयस्-**प्रेयसी** । गरीयस्-**गरीयसी**।
इष्ठ प्रत्ययान्तानि 'मालावत्' भवन्ति । यथा - कनिष्ठ-**कनिष्ठा** । बलिष्ठ-**बलिष्ठा**।

## (आ) नामधातु: ।



मधुना सिञ्चयेत् निम्बम् ।
किन्तु निम्ब: **मधुर:** न **भवति** ।
मधुना सिञ्चयेत् निम्बम् ।
किन्तु निम्ब: न **मधुरायते** ।

चन्द्रमा: विश्वं
**धवलं करोति** ।
चन्द्रमा: विश्वं
**धवलयति** ।



प्रासादशिखरस्थोऽपि
काक: **गरुड:** न **भवति** ।
प्रासादशिखरस्थोऽपि
काक: न **गरुडायते** ।





यत्र वृक्षा: न सन्ति ।
तत्र एरण्ड: अपि **द्रुम: भवति** ।
यत्र वृक्षा: न सन्ति ।
तत्र एरण्ड: अपि **द्रुमायते** ।

**एतानि नामत:/विशेषणत: निर्मितानि क्रियापदानि ।**

बधिरयति कर्णविवरं वाचं मूकयति नयनमन्धयति ।
विकृतयति गात्रयष्टिं सम्पद्रोगोऽयमद्भुतो लोके ।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## (इ) च्वि-रूपाणि ।


कृष्णीकरोति, धवलीकरोति, स्पष्टीकरोति, मलिनीभवति, लघूकरोति इत्यादीनि च्वि-रूपाणि ।



फेनकः वस्त्रं **स्वच्छीकरोति** ।
फेनकः अस्वच्छं वस्त्रं
स्वच्छं करोति, इति अर्थः ।



धूलिकणैः युतकं **मलिनीभवति** ।
धूलिकणैः अमलिनं युतकं
मलिनं भवति, इति अर्थः ।




शिक्षकः शब्दं **स्पष्टीकरोति** ।
शिक्षकः अस्पष्टं शब्दं
स्पष्टं करोति, इति अर्थः ।

विशेषणम् + च्वि-प्रत्ययः + कृ/भू धातुरूपाणि = 'च्वि'-रूपम् ।

* कृष्णीकरोति - अकृष्णं कृष्णं करोति ।
पूर्वं कृष्णं न आसीत् । अधुना कृष्णं करोति/ कृष्णत्वं प्राप्नोति ।
एवं, या स्थितिः पूर्वं नासीत् तथा नूतनां स्थितिं करोति/प्राप्नोति तत्र 'च्वि'रूपं प्रयुज्यते ।

## प्रवहतात् संस्कृत-मन्दाकिनी

शतशतकोटिशरत्पर्यन्तम् ।
प्रवहतात् संस्कृत-मन्दाकिनी ।।धृ.।।
अज्ञाता यस्या गङ्गोत्री इतिहासस्य न यत्रास्ति गतिः ।
परिणतं फलम् अनादिः श्रुतिः यत्प्रसवः सा भारतवाणी ।।१।।
सिन्धुशुतुद्रीसरस्वतीनां तटे ऋषीणां ध्यानपराणाम् ।
होमधूमपावितलोकानाम् अत्रिभृगूनां छन्दोवाणी ।।२।।
'कस्त्वं कोऽहं' प्रश्नपराणाम् आत्मतत्त्वदर्शनोत्सुकानाम् ।
याज्ञवल्क्यमुनिजनकादीनां तत्त्वमसीति ब्रह्मवादिनी ।।३।।
वाल्मीकिमुनिव्यासविरचिता रामकृष्णयोः पावनगाथा ।
अखण्डदीपो भगवद्गीता कर्मयोगसन्देशदायिनी ।।४।।
मेघदूतशाकुन्तलरघुभिः उत्तररामकिरातकुमारैः ।
कालिदासभवभूतिप्रमुखैः कृतिविभूषणा मधुरभाषिणी ।।५।।
पाणिनीसदृशैः स्तोत्रगायकैः भोजमम्मटादिभिर्भूषकैः ।
शङ्करादिभिस्तत्त्वचिन्तकैः दत्तवन्दना वाक्सम्राज्ञी ।।६।।
इयमस्माकं धर्मभारती राष्ट्रैक्यस्य च महती स्फूर्तिः ।
विना संस्कृतं नैव संस्कृतिः इहामुत्रकल्याणकारिणी ।।७।।
पुष्टिं तुष्टिं समावहन्ती जीवितपुष्पं विकासयन्ती ।
विश्वमङ्गलं फलं फलन्ती कोटिकोटिशरत्पर्यन्तम् प्रवहतात् संस्कृतमन्दाकिनी ।।८।।

**- डॉ. गजानन बाळकृष्ण पळसुले**

**पठत-बोधत**

आधुनिकः महाकविः डॉ. गजानन बाळकृष्ण पळसुले महाभागः महाराष्ट्रे सातारा नगरे जातः । व्याकरणशास्त्रविषये तथा भाषाशास्त्रविषये प्रभूतं संशोधनं लेखनं च कृतं महोदयेन । त्रीणि नाटकानि, द्वे चरिते, 'वैनायकम्' इति प्रेरकं महाकाव्यम् इत्यस्य ग्रन्थसम्पद् । प्रसिद्धानां मराठी - नाट्यकाव्यानां सरसः सरलः च अनुवादः अपि कृतः अनेन ।

नैकैः पुरस्कारैः भूषितः अयं राष्ट्रियपण्डितः राष्ट्रपतिपुरस्कारेणापि सम्मानितः । अस्मै पण्डितश्रेष्ठाय नमः ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

शब्दकोषः। (पाठानुसारम्)
शिक्षकस्य/शब्दकोषस्य साहाय्येन माध्यमभाषया शब्दार्थं लिखत।

१. आद्यकृषकः पृथुवैन्यः।

| | |
|---|---|
| चारणाः | |
| स्तवनम् | |
| निःस्पृहता | |
| लुण्ठकः | |
| खनित्रम् | |
| कुद्दालकम् | |
| हलम् | |
| लवित्रम् | |
| उर्वरा | |
| अग्रणीः | |
| अभिषिक्तः | |
| निकृष्टम् | |
| वस्तुजातम् | |
| संस्करणम् | |

२. व्यसने मित्रपरीक्षा।

| | |
|---|---|
| आगन्तुः | |
| क्षेत्रपतिः | |
| पाशः | |
| निभृतम् | |
| लगुडः | |
| प्रदोषकालः | |

३. सूक्तिसुधा।

| | |
|---|---|
| प्रच्छन्नम् | |
| गुप्तम् | |
| पथिन् (अनियमितः) | |
| चरणविकलः | |
| संहतिः | |
| दन्ती | |
| रासभः | |
| निरालम्बः | |

४. अमूल्यं कमलम्।

| | |
|---|---|
| तडागः | |
| व्योम | |
| महिमा | |
| सरसिजम् | |
| सद्म | |
| अध्वा | |
| श्रेष्ठी | |
| सार्थवाहः | |
| धाम | |
| अर्णवः | |

५. स एव परमाणुः।

| | |
|---|---|
| सूक्ष्मेक्षिका | |
| महानसः | |
| अतीन्द्रियः | |
| निरवयवः | |
| नित्यः | |
| व्यावर्तकः | |
| मरीचिः | |
| रजः | |

६. युग्ममाला।

| | |
|---|---|
| निघर्षणम् | |
| श्रुतम् | |
| श्लाघ्यः | |
| निरस्तः | |
| किञ्चिज्ज्ञः | |
| मदः | |
| सकाशात् | |
| अतिवक्ता | |
| कांस्यम् | |

७. संस्कृतनाट्यस्तबकः।

| | |
|---|---|
| सायकः | |
| समिध् | |
| उपरोधः | |
| प्रग्रहः | |
| वाजी | |
| शकटिका | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | |
|---|---|
| ऋद्धिः | |
| प्रतिवेशिकः | |
| अविहा | |
| दारकः | |
| आर्तत्राणम् | |
| अनागाः | |
| आर्द्रपृष्ठाः | |

८. वाचनप्रशंसा ।

| | |
|---|---|
| कालक्षेपः | |
| अपभाषणम् | |

९. धेनोर्व्याघ्रः पलायते ।

| | |
|---|---|
| पत्रक्रीडा | |
| विज्ञापनम् | |
| चमूः | |
| सम्मर्दः | |
| पटमण्डपः | |
| निर्घृणम् | |
| उत्तमाङ्गम् | |
| उपचारपट्टिका | |
| उपहासः | |
| चरमबिन्दुः | |

१०. नदीसूक्तम्

| | |
|---|---|
| सूक्तम् | |
| विप्रः | |
| गाधा | |
| जलौघः | |
| वृत्रः | |
| वज्रम् | |
| अधिक्षेपः | |
| वंशजः | |
| मर्त्यः | |
| अवज्ञा | |
| जनित्रम् | |

११. जटायुशौर्यम् ।

| | |
|---|---|
| गृध्रः | |
| वैदेही | |
| धन्वी | |
| कवची | |
| क्षिप्रम् | |
| पतगसत्तमः | |
| मुक्तामणिः | |
| रौद्रकर्म | |

१२. आदिशङ्कराचार्यः ।

| | |
|---|---|
| उपनीतः | |
| विरक्तः | |
| ऐहिकम् | |
| नक्रः | |
| मलिनकायः | |

१३. चित्रकाव्यम् ।

| | |
|---|---|
| दाराः | |
| अम्भोदः | |
| आशु | |
| प्रकृतिः | |
| चला | |
| मखः | |

१४. प्रतिपदं संस्कृतम् ।

| | |
|---|---|
| प्रतीक्षालयः | |
| मानव्यविद्या | |
| शोधनिबन्धः | |
| भाषाविश्लेषकः | |
| आशयसम्पादकः | |
| वृत्तिः | |
| विशेषार्हता | |

१५. मानवताधर्मः ।

| | |
|---|---|
| एकीभूय | |
| आत्मौपम्यम् | |
| अभ्युदयकृत् | |
| श्रेयस्करः | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## धातुरूपाणि ।

| रूपम् | धातुः, गणः, पदम् | रूपपरिचयः | धात्वर्थः | लट्, प्र.पु., ए.व. |
|---|---|---|---|---|
| स्तोतव्यः | स्तु (२ उ.प.) | | | स्तौति/स्तुते |
| यतस्व | यत् (१ आ.प.) | | | यतते |
| निहितानि | नि + धा (३ उ.प.) | | | निदधाति |
| निधाय | नि + धा (३ उ.प.) | | | निदधाति |
| अवपन् | वप् (१ प.प.) | | | वपति |
| व्यलसन् | वि + लस् (१ प.प.) | | | विलसति |
| पश्यन् | दृश्–पश्य् (१ प.प.) | | | पश्यति |
| भ्रमन् | भ्रम् (१ प.प.) | | | भ्रमति |
| अवलोकितः | अव+लोक् (१० उ.प.) | | | अवलोकयति/ते |
| आस्ते | आस् (२ आ.प.) | | | आस्ते |
| सन्दर्शय | सम् + दृश्–पश्य् (१ प.प.) णिजन्तम् | | | सम्पश्यति (णिजन्तम्– सन्दर्शयति/ते) |
| स्तब्धीकृत्य | स्तब्ध+कृ (८ उ.प.) च्विरूपम् | | | स्तब्धीकरोति |
| पलायिष्यसे | परा + अय् (१ आ.प.) | | | पलायते |
| व्यमुञ्चत् | वि+मुच्–मुञ्च् (६ उ.प.) | | | विमुञ्चति |
| प्रविचलन्ति | प्र+वि+चल् (१ प.प.) | | | प्रविचलति |
| यमिताः | यम्–यच्छ् (१ प.प.) णिजन्तम् | | | यच्छति (णिजन्तम्–यमयति/ते) |
| भिन्द्यात् | भिद् (७ उ.प.) | | | भिनत्ति/भिन्ते |
| छिन्द्यात् | छिद् (७ उ.प.) | | | छिनत्ति/छिन्ते |
| स्मयमानम् | स्मि–स्मय् (१ आ.प.) | | | स्मयति/ते |
| व्यकसत् | वि + कस् (१ प.प.) | | | विकसति |
| पृच्छन्तम् | प्रच्छ्–पृच्छ् (६ प.प.) | | | पृच्छति |
| व्यमृशत् | वि + मृश् (६ प.प.) | | | विमृशति |
| अपेक्षमाणः | अप + ईक्ष् (१ आ.प.) | | | अपेक्षते |
| शाम्येत् | शम्–शाम् (४ प.प.) | | | शाम्यति |
| द्रुमायते | द्रुम (नामधातुः) | | | द्रुमायते |
| वीक्ष्य | वि + ईक्ष् (१ आ.प.) | | | वीक्षते |
| प्रतिसंहर | प्रति+सम्+हृ–हर् (१ उ.प.) | | | प्रतिसंहरति/ते |
| विनोदयामि | वि + नुद् (६ प.प.) णिजन्तम् | | | विनुदति (णिजन्तम्–विनोदयति/ते) |
| उपसर्पिष्यामि | उप+सृप्–सर्प् (१ प.प.) | | | उपसर्पति |
| परिभवति | परि+भू–भव् (१ प.प.) | | | परिभवति |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| रूपम् | धातु:, गण:, पदम् | रूपपरिचय: | धात्वर्थ: | लट्, प्र.पु., ए.व. |
|---|---|---|---|---|
| श्रूयताम् | श्रु-शृ (५ प.प.) कर्मणि | | | शृणोति |
| शिक्षयन्ति | शिक्ष् (१ आ.प.) णिजन्तम् | | | शिक्षते (णिजन्तम् - शिक्षयति/ते) |
| श्रयेत् | श्रि-श्रय् (१ उ.प.) | | | श्रयति/ते |
| व्रणितौ | व्रण् (१० प.प.) | | | व्रणयति |
| नाटयत: | नट् (१ प.प.) णिजन्तम् | | | नटति(णिजन्तम्-नाटयति/ते) |
| परित्रायताम् | परि+त्रै- त्राय्(१ आ.प.) | | | परित्रायते |
| स्तौति | स्तु (२ उ.प.) | | | स्तौति/स्तुते |
| स्वल्पीभवतु | स्वल्प + भू-भव् (१ प.प.) च्विरूपम् | | | स्वल्पीभवति |
| प्रसीद | प्र + सद्-सीद् (१प.प.) | | | प्रसीदति |
| प्रीणयन्त: | प्री (९ प.प.) णिजन्तम् | | | प्रीणाति (णिजन्तम्-प्रीणयति/ते) |
| निवर्तय | नि+वृत्-वर्त् (१आ.प.) (णिजन्तम्) | | | निवर्तते (णिजन्तम् - निवर्तयति/ते) |
| विगर्हयेत् | वि + गर्ह् (१० उ.प.) | | | विगर्हयति/ते |
| अपोथयत् | पुथ् (४ प.प.) णिजन्तम् | | | पुथ्यति (णिजन्तम् - पोथयति/ते) |
| अच्छिनत् | छिद् (७ उ.प.) | | | छिनत्ति/छिन्ते |
| अपसर | अप+सृ-सर् (१ प.प.) | | | अपसरति |
| पर्यटन् | परि + अट् (१ प.प.) | | | पर्यटति |
| प्रतिश्रुत्य | प्रति + श्रु (५ प.प.) | | | प्रतिशृणोति |
| नादयते | नद् (१ प.प.) णिजन्तम् | | | नदति(णिजन्तम्-नादयति/ते) |
| आर्द्रयन्ति | आर्द्र (नामधातु:) | | | आर्द्रयति |
| सृत: | सृ-सर् (१ प.प.) | | | सरति |
| शेते | शी (२ आ.प.) | | | शेते |
| मेलयामि | मिल् (६ उ.प.) णिजन्तम् | | | मिलति/ते (णिजन्तम् - मेलयति/ते) |
| अभिमता | अभि+मन् (४ आ.प.) | | | अभिमन्यते |
| प्रस्तोतुम् | प्र + स्तु (२ उ.प.) | | | प्रस्तौति/प्रस्तुते |
| समाश्रिता: | सम्+आ+श्रि -श्रय् (१ उ.प.) | | | समाश्रयति/ते |
| शंसन्ति | शंस् (१ प.प.) | | | शंसति |
| व्याप्नोति | वि + आप् (५ प.प.) | | | व्याप्नोति |

**अवधेयम् –धात्वर्थ: रूपपरिचय: च छात्रै: शिक्षकस्य/शब्दकोषस्य साहाय्येन लेखनीय: ।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अमरकोषः ।

| कण्ठस्थीकरणार्थम् । | विग्रहः । |
|---|---|
| **राजा** – राजा राट् पार्थिवः क्ष्माभृन्नृपभूपमहीक्षितः। | राजा, राट्, पार्थिवः, क्ष्माभृत्, नृपः, भूपः, महीक्षित्। |
| **भूमिः** – गोत्रा कुः पृथिवी पृथ्वी क्ष्माऽवनिर्मेदिनी मही । | गोत्रा, कुः,पृथिवी,पृथ्वी,क्ष्मा,अवनिः,मेदिनी,मही। |
| **कृषकः** – क्षेत्राजीवः कर्षकश्च कृषिकश्च कृषीवलः । | क्षेत्राजीवः, कर्षकः, कृषिकः, कृषीवलः । |
| **मृगः** – मृगे कुरङ्गवातायुहरिणाजिनयोनयः । | मृगः, कुरङ्गः, वातायुः, हरिणः, अजिनयोनिः । |
| **काकः** – काके तु करटारिष्टबलिपुष्टसकृत्प्रजाः । | काकः, करटः, अरिष्टः, बलिपुष्टः, सकृत्प्रजः । |
| **शृगालः** – शृगालवञ्चुकक्रोष्टुफेरुफेरवजम्बुकाः । | शृगालः, वञ्चुकः, क्रोष्टा, फेरुः, फेरवः, जम्बुकः । |
| **मित्रम्** – वयस्यः स्निग्धः सवया अथ मित्रं सखा सुहृत्। | वयस्यः, स्निग्धः, सवयाः, मित्रम्, सखा, सुहृत् । |
| **वनम्**– अटव्यरण्यं विपिनं गहनं काननं वनम् । | अटवी, अरण्यम्, विपिनम्, गहनम्, काननम्, वनम्। |
| **गुरुः** – उपाध्यायोऽध्यापकोऽथ स्यान्निषेकादिकृद्गुरुः। | उपाध्यायः, अध्यापकः, निषेकादिकृत्, गुरुः। |
| **लक्ष्मीः** – लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया । | लक्ष्मीः, पद्मालया, पद्मा, कमला, श्रीः, हरिप्रिया । |
| **रविः** – भानुर्हंसः सहस्रांशुस्तपनः सविता रविः । | भानुः, हंसः, सहस्रांशुः, तपनः, सविता, रविः । |
| **नभः** – नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम्। | नभः, अन्तरिक्षम्, गगनम्, अनन्तम्, सुरवर्त्म, खम्। |
| **कमलम्** – सहस्रपत्रं कमलं शतपत्रं कुशेशयम् । | सहस्रपत्रम्, कमलम्, शतपत्रम्, कुशेशयम् । |
| **तडागः** – पद्माकरस्तडागोऽस्त्री कासारः सरसी सरः । | पद्माकरः, तडागः, कासारः, सरसी, सरः । |
| **बुद्धः** – सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः । | सर्वज्ञः, सुगतः, बुद्धः, धर्मराजः, तथागतः । |
| **कनकम्** – स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् । | स्वर्णम्, सुवर्णम्, कनकम्, हिरण्यम्, हेम, हाटकम् । |
| **पादपः** – वृक्षो महीरुहः शाखी विटपी पादपस्तरुः । | वृक्षः, महीरुहः, शाखी, विटपी, पादपः, तरुः । |
| **नरः** – मनुष्या मानुषा मर्त्या मनुजा मानवा नराः । | मनुष्याः, मानुषाः, मर्त्याः, मनुजाः, मानवाः, नराः। |
| **धेनुः** – माहेयी सौरभेयी गौरुस्रामाता च शृङ्गिणी । | माहेयी, सौरभेयी, गौः, उस्रा, माता, शृङ्गिणी । |
| **सैनिकः** – भटा योधाश्च योद्धारः सेनारक्षास्तु सैनिकाः । | भटाः, योधाः, योद्धारः, सेनारक्षाः, सैनिकाः । |
| **मस्तकम्**–उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्। | उत्तमाङ्गम्, शिरः, शीर्षम्, मूर्धा, मस्तकः । |
| **नदी** – तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी । | तरङ्गिणी, शैवलिनी, तटिनी, ह्रादिनी, धुनी । |
| **गङ्गा**– गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा । | गङ्गा, विष्णुपदी, जह्नुतनया, सुरनिम्नगा । |
| **मेघः** – धाराधरो जलधरस्तडित्वान् वारिदोऽम्बुभृत् । | धाराधरः, जलधरः, तडित्वान्, वारिदः, अम्बुभृत्। |
| **वैद्यः** – रोगहार्यगदङ्कारो भिषग्वैद्यौ चिकित्सके । | रोगहारी, अगदङ्कारः, भिषक्, वैद्यः, चिकित्सकः । |
| **शङ्करः** – शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः। | शम्भुः, ईशः, पशुपतिः, शिवः, शूली, महेश्वरः। |
| **पार्वती** – अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका । | अपर्णा, पार्वती, दुर्गा, मृडानी, चण्डिका, अम्बिका । |
| **जलम्** – पयः कीलालममृतं जीवनं भुवनं जलम् । | पयः, कीलालम्, अमृतम्, जीवनम्, भुवनम्, जलम् । |
| **धनम्** – द्रव्यं वित्तं स्थापतेयं रिक्थमृक्थं धनं वसुः । | द्रव्यम्, वित्तम्, स्थापतेयम्, रिक्थम्, ऋक्थम्, धनम्, वसुः । |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## दशमी कक्षा – कृतिपत्रिकायाः प्रारूपम् ।

समयः – होरात्रयम् | विषयः संस्कृतम् (सम्पूर्णम्) | गुणाङ्काः १००

### प्रथमः विभागः – सुगमसंस्कृतम् (१५)

१) अ) चित्रं दृष्ट्वा नामानि लिखत। (५ तः ४) (केवलं दशमीकक्षा–चित्रपदकोषतः ।) १ × ४ = ४

१. [ ]  २. [ ]  ३. [ ]  ४. [ ]  ५. [ ]

आ) सङ्ख्याः अक्षरैः/अङ्कैः लिखत । (३ तः २) (पृ. क्र. ७ आधारेण) १ × २ = २

इ) समयं लिखत। (स्तम्भमेलनम्) (पृ. क्र.४, ५ आधारेण) $\frac{१}{२}$ × ४ = २

ई) वासर–तालिकां पूरयत । (केऽपि द्वे) (पृ. क्र. ६ आधारेण) १ × २ = २

______ सोमवासरः ← ह्यः मङ्गलवासरः ← अद्य ______ → ______ गुरुवासरः

उ) उदाहरणद्वयं लिखत । (६ तः ५) (पृ. क्र.६, ७ आधारेण) १ × ५ = ५

१. वर्णमालाधारितम् । × २

२. देव–शब्दतः चन्द्रमस्–शब्दपर्यन्तं नामद्वयम् । × २

३. १/४/६/१० गणस्य धातुद्वयम् । × २

### द्वितीयः विभागः – गद्यम् । (२२)

२) अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत । (८०–१०० शब्दयुक्तः गद्यांशः दातव्यः) ७

आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत । ७

कृतयः –

१. अवबोधनम् । (४ तः ३) १ × ३ = ३

क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । /
उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । (रिक्तस्थानद्वयं प्रष्टव्यम्) $\frac{१}{२}$ × २

ख) कः कं वदति ?

ग) पूर्णवाक्येन उत्तरं लिखत ।

घ) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत ।

च) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?

२. शब्दज्ञानम् । (३ तः २) २

क) २ धातुसाधित–अव्यये/विभक्त्यन्तपदे चित्वा लिखत । $\frac{१}{२}$ × २

ख) प्रश्ननिर्माणं कुरुत । (अधोरेखनम् आवश्यकम् ।) १ × १

ग) विशेषणं–विशेष्यम् । (कृतयः – मेलनं कुरुत/चयनं कुरुत/ चतुर्थपदं लिखत ।) $\frac{१}{२}$ ×२

घ) सन्धिः ।
(पूर्वपदं लिखत= $\frac{१}{२}$ ×२, उत्तरपदं लिखत $\frac{१}{२}$ ×२, विग्रहं लिखत १ × १,
चतुर्थपदं लिखत १ × १ )

च) लकारं लिखत । १ × १ (अधोरेखनम् आवश्यकम् ।)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३. पृथक्करणम् । $\frac{१}{२}$ × ४ = २
क) क्रमेण योजयत । (गद्यांश: अ)
अथवा
ख) रेखाचित्रम् । (जालरेखा/वृक्षरेखा/प्रवाहि-जालम्/स्तम्भपूरणम्/शब्दपेटिका) (गद्यांश: आ)

इ) गद्यांशं पठित्वा सरलार्थं लिखत । (२ त: १)(४-५ वाक्यात्मक: गद्यांश: दातव्य: ।) १ × ४ = ४
(नाट्यस्तबक:, नदीसूक्तम् ।)

ई) माध्यमभाषया उत्तरं लिखत । (३ त: २) (केवलं स्वाध्यायाधारितम् ।) २ × २ = ४

## तृतीय: विभाग: – पद्यम् । (२०)

३) अ) पद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत । (६-८ पङ्क्तय: प्रष्टव्या: ।) ४
१. पूर्णवाक्येन उत्तरं लिखत । १ × १ = १
२. पद्यांशत: विशेषणं चिनुत । (कृतय:-मेलनं कुरुत/चयनं कुरुत/चतुर्थपदं लिखत ।) $\frac{१}{२}$ ×२ = १
३. रेखाचित्रम् । (जालरेखा/वृक्षरेखा/प्रवाहि-जालम्/स्तम्भपूरणम् / शब्दपेटिका) २

आ) पद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत । (६-८ पङ्क्तय: प्रष्टव्या: ।) ४
कृतय: –
१. पूर्णवाक्येन उत्तरं लिखत । १
२. सन्धि: । १
(पूर्वपदं लिखत $\frac{१}{२}$ ×२, उत्तरपदं लिखत $\frac{१}{२}$ ×२, विग्रहं लिखत १ × १,
चतुर्थपदं लिखत १ × १)
३. माध्यमभाषया उत्तरं लिखत । (२ त: १) (स्वाध्यायाधारितम्) २ × १ = २

इ) पद्ये शुद्धे पूर्णे च लिखत । (क, ख त: १, ग, घ त: १) ६
१. क) ४ पङ्क्तियुतं पद्यम् अथवा ख) ४ पङ्क्तियुतं पद्यम् ४
२. ग) २ पङ्क्तियुतं पद्यम् अथवा घ) २ पङ्क्तियुतं पद्यम् २

ई) अन्वयं पूरयत । (सूक्तिसुधात: तथा युग्ममालात: एव अन्वय: प्रष्टव्य:
किन्तु श्लोक: न दातव्य: । ४ रिक्तस्थानानि भवेयु: ।) $\frac{१}{२}$ × ४ = २

उ) सरलार्थं लिखत । (३ त: २) (वाचनप्रशंसा/मानवताधर्म: ।) २ × २ = ४

## चतुर्थ: विभाग: – लेखनकौशलम् । (१५)

प्र. ४ अ) वाक्यरचनां कुरुत । ५
१. धातूनाम् उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (५ त: ३) (उपपदविभक्ति: ।) ३
२. अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत । (४ त: २) २

आ) ५/७ वाक्यात्मकं निबन्धं/संवादं लिखत । ५
निबन्ध: – मम प्रिय: उत्सव:/खग:/कवि:/नेता/पुस्तकम्/प्रिया भाषा/भारतीयं प्रसिद्धं स्थलम्।
अथवा
संवाद: – गृहम्/शाला/आपणम्/प्रवास:/कार्यालय:/रुग्णालय:/दूरवाणी ।

इ) निर्दिष्टां कृतिं कुरुत । ५
मञ्जूषात: उचितशब्दान् चित्वा ५-६ वाक्यात्मकं चित्रवर्णनं कुरुत ।
अथवा
संस्कृतानुवादं कुरुत । (८ त: ५) १ ×५ (पूर्वपरिचित-चित्रपदकोषस्य शब्द-धातुसङ्ग्रहस्य च आधारेण ४-६ शब्दात्मकानि वाक्यानि प्रष्टव्यानि ।)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## पञ्चमः विभागः – भाषाभ्यासः । (२०)

**५) अ) तालिकापूर्तिं कुरुत ।** ८

१. नामतालिका । (६ तः ४) **(८, ९, १० कक्षाम् अनुसृत्य)** $\frac{१}{२}$ × ४ २

२. सर्वनामतालिका । (६ तः ४) **(८, ९, १० कक्षाम् अनुसृत्य)** $\frac{१}{२}$ × ४ २

३. क्रियापदतालिका । (६ तः ४) **(१, ४, ६, १० गणतः, अस्, कृ)** $\frac{१}{२}$ × ४ २

**(लट्/लङ्/लोट्/विधिलिङ्/लृट् इति लकारतः केऽपि ३ प्रष्टव्याः ।**

**अष्टमीकक्षायाः पाठ्यपुस्तके प्रदत्तात् धातुकोषात् एव धातवः प्रष्टव्याः ।)**

४. धातुसाधित-विशेषण-तालिका । (६ तः ४) (पृ. क्र. ७८) $\frac{१}{२}$ × ४ २

**आ) निर्दिष्टाः कृतीः कुरुत ।** (५ तः ४) १२

१. योग्यपर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत । (५ तः ३) १ × ३

**(सङ्ख्यावाचक-क्रमवाचक-आवृत्तिवाचकानाम् आधारेण ५ वाक्यानि ।)**

२. समासानां तालिकापूर्तिं कुरुत । (५ तः ३) १ × ३

३. समानार्थकशब्दान्/विरुद्धार्थकशब्दान् लिखत । (५ तः ३) १ × ३

४. सूचनानुसारं कृतीः कुरुत । (५ तः ३) १ × ३

क) प्रयोगपरिवर्तनम् । **(केवलं लट्लकारः तथा कर्मणि/कर्तरि-भू.धा.वि.)**

ख) त्वान्त/ल्यबन्त-अव्ययं निष्कासयत ।

ग) स्म निष्कासयत ।

घ) 'त्वं' स्थाने 'भवान्/भवती' अथवा 'भवान्/भवती' स्थाने 'त्वं' योजयत ।

ऋ) वचनं/लकारं परिवर्तयत ।

च) णिजन्तं कुरुत/निष्कासयत ।

५. वाक्यं शुद्धं कुरुत । (५ तः ३) **(अशुद्धि-अधोरेखनम् आवश्यकम् ।)** १ × ३

**(कर्ता-क्रियापद-सम्बन्धः, विशेषण-विशेष्य-सम्बन्धः, उपपद-विभक्ति-अव्ययानि)**

## षष्ठः विभागः – अपठितम् । (८)

**प्र. ६ अ) गद्यांशं पठित्वा कृतीः कुरुत । (६ तः ४)** ४

**(६०-८० शब्दयुतः सरलः गद्यांशः दातव्यः)** १ × ४

१. पूर्णवाक्येन उत्तरत ।

२. प्रातिपदिकं लिखत । (शब्दद्वयम् आवश्यकम्) $\frac{१}{२}$ × २

३. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत ।

४. माध्यमभाषया सरलार्थं लिखत । (गद्यांशतः १ वाक्यं दातव्यम् ।)

५. विभक्त्यन्तपदम्/अव्ययम्/क्रियापदं चिनुत लिखत च ।

६. कारकपरिचयं कुरुत । (अधोरेखनम् आवश्यकम् ।)

**आ)-१. पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत । (अवबोधनाय सरले पद्यांशे दातव्ये ।)** ४

१. पूर्णवाक्येन उत्तरत । (२ तः १) १

२. विशेषण-विशेष्य-सम्बन्धः/समानार्थकं शब्दं/विरुद्धार्थकं शब्दं लिखत । (केवलम् १) १

**आ)-२. पद्यांशं पठित्वा जालरेखाचित्रं पूरयत । (४ रिक्तस्थानानि)** २

***

अवधेयम्- प्राश्निकेभ्यः अपेक्षिताः सूचनाः अत्र हरितवर्णेन दत्ताः ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

महाराष्ट्रराज्य-पाठ्यपुस्तक-निर्मितिः तथा
अभ्यासक्रम-संशोधन-मण्डलम्, पुणे-४

संस्कृत आमोद इयत्ता दहावी (संपूर्ण) ₹ ६६.००




Downloaded from https:// www.studiestoday.com